**मानवाः** – मनुष्याः, उपलक्षणाच्छेषाशेषजीवाश्च, **चञ्चलम्** – कुशाग्रस्थजलबिन्दुवदतीव तरलम्, **सुखम्** – यत्किञ्चित्तुच्छमाभिमानिकं सौख्यम्, **तदादाय** – क्लेशकोटिभिः प्राप्य, **मोहे** – गृद्ध्यतिशयेऽज्ञाने वा, **सक्ताः** – निमग्ना वर्तन्ते। अत्रोपमामाह– **आदित्यरश्मितप्ताः** – सूर्यकिरणोष्णीभूताः, **क्षीयमाण**माधारभूतं **पानीयम्** – जलं येषाम् – **क्षीयमाण–पानीयाः**, तत्क्षयश्च चण्डांशुशुभिर्बाष्पीभवनेन बोध्यः, **मत्सा इव** – झषा इव। वेलावृद्धौ हि सागरतटं जलेनाव्रियते, तदा तुच्छभोज्याद्याशंसया मत्स्या अपि तत्रागच्छन्ति, तेषु ये तदासक्त्या न निवर्तन्त ते गर्तादौ क्षीयमाणपानीये मरणान्ता यातना विषहन्ते,

१. नवरं मोहावलेपेनावलिप्तः स्तब्ध इत्यर्थः। २. धाहा- उच्चै रुदनम्। ३. ऋषिभाषिते।। १५/१५, १७, १६, १८।।

तथा मोहसक्ता मानवा अपीति। किञ्च -

**अध्रुवं संसिया रज्जं, अवसा पावंति संखयं।**

**छिज्जं व तरुमारूढा, फलत्थी व जहा नरा।।२४-३४।।**

**अध्रुवम्** - अस्थिरम्, **राज्यम्**, उपलक्षणादन्यदप्यासक्तिविषयम्, **संश्रिताः** - त्रैलोक्यसारमिदमिति मत्या शरणं प्रपन्नाः, **अवशाः** - कर्मायत्ततया परतन्त्राः, **सङ्क्षयम्** - राजादिपर्यायस्य सुतरामुच्छेदम्, **प्राप्नुवन्ति** - पुण्यक्षयेऽधिगच्छन्ति, यथोक्तम् - धी धी धी संसारं, देवो मरिऊण जं तिरी होइ। मरिऊण रायराया, परिपच्चइ निरयजालाहिं - इति[1]।

**यथा फलार्थिनः** - आम्रादिफललिप्सवः, **नराः** - पुरुषाः, **छेद्यम्** - अनन्तरमेव स्कन्धादेव कर्त्तनीयम्, **तरुम्** - सहकारादिवृक्षम्, **आरूढाः**-तं प्रति विहितारोहणाः। अत्र पाक्षिका[2] फललब्धिरसंशयं तु पातपीडेत्यशेषासक्तिविषयेष्वप्युपनेतव्यम्। इदमपरं विपर्यस्ततरमित्याह -

**मोहोदये सयं जंतू, मोहं तं चेव वेसई।**

**छिण्णकण्णो जहा कोई, हसिज्जा छिन्ननासियं।।**

**।।२४-३५।।**

**जन्तुः** - जीवः, **स्वयम्** - आत्मनैवात्मनो **मोहोदये** - छेद्यवृक्षारोहणसङ्काशमौढ्योद्रेके सञ्जाते सति, **तमेव** - स्वकीयमोहजातीयमेव, **मोहम्** - परकीयमौढ्यम्, **द्वेष्टि** - धिक्कुरुते, **यथा कश्चित् छिन्नकर्णः** - विलूनश्रोत्रः,

१. वैराग्यशतके।।५५।। २. स्याान्नापिस्यादिति वैकल्पिका।

Ashopnisad_2.p65
2nd Proof



**छिन्ननासिकम्** - निकर्त्तितनासं पुरुषं **हसेत्** - अहो ते गता नासेत्युपहासपात्रीकुर्यात्। स्वस्मिन्नपि तुल्यतयोपहासपात्रतायास्ताम्प्रत्यन्धतयास्य कोऽप्यपूर्वो मोह इति भावः। एतदेवोपमान्तरेण स्फुटयति-

**मोहोदई सयं जंतू, मंदमोहं तु खिंसई।**

**हेमभूसणधारि व्वा, जहा लक्खाविभूसणं।।२४-३६।।**

**जन्तुः स्वयं मोहोदये मन्दमोहम्** - स्वापेक्षयाऽपकृष्टमौढ्यं पुरुषम्, **खिंसति** - निन्दति। **यथा**[1] कश्चि**द्धेमभूषणधारी** - सुवर्णाभरणधरः **लाक्षाविभूषणम्** - जतुमयालङ्कारधारिणं खिंसेत्, 'अहो ते परिग्रहदोष' इत्यादि, न चात्मनोऽधिकतरः स इति निभालयतीति व्यक्तैवास्य मोहाधीनता। एतदेवाचष्टे-

**मोही मोहीण मज्झम्मि, कीलए मोहमोहिओ।**

**गहीणं व गही मज्झे, जहत्थं गहमोहिओ।।२४-३७।।**

**मोही** - मौढ्यकलुषितान्तःकरणः, **मोहिनाम्** - आत्मसदृशानाम्, **मध्ये मोहमोहितः** सन् **क्रीडति** - विचेष्टते। **ग्रहः** - भूताद्यावेशः, सोऽस्त्यस्येति **ग्रही**, स **यथा ग्रहिणां मध्ये यथार्थम्** - भूताविष्ट इति स्वान्वर्थमनतिक्रम्य, **ग्रहमोहितः** सन् क्रीडति। पुंसां समानशीलानां सद्यो भवति सौहृदम् - इति[2] वचनात् स्वसदृशेष्वेवास्य विचेष्टितविलासः, नानीदृशेष्विति भावः। मोहोदये चावश्यं तद्बन्धः, जे वेयइ ते बंधइ इति वचनात्। उपलक्षणमेतत्

१. यावन्तश्चकारास्तावन्तः समुच्चय इतिवदत्रेवयथा - इत्यादिष्वप्युदाहरणोपमाद्युपन्यासेऽवगन्तव्यम्। २. त्रिषष्टिशलाकापुरुषचरित्रे।। दशमपर्वणि।।

तेन शेषकर्मप्रकृतिनामपि यथासम्भवं बन्धो द्रष्ट्व्यः, इत्थं च -

**बंधंता निज्जरंता य, कम्मं नण्णंति[1] देहिणो।**

**वारिग्गाहघडीउ व्व, घडिज्जंतनिबंधणा।।२४-३८।।**

**देहिनः** - शरीरिणः, **कर्म बध्नन्तो निर्जरयन्तश्च नण्णंति** - कूप[2]वदाचरन्ति। **यथा वारिग्राहः** - पातालस्रोतोलक्षणशिरा-सकाशाज्जलग्रहणम्, **घटी** - अरघट्टकयन्त्रव्यवस्थितः क्षुद्रघटः, एतदुभयस्मात् सकाशात् कूपे जलागमस्तन्निर्गमश्च भवति, तथा देहिनोऽपि **घट्यमानम्** - निष्पद्यमानम्, **निबन्धनम्** - कर्म-बन्धनिर्जरानिमित्तं येषां ते - **घट्यमाननिबन्धनाः** सन्ति। उपमान्तरेण व्यक्तीविधत्ते-

**बज्झए मुच्चए चेव, जीवो चित्तेण कम्मुणा।**

**बद्धो वा रज्जुपासेहिं, ईरियन्तो पओगओ।।२४-३९।।**

**जीवश्चित्रेण** - ज्ञानावरणाद्यनेकप्रकारेण, **कर्मणा बध्यते मुच्यत एव**, नास्य कर्मबन्धनिर्जरान्तरं प्राप्यत इति भावः, यद्वा न केवलं बध्यतेऽपि तु मुच्यतेऽपि , न न मुच्यते - मुच्यत एवेत्यवधारणयोजनम्। **यथा रज्जूपाशैर्बद्धः** - नियन्त्रितः, **प्रयोगतः** - पाशशैथिल्यानुगुणात् स्वमोक्षोपायानुष्ठानात्, **एर्यमानः** - गतिशीलः, उक्तप्रयोगप्रवृत्त इत्यर्थः। स यथा सदुपायादुपेयं प्राप्नोत्येवं प्रकृतेऽपि योज्यम्, तस्मात् -

**कम्मस्स संतइं चित्तं, सम्मं नच्चा जिइंदिए।**

**कम्मसंताणमोक्खाय, समाहिमभिसंधए।।२४-४०।।**

१. च- नाऽण्णंति। ट- नणंति। शेषेषु - नण्णंति। मुद्रितेषु - नऽण्णं ति। ग-नऽण्णंति। २. णण्ण - इति कूपवाची देश्यशब्दः।

Ashopnisad_2.p65
2nd Proof



**जितेन्द्रियः** - प्रत्याहृतकरणग्रामः, मनोज्ञेतरविषययो रागादिरहितो वा, **कर्मणः** - ज्ञानावरणीयादेः, **चित्राम्** - असङ्ख्यभेदप्रभेदशबलाम्, **सन्ततिम्** - परम्पराम्, **सम्यक्** - सद्गुरूपासनेन, **ज्ञात्वा** - भावनाज्ञानविषयीकृत्य, **कर्मसन्तानः** - अनन्तरोक्ततत्सन्ततिः, तस्मा**न्मोक्षः** - एकान्तिकात्यन्तिकमुक्तिः, **तस्मै** - तदर्थम्, **समाधिम्** - ज्ञानक्रिययोः सम्यग् योगम्, **अभिसन्धयेत्** - प्रवचनप्रतिपादितविधिनाऽऽत्मनि परिणमयेत्। एतादृशसमाधिरपि स्याद्वादज्ञप्त्यैव, अन्यतरैकान्तेनोपेयप्राप्त्य-सम्भवात्, यदाह - णाणं किरियारहियं, किरियामेत्तं च दो वि एगंता। असमत्था दाएउं, जम्ममरणदुक्ख मा भाई - इति[1]। अतः प्रथमतः स्याद्वाद एवावगन्तव्य इत्याह-

**दव्वओ खेत्तओ चेव, कालओ भावओ तहा।**

**निच्चानिच्चं तु विण्णाय, संसारे सव्वदेहिणं।।२४-४१।।**

प्राग्वत्[2]। उपलक्षणमेतत्सत्त्वासत्त्वाद्यनेकान्तस्य यावज्ज्ञान-क्रियासमुच्चयस्य। ततस्तदनुभावेन-

**निच्चलं कयमारोग्गं, ठाणं तेलोक्कसक्कयं।**

**सव्वण्णुमग्गाणुगया, जीवा पावंति उत्तमं।।२४-४२।।**

**सर्वज्ञमार्गानुगताः** - केवलिप्रज्ञप्तागमनीतिप्रतिपत्तारः, **जीवाः** - भव्यात्मानः, **निश्चलम्**, ततः स्वाभाविकप्रायोगिक-चलनाभावात्, **कृतारोग्यम्**, भवव्याधिसङ्क्षपणेन विहित-

१. सन्मतितर्के।।३-६८।। २. ऋषिभाषिते।।९-३५।।

सिद्धत्वम्[1], **त्रैलोक्येन** – अमरनरासुरवृन्दोपलक्षितेन, **सत्कृतम्**– परमपूज्यत्वेनाभिमतम्, **उत्तमम्** – सर्वोत्कृष्टम्, **स्थानम्** – सिद्धिगतिनामधेयं पदम्, परमानन्दमयस्वरूपमात्रावस्थानं वा, **प्राप्नुवन्ति** – उपगच्छन्ति।

प्रकृततत्त्वाधिगतिफलमाह–

**एवं सिद्धे बुद्धे विरए विपावे दंते दविए अलंताती णो पुणरवि इच्चत्थं हव्वमागच्छइ त्ति बेमि।।**

**एवमि**त्यादि प्राग्वत्। इति चतुर्विंशतितमे हरिगिरिनामाध्ययन आर्षोपनिषद्।

## ।।अथ पञ्चविंशतितमोऽध्यायः।।

प्रकारान्तरेण सिद्ध्यादिसाधनमाचष्टे –

**तए णं अंबडे परिव्वायए जोगंधरायणं एवं वयासी – ''मणे मे विरई भो देवाणुप्पिओ ! गब्भवासाहि, कहं न तुमं बंभचारी ?'' तए णं जोगंधरायणे अंबडं परिव्वायगं एवं वयासी – ''भारिया[2] ! एहि या एहि ता आयाणाहि। जे खलु हारिता ! पावेहि कम्मेहिं अविप्पमुक्का ते खलु गब्भवासाहि रज्जंति, ते सयमेव पाणे अतिवातेंति, अण्णेहि वि पाणे अतिवातावेंति, अण्णे वि पाणे अतिवातावेंते वा सातिज्जंति समणुजाणंति; ते सयमेव**

१. आरोग्यम् - सिद्धत्वम्।। आवश्यकवृत्तौ अ.२।। २. द-क-ख-ग-ज-ट-ठ-ढ-ध-न-प- भारिया। घ-झ-त- आरिया। च- हारिया।

Ashopnisad_2.p65
2nd Proof



**मुसं भासंति० सातिज्जंति समणुजाणंति; अविरता अप्पडिह–तपच्चक्खातपावकम्मा मणुजा अदत्तं०; अन्नं०; सातिज्जंति समणुजाणंति; ते सयमेव अब्बंभ–परिग्गहं गिण्हंति मीसयं भणियव्वं जाव समणुजाणंति, एवामेव ते अस्संजता अविरता अप्पडिहतपच्चक्खातपावकम्मा सकिरिया असंवुता एकंतदंडा एकंतबाला बहुं पावं कम्मं कलिकलुसं समज्जिणित्ता इतो चुता दुग्गति–गामिणो भवंति, एहि हारिता ! आताणाहि ।।२५–१।।**

**ततः** प्रस्तुतवक्तव्यपूर्वतनसंवादानन्तरम्, स तु संवादः सम्प्रदायाभावान्नोच्यते। **णं** वाक्यालङ्कारे। **अम्बडः परिव्राजकः** – एतन्नामा विद्याधरश्रावक आगमे[1] प्रसिद्धः, तथापि प्रत्येकबुद्धर्षितया तद्भवमुक्तिगामित्वेन चायं ततोऽन्यः सम्भाव्यते, न चानागतनयापेक्षयाऽयमेव स इति वाच्यम्, चरमजिनत्रयशासने समुत्पन्नेषु प्रत्येकबुद्धेषु तद्गणनानुपपत्तेः, आगम[2]प्रसिद्धस्यास्य तृतीयभवे मोक्षगामित्वेऽपि प्रत्येकबुद्धत्वविरहाच्च, यदुक्तम् – से णं तहारूवाणं थेराणं अंतिए केवलं बोहिं बुज्झिहित्ति – इति[3]। योगन्धरायणोऽप्युदायननृपमन्त्रितया शास्त्रे निर्दिष्टस्तदत्र तत्त्वं केवलिनो विदन्ति।

**अम्बडः परिव्राजको योगन्धरायणमेवमवादीत् – भो**

१. स्थानाङ्गे।। ९-६९२।। २. व्याख्याप्रज्ञप्तौ।।१४-८।।५३०।।
३. औपपातिके।।४०।।

**देवानुप्रिय ! मे** – मम, **मनसि** – चित्ते, **गर्भवासात्** – कुकर्मात्, तद्धेतुभावात्, भवति हि कुकर्मिणः पुनर्जन्मनः गर्भवास इति। **विरतिः** – उपरतिः। कुकर्मविरतिश्चात्मरमणेन, तदेव निश्चयब्रह्मचर्यमित्यनेनात्मनो ब्रह्मचारिता ज्ञापिता। परस्यापि तदापादनाय प्रोत्साहयन्नाह – **कथं न त्वं ब्रह्मचारी** ? भवताऽपि ब्रह्मचारिणा भाव्यमित्याशयः।

अत्रेतरोऽपि स्वपरिणततत्त्वज्ञानाविष्कारेणाहमपि ब्रह्मचार्येव, मज्ज्ञानस्य विरत्यावहत्वेन सफलत्वादित्याशयेनोत्तरयति, एतदेवाह – **ततो योगन्धरायणोऽम्बडं परिव्राजकमेवमवादीत्** – भारं वहतीति **भारिकः**, भार ठक्, ब्रह्मचर्यव्रतभारनिरवाहक इत्यर्थः, तत्सम्बोधनम्। **एहि यावदेहि तावदाजानीहि** – सम्यगवगच्छ। एहियावदित्यादि तद्देशकालप्रसिद्धमामन्त्रणं सम्भाव्यते। आज्ञान-विषयमेवाह **हारीत !** एष च कौत्सगोत्रशाखाविशेषः श्रमण-शाखाविशेषो वा[1], यत्सम्बन्धितयाऽम्बडः परिव्राजकोऽनेना-भिधानेन सम्बोध्यते। **ये खलु पापकर्मभिरविप्रमुक्ताः** – नित्यं कृतकुकर्मसङ्गा**स्ते खलु गर्भवासे** कुकर्मणि **रजन्ति**[2]।

अत**स्ते स्वयमेव प्राणानतिपतन्ति** – स्वयं जीवहिंसां कुर्वन्ति, **अन्यैरपि प्राणानतिपातयन्ति, अन्येऽपि** जनाः **प्राणानतिपातयतो वा स्वादन्ते** – अनुमोदयन्ति, **समनुजानन्ति** – ममाप्यतीवाभिमतमिदमिति तान् कुकर्मणि

१. प्राकृतशब्दमहार्णवे।। पृ.१४५।। २. रज्जीं रागे।। गण. १ - धातुपाठे - ।।८९६।। घ - सज्जंति।

Ashopnisad_2.p65
2nd Proof



प्रोत्साहयन्ति। तथा **ते स्वयमेव मृषां भाषन्त** इत्याद्युक्तवत्। तेऽ**विरताः** – प्राणातिपातादिविरतिवर्जिताः, **न प्रतिहतानि** – न प्रतिषेधितानि, अतीतकालकृतानि निन्दनतः, **न प्रत्याख्यातानि** च भविष्यत्कालभावीनि **पापकर्माणि** – प्राणातिपातादिवृजिनक्रिया यैस्ते – **अप्रतिहतप्रत्याख्यातपापकर्माणः**।

यद्वा **न प्रतिहतानि** – सागरोपमकोटाकोट्यन्तःप्रवेशनेन सम्यक्त्वलाभतः, **न च प्रत्याख्यातानि** – सागरोपमकोटाकोट्या सङ्ख्यातसागरोपमैर्न्यूनताकरणेन सर्वविरतिलाभतः **पापकर्माणि** ज्ञानावरणादीनि यैस्ते – **अप्रतिहतप्रत्याख्यातपापकर्माणः**, मनुष्या **अदत्तमि**त्यादि प्राग्वत्।

**एवमेव तेऽसंयताः** – इन्द्रियनिग्रहादिवर्जिताः, **अविरता अप्रतिहतप्रत्याख्यातपापकर्माणः**, **सक्रियाः** – परद्रोहादि-चेष्टासहिताः, अत ए**वासंवृताः** – अनिरुद्धकर्माश्रवद्वाराः, अत ए**वैकान्तदण्डाः**, एकान्तिकजीवदण्डनप्रकृतयः, अत्यन्तं निस्त्रिंशा इति भावः। यत **एकान्तबालाः** – सज्ज्ञानलवेनापि वर्जित-तयाऽज्ञाः, ते **बहु** – प्रभूतम्, **पापं कर्म कलिकलुषम्** – कलहहेतुकलुषम्[2], **समर्ज्य** – निकाचनादिनात्मीकृत्य **इतो** भवाच्च्यु**ताः** सन्तः **दुर्गतिगामिनो भवन्ति**, सर्वकर्मणाम-दृष्टैकान्तफलत्वात्। **एहि हारीत ! आजानीहि** – इति प्राग्वत्। एतत्प्रतिपक्षमाह –

**जे खलु आरिया पावेहिं कम्मेहिं विप्पमुक्का ते खलु**

१. ध - मीसियं। २. विपाकश्रुते।।१-१।।

**गब्भवासाहि णो सज्जंति, ते णो सयमेव पाणे अतिवातिंति, एवं तधेव विवरीतं जाव अकिरिया संवुडा एकंतपंडिता ववगतराग-दोसा तिगुत्तिगुत्ता तिदंडोवरता णीसल्ला आयरक्खी ववगय-चउक्कसाया चउविकहविवज्जिता पंचमहव्वय-तिग्गुत्ता, पंचिंदियसुसंवुडा छज्जीवणिकायसुट्ठु-णिरता सत्तभयविप्पमुक्का अट्ठमयट्ठाणजढा णवबंभचेरगुत्ता दससमाहिट्ठाणसंपयुत्ता बहुं पावकम्मं कलिकलुसं खवइत्ता इतो चुया सोग्गतिगामिणो भवंति।।२५-२।।**

**ये खलु, आराद्या**ता पापहेतुभ्य **आर्याः**, अत एव **पापैः कर्मभिर्वि**शेषेण - त्रिकरणशुद्ध्या, **प्र**कर्षतः - योगत्रयादपि, **मुक्ताः** - वर्जितास्**ते खलु गर्भवासे न सजन्ति**। **ते न स्वयमेव प्राणानतिपतन्ति, एवं तथैव** पूर्वोक्तप्रकारेणैव **विपरीतम्** - नञ्सहितम्, **यावत् अक्रियाः संवृताः**, पण्डा - तत्त्वानुसारिणी बुद्धिः, सा सञ्जातैषामिति **पण्डिताः**, ते च मिथ्यात्वलक्षणा-ज्ञानलेशेनाप्यकलङ्कितत्वेनै**कान्तपण्डिताः**। अत एवा**पगत-रागद्वेषाः** - स्थितप्रज्ञत्वेन भावमौनसम्पन्नाः, अन्वाह - न प्रहृष्येत्प्रियं प्राप्य, नोद्विजेत् प्राप्य चाप्रियम्। स्थिरबुद्धिरसम्मूढो ब्रह्मविद् ब्रह्मणि स्थितः - इति[1]।

अत एव - **त्रिगुप्तयः** - अप्रशस्तमनोवाक्कायानां संवृतयः,

१. भगवद्गीतायाम्।।५-२०।।

Ashopnisad_2.p65
2nd Proof



ताभि**र्गुप्ताः** - संवृताः - **त्रिगुप्तिगुप्ताः**। अत एव - दण्ड्यते-नारकादियातनाविषयीक्रियते जन्तुर्येन सः - **दण्डः** - दुष्टप्रवृत्तिः, स च मनोवचनवपुःसम्बन्धितया त्रिविधः, तत्सकाशा**दुपरताः** - निवृत्ताः - **त्रिदण्डोपरताः**। तथा **निःशल्याः** - प्राक्कृतदण्डा-नामालोचनादिना कृतशल्योद्धाराः, मायानिदानमिथ्यात्वशल्यवि-प्रमुक्ता वा। **आत्मरक्षिणः** - सुसमाहितेन्द्रियाः, इन्द्रिय-समाधेरेवात्मरक्षोपायत्वात्, यदागमः - अप्पा खलु सययं रक्खियव्वो, सव्विंदिएहिं सुसमाहिएहिं - इति[1]। **अपगत-चतुष्कषायाः** - निगृहीतक्रोधाद्युदयाः, **चतुर्विकथाः** - राज-भक्त-देश-स्त्रीकथालक्षणाः, विकथात्वं चासां संयमविरुद्ध-कथाभावात्, ताभि**र्विवर्जिताः** - स्वप्नेऽपि तद्योगविमुक्ताः, पञ्चमहाव्रतैस्त्रिगुप्ताः - **पञ्चमहाव्रतत्रिगुप्ताः**, कथञ्चित् प्राणातिपातादिविरमण एव मनोगुप्त्याद्यन्तर्भावात्।

तथा **पञ्चेन्द्रियसुसंवृताः** - सम्प्रत्याहृतस्पार्शनादिकरणाः, विशेषणपरनिपातः प्राकृतत्वात्, **षड्जीवनिकायः** - पृथिव्यादि-जीवसङ्घातः, तस्य यतनायां **सुष्ठु** - सङ्घट्टपरितापोपद्रवादि-सर्वोपाधिशुद्ध्या **निरताः** - तत्पराः। अत एव - **सप्तभयविप्रमुक्ताः**, चारित्रपरिणत्या तल्लेशस्याप्यस्पर्शनात्, यदाह - चित्ते परिणतं यस्य, चारित्रमकुतोभयम्। अखण्ड-ज्ञानराज्यस्य, तस्य साधोः कुतो भयम् ?- इति[2]। भयसप्तकं चेदम् - इहलोकभयम्, परलोकभयम्, आदानभयम्, अकस्माद्भयम्,

१. दशवैकालिके।।चू-२।। २. ज्ञानसारे।।१७-८।।

आजीविकाभयम्, अश्लोकभयम्, मरणभयं चेति।

तथा**ऽष्टमदस्थानत्यक्ताः** – समुत्सृष्टजात्यादिगर्वपदाः, विशेषणपरनिपातः प्राकृतत्वात्, जात्यादयः – जातिलाभ-कुलैश्वर्यबलरूपतपःश्रुतरूपाः। तन्निमित्तगर्वविमुक्तता परमबोधा-वाप्तेः, यदाह – 'अहं'भावोदयाभावो, बोधस्य परमावधिः – इति[1]।

तथा **नवब्रह्मचर्यगुप्ताः** – नव ब्रह्मचर्यस्य गुप्तयः स्त्र्याद्य-संसक्तवसत्यादयः प्रसिद्धाः, ताभिः गुप्ताः – विहितब्रह्मरक्षणाः। तथा – समाधानं **समाधिः** समता सामान्यतो रागाद्यभाव इत्यर्थः, स चोपाधिभेदाद्दशधा, यदागमः – दसविहा समाही पण्णत्ता, तं जहा – पाणाइवायवेरमणे मुसावायवेरमणे अदिण्णादाणवेरमणे मेहुणवेरमणे परिग्गहवेरमणे इरियासमिई भासासमिई एसणासमिई आयाणउच्चारपासवणखेलसिंघाणगपारिट्ठावणियासमिई – इति[2]। एवं दशविधसमाधयः, तेषु स्थानम् – बद्धावस्थितिता, तेन **सम्यक्** – परिपूर्णाचारपूर्वकम्, **प्रकर्षेण** सदध्यवसायोत्कर्षेण **युक्ताः** – सहिताः – सम्प्रयुक्ताः – **दशसमाधिस्थानसम्प्रयुक्ताः**।

त एवम्भूता **बहु पापकर्म कलिकलुषं क्षपयित्वा इतः** – इहलोकात्, **च्युताः** सन्तः **सद्गतिगामिनो भवन्ति**, सव्वं सुचिण्णं सफलं नराणं – इति वचनात्[3]। तेषामेव विशेष-वक्तव्यतामाह –

---

१. (जैनेतरायाम्) अध्यात्मोपनिषदि ।।४१।। २. स्थानाङ्गे ।।१०-३।।

३. उत्तराध्ययने ।।१३-१०।।

Ashopnisad_2.p65
2nd Proof



**ते णं भगवं ! सुत्तमग्गाणुसारी खीणकसाया दंतेंदिया सरीरसाधारणट्ठा जोगसंधाणताए णवकोडीपरिसुद्धं दसदोसविप्पमुक्कं उग्गमुप्पायणासुद्धं इतराइतरेहिं कुलेहिं परकडं परिणिट्ठितं विगतिंगालं विगतधूमं पिंडं सेज्जं उवधिं च गवेसमाणा संगत-विणयोवयारसालिणीओ कल-मधुर-रिभित-भासिणीओ संगत-गतहसित-भणित-सुंदरथण-जहणपडिरूवाओ इत्थियाओ पासित्ता णो मणसा वि पाउब्भावं गच्छंति ।।२५-३।।**

**ते** – आर्यत्वाद्युक्तविशेषणविशिष्टा महात्मानः, **णं** – वाक्यालङ्कारे, **भगवन्** ! – हे प्रत्येकबुद्धत्वैश्वर्यसम्पन्न ! – अम्बडपरिव्राजकमुद्दिश्यामन्त्रणमिदम्। **सूत्रम्** – जिनागमः, तन्निर्दिष्टो **मार्गः** – मुक्तिपदवी, तद**नुसारिणः** – प्रगुणतया तमेवानुसृत्य गमनकर्तारः – **सूत्रमार्गानुसारिणः**, **क्षीणकषायाः** – प्रहीणस्वजन्यविकारजननशक्तयः क्रोधादयः, तत्क्षयश्चात्र तन्निग्रहप्रयुक्तोदयनिरोधेण द्रष्टव्यः, उक्तं च – कोहविजएणं भंते ! जीवे किं जणयइ ? कोहविजएणं खंतिं जणयइ, कोहवेयणिज्जं कम्मं न बंधइ, पुव्वबद्धं च निज्जरेइ – इति[1]। **दान्तेद्रियाः** – स्वस्वविषयानुधावनप्रवृत्तेष्विन्द्रियेषु कृतप्रत्याहाराः।

एषां निरवद्यां जीविकां नीरागचित्ततां च व्याचष्टे – **शरीरस्य सम्यक्** – आवश्यकापरिहाणि यथा स्यात्तथा, **धारणम्** –

---

१. उत्तराध्ययने ।।२९-६७।।

निर्वाहः, **तदर्थम्** – तत्प्रयोजनेन – **शरीरसंधारणार्थम्**। एतदेव प्रकारान्तरेणाह – **योगः** – मोक्षयोजनव्यापारः, ज्ञानाद्यारा-धनेत्यर्थः। तस्य **सन्धानम्** – आत्मन्यनुवेधः, तस्य भावः **योगसन्धानता**, तस्यै – **योगसन्धानतायै**। **नव कोटयः** – शुद्धिप्रकाराः, ते चैवम् – ण हणइ ण हणावेइ हणंतं णाणुजाणइ, ण पतति, ण पतावेति पतंतं णाणुजाणति, न किणति ण किणावेति किणंतं णाणुजाणति – इति[1]। तैः सर्वैरपि शुद्धम् – **नवकोटिपरिशुद्धम्**, पिण्डादि गवेषयमाणा इत्यग्रे योगः। **दश** शङ्कितादय एषणासम्बन्धिनो **दोषाः**, तैर्**विप्रमुक्तम्** – वर्जितम्, **दशदोषविप्रमुक्तम्**, **उद्गमः** – आधाकर्मादिः षोडशविधः, **उत्पादना** च धात्रीदूत्यादिका षोडशविधैव, एतदन्तर्गत-दोषमुक्ततया शुद्धम् – **उद्गमोत्पादनाशुद्धम्**, **इतरेतरैः कुलैः** – अन्यान्यैर्गृहैः, एतेनैकपिण्डस्य नियतपिण्डस्य च प्रतिषेध उक्तः, सामुदानिकं पिण्डादि गवेषयन्त इति तात्पर्यम्।

**परः** – गृही, तेनात्मार्थं **कृतम्** – निष्पादनायारब्धम्, परार्थमेव **परिनिष्ठितम्** – सिद्धिं प्राप्तम्, अन्तरा श्रमणार्थाधिक-प्रक्षेपादिना मिश्रजातादिदोषैरदुष्टमिति हृदयम्। यद्वा द्विचत्वारिंश-द्दोषनिकुरम्बसम्परिहारेण पूर्णशुद्धिं प्राप्तम् – **परिनिष्ठितम्**।

साम्प्रतं ग्रासैषणादोषविरहमाख्याति– **विगतेङ्गालम्** – रागोदयमन्तरेण परिभुक्तम्, **विगतधूमम्** – द्वेषोदयं विनैवोपभुक्तम्, किमित्याह– **पिण्डः** – संयमयात्रोपयोगि पृथिव्यादिद्रव्यम्, **शय्या**

१. स्थानाङ्गे।।९-३।। ६८१।।

Ashopnisad_2.p65
2nd Proof



– वसतिः, **उपधिः** – वस्त्रपात्रादि, **च**कारेणान्यदपि तथावि-धमागमानुज्ञातं वस्तु समुच्चितं द्रष्टव्यम्। एतान् **गवेषयन्तः** **सङ्गतः** – विचक्षणवनिताऽनुरूपः, **विनयोपचारः** – अभ्युत्था-नादियोगः – **सङ्गतविनयोपचारः**, तेन शालन्त इति **सङ्गत-विनयोपचारशालिन्यः**, **कलम्** – सुन्दरम्, **मधुरम्** – श्रुतिमात्रजनिताह्लादम्, **रिभितम्** स्वरघोलनासंवलितम्, ईदृग् वचनं भाषन्त इति **कलमधुररिभितभाषिण्यः**, सम्यक् – मनोज्ञतया गम्यत इति **सङ्गतम्**, सङ्गतं **गतम्** – हंसादिसदृशा गतिर्यासां ताः – **सङ्गतगताः**, एवं **सङ्गतहसिताः सङ्गत-भणिताश्च**। तथा नन्दयन्ति कामिनः पुरुषानिति **सुन्दराणि**, सुन्दरैः **स्तनजघनैः प्रतिरूपाः** – कमनीयाः **सुन्दरस्तनजघनप्रतिरूपाः**, ततः पूर्वेण कर्मधारयः। यद्वा सङ्गतगतहसितभणितैः सुन्दरस्त-नजघनैश्च प्रतिरूपा इति विग्रहः कार्यः।।

एवम्भूताः **स्त्रियो दृष्ट्वा** – चक्षुर्विषयीभूततयाऽशक्या-दर्शनत्वेन क्षणार्धमवलोक्य, **न मनसापि** – चित्तेनापि, आस्तां कायेनेत्यपिशब्दार्थः, **प्रादुर्भावम्** – वेदोदयम्, **गच्छन्ति**। तदवलोकनं प्रायो भिक्षाचर्यायां सम्भवतीतीत्थमुपन्यासः।

वेदोदयस्त्वा नवमगुणस्थानकं सम्भवतीत्युक्तग्रन्थविषयो वीतराग एव कश्चित् स्यादित्याशङ्कायामुत्तरयति –

**से कधमेतं विगतरागता ? सरागस्स वि य णं अविक्खहित[1]मोहस्स तत्थ तत्थ इतराइतरेसु कुलेसु**

१. क-द-ढ-ध-न-प- अविक्खहित। ख-ज-ठ-ध- अविक्खहिता। ग-च- अविक्खहत। घ-झ-छ-त- अविक्खहत। ट- अविक्खहित्ता।

**परकडं जाव रूवाइं पासित्ता णो मणसा वि पादुब्भावो भवति।।२५-४।।**

**अथ कथमेषा विगतरागता** प्रव्रजितमात्रस्यानवाप्त-वीतरागभावस्य सम्भवतीति चेत् ? न, **सरागस्यापि च** - छद्मस्थस्यापि च, अपि च इत्यनेन वीतरागस्य तु सुतरामप्रादुर्भाव इत्यावेदितम्। **णं** - वाक्यालङ्कारे, **अपेक्षा** - मुक्तिलिप्सा, तया **हृतः** - निष्कासितः, **मोहो** यस्य स - **अपेक्षाहृतमोहः**, मुमुक्षुतया क्षीणोत्थानशक्तिकमोह इत्यर्थः, तस्य **तत्र तत्रे**त्यादि प्राग्वत्। यद्वाऽ**पक**कृष्टत्वेन जघन्यत्वे**नेक्षणम्** - **अपेक्षा**, तया **हृतो मोहो** यस्येत्य**पेक्षाहृतमोहः**, यदाह - न मूत्रविष्टापिठरीषु रागं, बध्नन्ति कान्तासु समाधिशान्ताः। अनङ्गकीटालयतत्प्रसङ्गम - ब्रह्मदौर्गन्ध्यभयास्त्यजन्ति - इति[1]। शेषं प्राग्वत्। **तं कहमिति** ? - **तद**पि - मोहापहरणम्, **कथमिती**दानीमपि ममारेका, अत्र दृष्टान्तेनैव प्रतिविधत्ते -

**मूलघाते हतो रुक्खो, पुप्फघाते हतं फलं।**
**छिण्णाए मुद्धसूईए, कतो तालस्स रोहणं ?।।२५-५।।**

**मूलस्य घाते** कृते सति **वृक्षो हत** एव, तद्विना-शानुविनश्वरत्वात्तस्य। **पुष्पघाते फलं हत**मेव, तदुद्गमस्यैव समुच्छेदात्। **मूर्धसूच्यां छिन्नायां** सत्यां **तालस्य रोहणं कुतः** ? नैव तद्रोहणं सम्भवति, मूर्धसूचिछेदानन्तरमेव तद्विनाशभावात्[2]।

१. समाधिसाम्यद्वात्रिंशिकायाम्।।१५।।
२. प्राग्व्याख्यातमिदं वृत्तम्, ऋषिभाषिते।।१५-१०।।

Ashopnisad_2.p65
2nd Proof



एवमाज्ञायोगखड्गप्रहारजर्जरितो मृतप्रायो मोहो यद्यपि विद्यमानः, तथापि हत एवेत्यत्रोपनयः सुगमः।

आज्ञायोगोऽप्यतीव दुरनुष्ठेय इत्याह- **से कधमेतं ? अथ कथमेतदा**ज्ञायोगानुष्ठानमेव सम्भवति ? सुदुस्त्यजत्वात्कामा-नामित्यत्राह -

**हत्थिमहरुक्खणिदरिसणं, तेल्लपाउधम्मं[1] किंपाग-फलणिदरिसणं। से जधाणामते साकडिए अक्खं मक्खेज्जा ''एस मे णो भज्जिस्सति भारं च मे वहिस्सति', एवामेवोवमाए समणे णिग्गंथे छहिं ठाणेहि आहारं आहारेमाणे णो अतिक्कमेति, वेदणा-वेयावच्चे० तं चेव। से जधाणामते जतुकारए इंगालेसु अगणिकायं णिसिरेज्जा ''एस मे अगणिकाए णो विज्झाहिति जतुं च तावेस्सामि,' एवामेवोवमाए समणे णिग्गंथे छहिं ठाणेहिं आहारं आहारेमाणे णो अतिक्कमेति, वेदणा-वेयावच्चे० तं चेव। से जधाणामते उसुकारए तुसेहिं अगणिकायं णिसिरेज्जा ''एस मे अगणिकाए णो विज्झातिस्सति उसुं च तावेस्सामि', एवामेवोवमाए समणे णिग्गंथे०, सेसं तं चेव।।२५-६।।**

**हस्तिमहावृक्षनिदर्शनम्** - गजप्रयोगकम्प्रविशालपादप-

१. क- तेल्लपाउधमा। ख-ज-ठ-थ-न- तेल्लपाउधमं। ग-घ-च-झ-त- तेल्लापाउधम्मं। ट.ढ. - तेल्लपाउधमं। ध-प- तेल्लपाउधम्मं।

दृष्टान्तमत्र बोध्यम्, तच्च मधुबिन्दुरसास्वादलोलुपतया गजाजगरमधुमक्षिकादंशादिदुःखोपेक्षाकारिमनुष्योदाहरणं सम्भाव्यते, अत्र विस्तरार्थः प्रसिद्ध एव। तदेतन्निदर्शनेन–हा विसमा हा विसमा, विसया जीवाण जेहि पडिबद्धा। हिंडंति भवसमुद्दे, अणंतदुक्खाइं पावंता– [1]इत्यादिभावनया कामनिकारेणाज्ञायोगः सुकर एवेति भावः।

यद्वा कथमनादिकालीनमोहस्याज्ञायोगेन विघात इत्यत्राह– **हस्तिमहावृक्षनिदर्शनम्,** यथा ह्यनेकशतवर्षप्राचीनमपि विशालं विटपिनं कुञ्जर उन्मूलयितुं शक्तः, एवमाज्ञायोगो विद्यमानस्यातिभैरवस्यापि कर्मण उदयनिरोधे प्रत्यलः, एतच्च **णो मणसा वि पादुब्भावो भवति** – [2]इत्यनेन साक्षादुक्तमेव। तदाहुराचार्याः– परिसुद्धाणाजोगा, पाएणं आयचित्तजुत्ताणं। अइरोद्दं पि हु कम्मं, ण फलइ तहभावओ चेव – इति[3]।

तथा **तैलपात्रधर्मम्** – तैलेनात्यन्तं भृतं पात्रं हस्ते धृतं प्रमादलेशेनापि बिन्दुमुज्झतीत्येवम्भूतं तत्स्वभावं विचिन्त्याज्ञायोगानुष्ठानं सुकरम्। तैलपात्रधरदृष्टान्तं सुप्रसिद्धम्, यथा तेन मरणभयेन कामत्यागः कृतः, अत्यन्तं दुष्करमप्यनुष्ठितम्, तथा प्रकृतेऽपि बोध्यमित्याशयेन तैलपात्रधर्ममितिमात्रेणातिदेशः कृतः।

तथा **किम्पाकफलनिदर्शनम्** – जहा य किंपागफला मणोरमा, रसेण वन्नेण य भुंजमाणा। ते खुड्डए जीविय पच्चमाणा,

१. इन्द्रियपराजयशतके ।।८४।। २. ऋषिभाषिते ।।२५-४।।
३. उपदेशपदे ।।३२३।।

Ashopnisad_2.p65
2nd Proof



एओवमा कामगुणा विवागे – इति[1]। तदेतन्निदर्शननिकरेण भावितात्मनां न किञ्चिद्दुष्करम्।

स्यादेतत्, उक्तरीत्यैषां कामत्यागेनाहारोऽपि त्याज्यः, अन्यथा रसास्वादलाम्पट्येन कामहानस्य नामशेषीभवनादिति दृश्यमानमुमुक्षूणामेवानुपपत्तिर्दम्भमात्रं वेति चेत् ? न, अरक्तद्विष्टभावेन संयमयात्रानिर्वाहमात्रमेव तैरभ्यवहरणात्, अत्रैव निदर्शनान्याह – **स यथानामकः शाकटिकः** – शकटेन – गन्त्र्या चरणकर्ता, **अक्षम्** – रथावयवविशेषम्, **म्रक्षेत्** – तैलाभ्यङ्गनं कुर्यात्। किं सम्प्रधार्येत्याह– **एष मे न भङ्क्ष्यति** – आमर्दनं प्राप्स्यति, म्रक्षणानुभावेन, **भारं च मे** धान्यादिभारितशकटस्य **वहिष्यती**ति। न चास्याक्षम्रक्षणविधावभिष्वङ्गः, उक्तरीत्या सप्रयोजनत्वेन मात्रयैवाभ्यञ्जनकरणात्।

**एवमेवोपमया श्रमणः** – तपोधनः, श्राम्यति तपसेति निरुक्तेः, श्रमु खेदे तपसि च। द्रव्यभावग्रन्थान्निष्क्रान्तः – **निर्ग्रन्थः,** स **षड्भिः स्थानैः** पुष्टालम्बनै**राहारमाहारयन्**– उद्गमादिदोषवर्जितं भक्तमिङ्गालादिदोषपरिहारेणाभ्यवहरन् **नातिक्रामति** कामत्यागिमर्यादाम्, जिनाज्ञां वा। एवमाहारयनप्यसौ कामत्याग्येवेत्यभिप्रायः, आज्ञायोगाराधनाच्च, यदाज्ञा – व्रणलेपाक्षोपाङ्गवदसङ्गयोगभरमात्रयात्रार्थम्। पन्नग इवाभ्यवहरेदाहारं पुत्रपलवच्च – इति[2]। तद्रीत्याऽऽहारोऽपि कारणषट्कोपस्थितावित्युक्तमिति तान्येवाचष्टे – **वेदना** – क्षुत्पीडा, **वैयावृत्यम्** – ग्लानादि–

१. इन्द्रियपराजयशतके ।।१४।। २. प्रशमरतौ ।।१३५।।

परिचर्या, **तदेव** – आगमप्रसिद्धं वृत्तमत्रानुसन्धेयमित्यतिदेशः, तदार्षम् – वेयणवेयावच्चे, ईरियट्ठाए संजमट्ठाए। तह पाणवत्तियाए, छट्ठं पुण धम्मचिंताए – इति[1]। अत्र निर्युक्तिः – नत्थि छुहाए सरिसा वियणा भुंजेज्ज तप्पसमणट्ठा। छाओ वेयावच्चं ण तरइ काउं अओ भुंजे। इरिअं न वि सोहेई पेहाईअं च संजमं काउं। थामो[2] वा परिहायइ गुणऽणुप्पेहासु अ असत्तो– इति[3]। अत्र वृत्तिलेशः – नास्ति क्षुधा – बुभुक्षया, सदृशी वेदना, उक्तं च – पंथसमा नत्थि जरा, दारिद्दसमो य परिभवो नत्थि। मरणसमं नत्थि भयं, छुहासमा वेयणा नत्थि।। तं नत्थि जं न बाहइ, तिलतुसमित्तं पि एत्थ कायस्स। सन्निज्झं सव्वदुहाइ, देंति आहाररहियस्स।। ततः तत्प्रशमनार्थम् – क्षुद्वेदनोपशमार्थं भुञ्जीत, तथा छातो– बुभुक्षितः सन् वैयावृत्यं न शक्नोति कर्तुम्, तथा चोक्तम् – गलइ बलं उच्छाहो, अवेइ सिढिलेइ सयलवावारे। नासइ सत्तं अरई, विवड्ढए असणरहियस्स – अतो वैयावृत्यकरणाय भुञ्जीत – इति[4]। शिष्टं स्पष्टम्।

निदर्शनान्तरमाह – **स यथानामको जतुकारकः**–लाक्षाकृत्, **अङ्गारेष्वग्निकायम्** – हुताशं **निसृजेत्** – अरण्यादिनोत्पाद्य सङ्क्रमयेत्। किं सम्प्रधार्येत्याह– **एष मेऽग्निकायो न विध्यायिष्यति** – इन्धनानुभावेन न निर्वाणतामुपयास्यति, **जतुं च** – लाक्षां च, **तापयिष्यामि** – मदभीष्टाकारनिष्पत्त्यनुगुण– तयोष्णीकरिष्यामि। **एव**मित्यादि प्राग्वत्।

१. स्थानाङ्गे।।६-३।।५००।। उत्तराध्ययने।।२६-३२।। पिण्डनिर्युक्तौ।।६६२।।
२. स्थाम बलं प्राण इत्येकोऽर्थः। ३. पिण्डनिर्युक्तौ।।६६३-६६४।।
४. पिण्डनिर्युक्तौ।।६६३-६६४।। वृत्तौ।

Ashopnisad_2.p65
2nd Proof



दृष्टान्तान्तरमाह – **स यथानामकः**, **इषुः** – बाणः, **तत्कारकस्तुषैः** – तृणविशेषैर**ग्निकायं निसृजेदि**त्यादि पूर्ववत्। **इषुं च तापयिष्यामि** इषुसत्कलौहभागं तापनेन यथोचितसन्धानाद्यर्हं करिष्यामीति भावः। **एव**मित्यादि प्राग्वत्। पर्यवसितमाह –

**एवं से सिद्धे बुद्धे विरए विपावे दंते दविए अलंताती**
**णो पुणरवि इच्चत्थं हव्वमागच्छति त्ति बेमि।।**

**एवम्** – आज्ञायोगानतिक्रमेण, **सः** – श्रमणो निर्ग्रन्थः, **सिद्ध** इत्यादि प्राग्वत्। इति पञ्चविंशतितमेऽम्बडाध्ययन आर्षोपनिषद्।

### ।। अथ षड्विंशतितमोऽध्यायः।।

अनन्तराध्ययने श्रमणानां सर्वथा निरवद्या जीविकोक्ता, अतस्त एव परमार्थेन ब्राह्मणाः, **मा** – नैव **हन्ति** – परितापनादिविषयीकुर्वन्ति प्राणिनः – **माहना** इति निरुक्तियोगात्, ततोऽत्र जातिमदं परिहृत्य भावब्राह्मण्यसम्पादनायैवोपदेशमाह–

**''कतरे धम्मे पण्णत्ते ?, सव्वाउसो ! सुणेध मे।**
**कि[1]ण्णा बंभणवण्णाभा, युद्धं सिक्खंति माहणा।।**
**।।२६–१।।**

**कतरः** – किंस्वरूपः, **धर्मः** – ब्राह्मणत्वसमुचिताचारः, **प्रज्ञप्तः** – सर्वज्ञैः प्रतिपादितः, तदहं निवेदयामि, हे **सर्वेऽ– प्यायुष्मन्तः ! मम** निवेदयतस्तद्वक्तव्यं **शृणुत**। **कथं ब्राह्मणवर्णः** – भरतचक्रवर्त्तिस्थापिता माहनाभिधा जातिः, श्रावकनिकर इत्यर्थः, **तदाभा** – तन्नाममात्रसादृश्यभाजः, सान्वर्थताविरहात्,

१. घ-झ-त-थ-ट- किणा। न- किंण्णा।

**माहनाः** - साम्प्रतकालीया धिग्जातीयाः, **युद्धम्** - सङ्ग्रामम्, **शिक्षन्ति** - धनुर्विद्याद्यध्ययनं कुर्वन्ति ? माहनस्य युद्धशिक्षा माता च वन्ध्या चेतिवद्व्याहतेति प्रश्नतात्पर्यम्। यतः-

**रायाणो वणिया जागे, म[1](मा)हणा सत्थजीविणो।**
**अंधेण जुगे णद्धे विपल्लत्थे उत्तराधरे।।२६-२।।**

**राजानः** - नृपाः, ते च प्रायः क्षत्रिया एव भवन्तीति तदुपन्यासः, **वणिजः** - व्यवहारिणः, वैश्यकुला इति तात्पर्यम्। ते **यागे** - यज्ञकर्मणि प्रवृत्ताः। **माहनाश्च** - ब्राह्मणाः **शस्त्रजीविनः** - खड्गादिप्रहरणधारणतत्प्रयोगकृतप्राणधारणाः। त्रयाणामपि स्वाचारविरुद्धमिदं वृत्तमत्यन्तमसमञ्जसमित्यत्रोदाहरणमाह- **अन्धेन** - नष्टलोचनयुगलेन **युक्तः** - सहितः, युद्धकर्मण्ययं मम सहाय इति सम्प्रधार्य प्रगल्भतया **नद्धः** - कवचितः, तमेव विशेषयति - **उत्तरम्** - अधिकम्, **अहर** इति देश्यशब्दोऽसमर्थवाची, ततोऽत्यन्तमशक्त इत्यर्थः, स यथाऽन्धसहायो युद्धाय प्रागल्भ्यमवलम्बमानो **विपर्यस्तः** - शक्यादिविचारे स्वौचित्यचिन्तने निजहितविषये च नितरां विपर्यासं प्राप्तः, तथा प्रकृतेऽपि द्रष्टव्यम्। यद्येवं विपर्यासः स्यात्, युद्धौत्सुक्यं चानल्पं वर्तते, तर्हि किं कर्तव्यमित्यत्राह -

**आरूढा[2](ढो) रायरहं अडणीए युद्धमारं[3]भे।**

१. क-ख-ज-ट-ठ-ढ-थ-ध-न-प- महणा। ग-घ-च-त- माहणा। २. क-द-ढ-ध-न-प- आरूढा रायहं। ख-ग-च-ज-ट-ठ-थ- आरूढा रायरहं। घ-त-झ- आरूढो रायरहं। ३. क-ग-घ-च-ज-ट-ठ-ढ-त-ध-न-प- मारभे। ख-थ - मारंभे।





**[1]धम्माइं[2] पिणिद्धंति विवेता [3]बम्हपहुणेय।।२६-३।।**

**राजरथम्** - श्रेष्ठं[4] पवित्रं वा स्यन्दनम्, पूर्वोक्तं[5] शीलाक्षज्ञानदर्शनसारथिकमध्यात्मरथमित्यर्थः। **आरूढः** - अभिविधिना कृतव्यवस्थितिः, **अडणी**-देश्यशब्दोऽयं मार्गपर्यायः, ततो मार्गे शिवपुराध्वनीत्यर्थः। स्वशरीरेणैव विषयसुखपिपासुना स्वैरिणा सार्धं **युद्धम्** - सङ्ग्रामम्, **आरभेत** - सत्त्वप्रकर्षेणोपक्रमेत्, इमेण चेव जुज्झाहि किं ते जुज्झेण बज्झओ ? जुद्धारिहं खलु दुल्लहं - [6]इत्याद्यागमवचनमनुस्मरन्।

किमत्र प्रतिपक्षप्रहरणप्रतिरोधाय कवचं स्यादित्याह - **धर्माः** - क्षमादयः, **विवेक्ता** - लुप्तद्वितीयान्तत्वाद् **विवेक्तारम्** - देहात्मभेदविज्ञानसम्पन्नम्, **ब्रह्मप्रभुः** - विशुद्धशीलस्वामी, गुरुगुणयुक्तो गुरुरित्यर्थः, तेन **नेयः** - प्रज्ञापनीयतया प्रणेयः, एतेनास्य गीतार्थनिश्रिततया शुद्धचारित्रितोदिता, अत्रापि लुप्तद्वितीयान्तत्वम्, ब्रह्मप्रभुप्रणेयमिति, **पिणिद्धंति** - सहनशीलतादिलक्षणं कवचं परिधापयन्ति। बाह्यसङ्ग्रामप्रवृत्तौ त्वस्य ब्राह्मणत्वायोग इत्याह -

१. ख-ज-ठ-थ-ध- भे। धंमाइ। च-ग-घ-झ-त- सधामाइं। ढ- धम्माइ। ट-न-प- धमाइं। २. धर्मपदं प्राकृत उभयलिङ्गमिति मूले ‘धम्माइं’ पदम्। ३. द-ख-ज- बम्हपहुणेय। क- बम्हपहुणाय। ग- बम्हपाहुणे। ध-झ-त- बम्भपालणा। च- बम्भपालने। ट-ठ-ढ-ध-न-प- वंम्हपहुणेय। द- बम्हपालणे। सम्भाव्यतेऽत्र लिपिदोषः, हस्तादर्शपाठेष्वर्थस्य दुःसङ्गतेः, छन्दोभङ्गाच्चेति विचार्यं बहुश्रुतैः। ४. पाइयसद्दमहण्णवो।।पृ.७१०।। ५. ऋषिभाषिते।।४-२५।। ६. आचाराङ्गे।।१-५-३।। १५३-१५४।।

**ण माहणे[1] धणुरहे[2], सत्थपाणी[3] ण माहणे।**
**ण माहणे[4] मुसं बूया, चोज्जं कुज्जा ण माहणे।।**
**।।२६-४।।**

**ब्राह्मणः** - सव्वमप्पे जिए जिअं - इति ज्ञानविभूषितः, ब्रह्म ज्ञानमणतीति ब्राह्मण इति निरुक्तेः। धनुश्च रथश्च यस्य सङ्ग्रामोद्यतस्य स **धनुरथः**, **न** - नैव सम्भवति, उक्त ब्राह्मणत्व सद्भावेऽस्य पराक्रमणाभियोगस्यैवासम्भवात्। अत एव **ब्राह्मणो माहनो** वा, शस्त्रं पाणौ यस्य स **शस्त्रपाणिः**, **न** - नैव सम्भवति, उक्तं च - यो न हन्ति न घातेति, तमहं ब्रूमि ब्राह्मणम् - इति[5]। तथा **ब्राह्मणो मृषाम्** - असत्यं, **न** - नैव **ब्रूयात्**, अन्यथा स्वरूपत्यागप्रसङ्गात्, तथा चागमः - कोहा वा जइ वा हासा, लोहा वा जइ वा भया। मुसं न वयइ जो उ, तं वयं बूम माहणं - इति[6]। अन्यत्रापि - यम्हि सच्चं च धम्मो च, सो सुची सो च ब्राह्मणो - इति[7]। तथा **ब्राह्मणः**, **चौर्यम्** - स्तेयम्, **न** - नैव, **कुर्यात्**, चित्तमंतमचित्तं[8] वा, अप्पं वा जइ वा बहुं। न गिण्हाइ अदत्तं जो, तं वयं बूम माहणं[9] - इत्युक्तेः। तथा-

**मेहुणं तु न गच्छेज्जा, णेव गेण्हे परिग्गहं।**
**धम्मंगेहिं णिजुत्तेहिं, झाणज्झयणपरायणे।।२६-५।।**

१. ट-न- महणे धणुरह सत्थ। ठ-ध- महणे धणुरहे सत्थ। प- महाण धणुरह सत्थ। २. क- वणुवरे। ख-घ-च-ज-त-थ- धणुरहे। ग- धणुरह। ढ- वणुचरे। झ- धणुरहे (?हरे)। ३. क-ढ- सत्थु। ख-ग-घ-च-ज-त-थ- सत्थ। ४. ध-न-प- पणमाणे मुसं। ट-ण माणे सुसं। ५. सुत्तनिपाते।। पृ.५८।। ६. उत्तराध्ययने।।२५-२३।। ७. उदाने।।१-९।। ८. सचित्तमित्यर्थः। ९. उत्तराध्ययने।।२५-२५।।

Ashopnisad_2.p65
2nd Proof



**मैथुनं तु** - अब्रह्म **नैव गच्छेत्**, तुपदेनावधारणनियम उक्तः - निरपवादत्वादब्रह्मविरतेः। ब्राह्मण इति वर्तते, तथा चोक्तम् - दिव्वमाणुसतेरिच्छं, जो न सेवइ मेहुणं। मणसा कायवक्केणं, तं वयं बूम माहणं - इति[1]। अन्यत्रापि - ब्राह्मणो ब्रह्मचर्येण - इति[2]। स **परिग्रहम्** - मूर्च्छाम्, **नैव गृह्णीयात्** - आत्मनि परिणमयेत्, यदाह - जहा पोमं जले जायं, नोवलिप्पइ वारिणा। एवं अलित्तं कामेहिं, तं वयं बूम माहणं - इति[3]। तदाह - अहेरिव गणाद् भीतः, सौहित्यान्नरकादिव। कुणपादिव च स्त्रीभ्यस्तं देवा ब्राह्मणं विदुः[4]।। सर्वकामानवलिप्तो ब्राह्मण इति तात्पर्यम्।

एवं निषेधनिकुरम्बमुक्त्वा विधिमाह - **धर्माङ्गैः** - क्षान्त्यादिभिर्धर्मपुरुषावयवैः, **नियुक्तैः** - चन्दनगन्धवत्परिणतैः, क्षान्त्यादीनात्मनि नियोज्येत्याशयः, **ध्यानम्** - धर्मशुक्ललक्षणम्, **अध्ययनम्** - वाचनादिपञ्चविधः स्वाध्यायः, तयोः **परायणः** - तन्मयः, ब्राह्मणो भवतीति गम्यते, तदाह - सत्यं दानं क्षमा शीलमानृशंस्यं तपो घृणा। दृश्यते यत्र राजेन्द्र !, स ब्राह्मण इति स्मृतः - इति[5]। तथा - शमो दमस्तपः शौचं, सन्तोषः क्षान्तिरार्जवम्। मद्भक्तिश्च दया सत्यं, ब्रह्मप्रकृतयस्त्विमाः - इति[6]। तथा- शिखा ज्ञानमयी यस्य, उपवीतं च तन्मयं। ब्राह्मण्यं सकलं तस्य, इति वेदानुशासनम् - इति[7]। लक्षणान्तरमाह-

१. उत्तरा.।।२५-२६।। २. वेदाङ्कुश उद्धृतम्।।पृ.३३।। ३. उत्तराध्ययने ।।२५-२५।। ४. सन्यासगीतायाम्।।७७।। ५. महाभारते।।१८१-२१।। ६. भागवते।।११-१७-१६।। ७. शाट्यायनीयोपनिषदि।।७।।

**सव्विंदिएहिं गुत्तेहिं, सच्चप्पेही स माहणे।**

**सीलंगेहिं णिउत्तेहिं, सीलप्पेही स माहणे।।२६-६।।**

यः **सर्वेन्द्रियैः** - अशेषस्पार्शनादिकरणैः, **गुप्तैः** - स्वैर-विषयप्रचाराद्रक्षितैः, **सत्यम्** - सद्भ्यो हितम्, यत्किञ्चिदपि कल्याणनिबन्धनमेव सानुबन्धमनुष्ठानमित्यर्थः, तदेवोपादेयतया प्रेक्षितुं शीलमस्येति **सत्यप्रेक्षी, स ब्राह्मणः** - परमार्थब्राह्मण्य-सम्पन्नो भवति। यदुक्तम् - योगस्तपो दमो दानं, सत्यं शौचं दया श्रुतम्। विद्या विज्ञानमास्तिक्यमेतद् ब्राह्मणलक्षणम् - इति[१]।

तथा **शीलाङ्गैः** - आगमोदिताष्टादशसहस्रसङ्ख्यैः शीलावयवैः, तन्निष्पत्तिश्चैवम् - जोए करणे सण्णा, इंदिय-भूमादिसमणधम्मे य। सीलंगसहस्साणं, अट्ठारसगस्स णिप्फत्ती - इति[२]। अत्र प्रक्रिया - ण करेति मणेणाहारसण्णा विप्पजढगो उ णियमेण। सोइंदियसंवुडो पुढविकाय - आरंभ खंति जुओ - इति[३] शेषशीलाङ्गेषु दिक्।

तै**र्नियुक्तैः** - सन्ततमभ्यस्ततया वचनानुष्ठानविषयादसङ्गा-नुष्ठानविषयतां प्रापितैः शीलमेव जीविततया प्रेक्षितुं शीलमस्येति **शीलप्रेक्षी, स** एव **ब्राह्मणो** भवति। एतेन लक्षणलक्षितस्य शूद्रस्यापि ब्राह्मणत्वमुक्तम्, इतरस्य तु ततोऽप्यधमतैव, यदाह - शूद्रोऽपि शीलसम्पन्नो, गुणवान् ब्राह्मणो भवेत्। ब्राह्मणोऽपि क्रियाहीनः, शूद्रापत्यसमो भवेत्।। चतुर्वेद्यपि दुर्वृत्तः, शूद्रात्

१. वशिष्ठस्मृतौ।।१-६-२०।। २. पञ्चाशके।।१४-३।। ३. पञ्चाशके।।१४-६।।

Ashopnisad_2.p65
2nd Proof



पापतरः स्मृतः - इति[१]। प्रधानलक्षणमाख्यायोपसंहरति-

**छज्जीवकायहितए, सव्वसत्तदयावरे।**

**स माहणे त्ति वत्तव्वे, आता जस्स विसुज्झती।।२६-७।।**

**षड्जीवकायः** - पृथिव्यादिजीवसमूहः, तेषु **हितकः** - कृतमैत्रीभावः, अत एव **सर्वसत्त्वेषु** - कृत्स्नजीवेषु, **दया** - करुणा, तस्यां **परः** - तत्परः, तथा **यस्यात्मा विशुध्यति** - उत्तरोत्तरविशुद्धाध्यवसायपरिणत्या भावमलमुत्सृजति, **स** एव **ब्राह्मण इति वक्तव्यः**, नान्यः। तदस्य परमार्थब्राह्मणस्या-नुष्ठानमुपमाविशेषेण स्फुटयति-

**दिव्वं सो किसिं किसेज्जा णो वप्पिणेज्जा मातंगेणं**

**अरहता इसिणा बुइतं।।२६-८।।**

**सः** - ब्राह्मणः, **दिव्याम्** - लोकोत्तराम्, जघन्यतोऽपि स्वर्गप्रापिकां वा, **कृषिम्** - कर्षणं हलकर्मकरणमिति यावत्, **कृषेत्** - कुर्यात्, विशेषसमवधाने विशेषाणामपि सामान्या-भिधानतेति। **नो** - नैव, **अवार्पयेत्** - प्रकृतानुष्ठानखेदादिना दात्रे तत्प्रत्यर्पणं कुर्यात्, त्यजेदिति यावत्। यद्वा **न, वप्पिण** - देश्यशब्दः क्षेत्रपर्यायः, लुप्तद्वितीयान्तोऽयं शब्दः, लौकिक-कृषिभूमिमित्यर्थः, **अयेत्**[३] - गच्छेत्, प्रस्तुतप्रतिपक्षत्वात्, पापत्वाच्च तस्य, यदाहुः परेऽपि - हस्ततलप्रमाणां तु, यो भूमिं कर्षति द्विजः। नश्यते तस्य ब्रह्मत्वं, शूद्रत्वं त्वभिजायते - इति[४]।

१. इतिहासे। २. पञ्चाशके।।१४-६।। ३. वप्पिण + एज्जा (इं गतौ)।
४. पाराशरस्मृतौ।

अत एव कोषः – अनृतं कृषिः[१], न ऋतमनृतं पापकर्मत्वादिति[२]।

किमुपज्ञमिदमित्याह – **मातङ्गेनार्हतर्षिणोदितम्**। दिव्यां कृषिमेव तत्तत्कृषिसाधनोत्प्रेक्षया व्याख्याति –

**आता छेत्तं, तवो बीयं, संजमो जुअणंगलं।**
**झाणं फालो निसित्तो य, संवरो य बीयं दढं।।२६–९।।**

**आत्मा क्षेत्रम्, तपो बीजम्, संयमः** – पञ्चाश्रवविरमणपञ्चेन्द्रियनिग्रहकषायजयदण्डत्रयविरतिलक्षणः, स **युगलाङ्गले**, तत्र **युगम्** – वोढृस्कन्धकाष्ठम्, **लाङ्गलम्** – हलम्। **ध्यानम्** – धर्मशुक्ललक्षणम्, फलति निष्पद्यते कृषिरनेनेति **फालः** – कुशिकः, लोहकुशी – इति ख्यातः, तमेव विशेषयति– **निशितश्च** – तीक्ष्णः, **संवरः** – आश्रवनिरोधरूपः, **चः** – अप्यर्थः, **दृढम्** – अप्रतिहतसामर्थ्यम्, **बीजम्**। संवरोऽपि बीजमित्युक्त्या पुनरुक्तिः परिहृता। किञ्च –

**अकूडत्तं च कूडेसुं, विणए णियमेण[३] वि।**
**तितिक्खा या[४] हलीसा तु, दया गुत्ती य पग्गहा।।**
**।।२६–१०।।**

**कूटेषु** – क्षेत्रपक्षेऽसमतयोच्चप्रदेशेषु, आत्मपक्षे स्वस्मिन् वञ्चकेषु, **चः** – प्राग्वृत्तापेक्षया समुच्चये, **अकूटत्वम्** – क्षेत्रपक्षे – उच्चावचतावर्जितभावः, प्रस्तावात्तदापादनम्, मत्येन[५] समीकरणमिति यावत्। आत्मपक्षे सरलत्वम्, मायिष्वप्यमायित्वमित्यर्थः, न च 'व्रजन्ति ते मूढधियः पराभवं, भवन्ति मायाविषु ये न मायिनः'[१] इत्याद्युक्तेरनिष्टसाधनतयाऽस्य विधित्वासम्भव इति वाच्यम्, तस्य राजनीतिविषयतया प्रकृतेऽनुपयोगात्। **विनये** – क्षेत्रपक्षे हलस्य भूमिविलेखनानुगुणे सञ्चारणे, आत्मपक्षे ज्ञानादिविनये, **अपिः** – प्रगुणत्वादिस्थितोऽत्रापि तिष्ठेदित्यर्थद्योतकः, **नियमेन** – अवश्यमेव, विणओ गुणाण मूलं – इत्युक्तेस्तद्विरहे शेषगुणासम्भवप्रसक्त्या तत्र नियतावस्थानमुदितम्। **या तितिक्षा** – सहनशीलता, सा **तु हलेषा** – हलस्य ईषा – सीता दण्डपद्धतिरिति यावत्। **दया** – अनुकम्पा, **गुप्तिश्च** – मनोवाक्कायसंवररूपाः, **प्रग्रहाः** – सूर्यांशवः, ते चौषधिप्ररोहोपयोगिनः, यद्वा प्रगृह्यन्ते कर्षकैरिति **प्रग्रहाः** – खनित्रादयः। तथा –

१. अभिधानचिन्तामणौ।।८६६।। २. व्युत्पत्तिरत्नाकरे।।८६६।। ३. क-ढ-ण- णियमेण वि। प-ख-ज-ठ-थ-ध-न- णियमणे वि ते। ग-घ-झ-त- णियमणे ठिते। च- णियमेण ठिते। ट- णियमाण वि ते। ४. क-ख-ज-ट-ठ-ढ-ण-थ-न- या ह०। ग-घ-त-झ- य ह०। ध-प- गा ह०। ५. समार इति ख्यातेन।

Ashopnisad_2.p65
2nd Proof



**सम्मत्तं गोत्थणवो[२], समिती उ समिला तहा।**
**धितिजोत्तसुसंबद्धा, सव्वण्णुवयणे रया।।२६–११।।**

**सम्यक्त्वं गोक्षणकम्**[३] – गोदारणम् – कुद्दालः। **समितिः** – ईर्यादिका, सा **तु शमिला** – युगकीलकः। **तथा ये सर्वज्ञवचने** – केवलिप्रज्ञप्ते धर्मे **रताः** – कृतपक्षपाताः, ते, **धृतिरेव योक्त्रम्** – आबन्धः[४] – धृतियोक्त्रम्, तेन **सुतरां सम्यक्**

१. किरातार्जुनीये।।।। २. ध-क-ख-ग-च-ण-थ-प- गोच्छणवो। घ-झ-त- गोत्थणवो। ठ-ज- गोच्छणवे। ट- गोच्छणवा। ढ- गोच्छणगो। न- मोछणवो। ३. गावं पृथिवीं क्षणोतीति। ४. जोत्र इति ख्यातः।

**बद्धाः** – **धृतियोक्त्रसुसम्बद्धाः**। न हि प्रवचनप्रतिपत्तिमन्तरेण प्रधानगुणप्राप्तिरिति। एवम्–

**पंचेव इंदियाणि तु, खंता दंता य णिज्जिता।**
**माहणेसु तु ते गोणा, गंभीरं कसती किसिं।।२६–१२।।**

**पञ्चैवेन्द्रियाणि तु क्षान्तानि**–अमनोज्ञानामपि समनुभवने सक्षमाणि, यतो **दान्तानि** – स्वैरभावतः प्रत्याहृत्य नियन्त्रितानि, किमुक्तं भवति – **निर्जितानि** – वशीकृतानि भवन्ति, **तानि तु ब्राह्मणेषु** व्यवस्थितानि, ब्राह्मणसत्कानीति यावत्, गावः – बलीवर्दभूतानि, गच्छन्ति प्राप्नुवन्त्येनां शश्वच्छ[1]स्यलिप्सव इति **गम्भीरा**, ताम्, **कृषिं** – भावकर्षणम्, **कृषन्ति** – कुर्वन्ति, वचनव्यत्यासः प्राकृतत्वात्। उक्तसामग्रीफलमाह–

**तत्तो बीयं अवंझं से, अहिंसा णिहणं परं।**
**ववसातो य[2] धणं तस्स, जुत्ता गोणा य संगहो।।**
**।।२६–१३।।**

**ततोऽस्यां** कृष्यामुप्तं **बीजमवन्ध्यम्** – अवश्यं फलावहं भवति, अप्रतिहतशक्तिकस्य बीजस्य सहकारिसमवधाने सति फलावहतानियमात्। **अहिंसै**वात्र **परं** नितरां खन्यतेऽनेनेति **निखनम्**[3] – जित्याभिधं महाहलम्, **तस्य** – ब्राह्मणस्य **व्यवसायश्च** –

१. शस्यशब्दस्यार्थद्वयम् - धान्यं कल्याणं च। २. मुद्रितेषु य - विना।
३. णिहण - नि + खन्।





वीर्यानिगूहनेन सर्वात्मनोद्यमः, स एव **धनम्** – द्रव्यम्। **युक्ताः** – समित्यादावुपयुक्ताः, **गावश्च** – इन्द्रियरूपा बलीवर्दाः, त एव **सङ्ग्रहः** – कृषिप्रधानाङ्गसम्पादनम्। ईर्याद्युपयुक्तचक्षुरादीन्द्रि–याण्येवाध्यात्मकृषौ प्रधानाङ्गतां भजन्त इति। तथा–

**धिती खलं व सुयिकं, सद्धा मेढी य णिच्चला।**
**भावणा उ वती तस्स, इरिया दारं सुसंवुडं।।२६–१४।।**

**धृतिः** – व्यसनाशनिसन्निपातेऽप्यविचलितप्रकृतिभावः, सैव **शुचिकम्** – पवित्रम्, **खलमिव**–धान्यनिष्पन्नवनक्षेत्रमिव, **श्रद्धा** – परानुरोधशून्योऽध्यात्मकृषिविषयो निजाभिलाषः, सैव **निश्चला** स्थिरस्वभावा, **मेथिः** – खले गोबन्धार्थं दारु, **चः** – समुच्चये, **भावनास्तु** – अनित्यादिकाः, **तस्य** – प्रकृतकृषिसाधनसन्दोहस्य, **वृत्तिः** – वाटः[1] – कण्टकादिवेष्टनम्, **ईर्या** – सामान्यतः साधुक्रिया, सैव **सुसंवृतं द्वारम्**, तदनुभावेनाभिभवप्रवेश–निषेधभावात्, यदाह – आचाराध्ययनोक्तार्थभावनाचरणगुप्त–हृदयस्य। न तदस्ति कालविवरं, यत्र क्वचनाभिभवनं स्यात् – इति[2]। किञ्च –

**कसाया मलणं तस्स, कित्तिवातो य [3]तक्खमो।**
**णिज्जरा तु [4]लिवामीसा, इति दुक्खाण णिक्खति।।**
**।।२६–१५।।**

१. वाड इति ख्यातः। २. प्रशमरतौ।।११९।। ३. घ-झ-त- तक्खमा। ४. घ.झ.त. - लवा। हस्तादर्शेषु - लिवा।

**कषायाः** – क्रोधादयः, **तस्य** – कृषिसत्कानुष्ठानस्य, मर्दनेनापास्यत इति **मर्दनं मलनं** वा – तुषादिकचवरः, स च कृषावेवोत्पन्नोऽपि त्यज्यत एवमध्यात्मकृषावपि कथञ्चिदुत्पन्नाः सञ्ज्वलनकषाया हातव्याः। कथमेषां हानमित्याह– **कीर्त्तिः** – निर्जितकषायानां महात्मनां श्लाघा प्रमोद इति यावत्, सैव **वातः** – मलनानुगुणः पवनः, स **तत्क्षमः** कषायमर्दने समर्थः। **निर्जरा तु**, लिप्यतेऽनयेति **लिपा** – तैलम्, कोथादेः संरक्षणार्थं तद्युक्तं– तल्लिप्त**मामिषम्** – धान्यरूपं भोज्यं वस्तु – **लिपामिषम्**, लिङ्गव्यत्ययः प्राकृतत्वात्। यद्वा लिप्यत इति लिपम् – स्नेहोपदिग्धं धान्यम्, तल्लक्षणमामिषं भोज्यं वस्तु यत्र सा **लिपामिषा** – धान्यवसतिः कोष्ठागार इति यावत्। सैव लोके कृषिफलतयेष्यत इत्यध्यात्मकृषावपि निर्जराया एव फलस्थानीयतया तद्व्यपदेशः। **इति** – एवमध्यात्मकृषया, **दुःखानाम्** – शारीरमानसकष्टानाम्, **निष्कृतिः** – प्रतिक्रिया भवति, अयं भावः, निर्जराप्रकर्षेण कृत्स्नकर्मक्षयः, ततो विशुद्धात्मस्वरूपाविर्भावः, स च परमानन्दमय एवेत्युपपन्नैव दुःखसन्दोहनिष्कृतिः, एतदेवाह–

**एतं किसिं कसित्ताणं, सव्वसत्तदयावहं।**
**माहणे खत्तिए वेस्से, सुद्दे वा पि विसुज्झती।।**
**।।२६–१६।।**

**एतां** – अनन्तरोक्ताम्, **सर्वसत्त्वदयावहाम्** – सर्वजीवेष्वनुग्रहकारिणीम्, **कृषिम्** – अध्यात्मकर्षणम्, **कृष्ट्वा** – कृत्वा,



**ब्राह्मणः, क्षत्रियः, वैश्यः, शूद्रो वाऽपि विशुध्यति**– कर्मक्षयोपशमक्षयक्रमेण विशुद्धात्मस्वरूपाविर्भावभाग् भवति। एतदेव व्यासत आह–

**एवं से सिद्धे बुद्धे विरते विपावे दंते दविए अलंताती**
**णो पुणरवि इच्चत्थं हव्वमागच्छइ त्ति बेमि।।**

**एवमि**त्यादि प्राग्वत्। इति षड्विंशतितमे मातङ्गीयाध्ययन आर्षोपनिषद्।।

## ।। अथ सप्तविंशतितमोऽध्यायः।।

अनन्तराध्ययनेऽध्यात्मिककृषिरभिहिता, सैव सच्चरित्रमित्यत्र तद्व्याख्यानमभिधत्ते–

**''साधु सुचरितं अव्वाहता समणसंपया''**
**वारत्तएणं अरहता इसिणा बुइतं।।२७–१।।**

साध्नोत्यर्थं मोक्षलक्षणमिति **साधु**, सर्वत्र विहितक्रियागतावितथभावेन समन्विततया शोभनतमं **चरितम्**– चारित्रम्– **सुचरितम्**, न च साधावेव शोभनतरतासमावेशात्पुनरुक्तिरिति वाच्यम्, तारतम्योपलम्भात्, यदागमः – चरित्ताराहणा णं भंते ! कइविहा पण्णत्ता ? तिविहा पण्णत्ता, तं जहा–उक्कोसिया मज्झिमा जहण्णा – इति **(व्याख्याप्रज्ञप्तौ।।८–१०।।)**। मोक्षसाधकता तु त्रिष्वपि, यदुक्तम् – आराधनाश्च तेषां तिस्रस्तु

जघन्यमध्यमोत्कृष्टाः। जन्मभिरष्टत्र्येकैः सिध्यन्त्याराधकास्तासाम् – इति **(प्रशमरतौ ।।२३३।।)**।

तदत्राद्यद्वये कालयापनेन विलम्बिततालक्षणव्याघातमापन्ना-ऽर्थसिद्धिः। अन्तिमे तु नेदृशीत्याह- **अव्याहता**-विलम्बादिव्या-हतिवर्जिता, **श्रमणः** परमश्रामण्यशाली, तेनैव सम्पद्यते-प्राप्यत इति **श्रमणसम्पत्** – शिवलक्ष्मीः। साधुसुचरित एव श्रमण-सम्पत्त्वाभिधानं तदवन्ध्यहेतुभावात्। इति **वारत्तकेनार्हतर्षिणो-दितम्**। तद्वृत्तं समासतः – वारत्तपुरे जायं, सोहम्मवडंसया चइत्ताणं। सिद्धि विहुयरयमलं, वारत्तरिसिं नमंसामि – इति **(ऋषिमण्डलप्रकरणे ।।७६।।)**। व्यासतस्त्विदम् **(ऋषिमण्डलवृत्तौ।। पृ.९७।।)** –

बहुश्रुतश्च विहरन्, (धर्मघोषर्षिः)वारत्तपुरमीयिवान्।
तत्राऽऽस्तेऽभयसेनाख्यो, यथार्थः पार्थिवः पुनः।।१।।
मन्त्री वारत्तकस्तत्र, धर्मघोषो महामुनिः।
भ्रमन् गोचरचर्यायां, मध्याह्नेऽस्यागमद् गृहम्।।२।।
पायसस्थालमानीतं, सर्पिर्मधुसमन्वितम्।
दात्र्या प्रदीयमानेऽस्मै, पायसे पृषतोऽपतन्।।३।।
परिशाटिरितीष्टं न, तदलात्वा मुनिर्ययौ।
वारत्तको गवाक्षस्थस्तद् वीक्ष्येदमचिन्तयत्।।४।।
किं मन्ये मुनिना तेन, शुद्धा भिक्षेयमुज्झिता ?।
तावत् तत्रापतन् बिन्दौ, मक्षिका रसभक्षिकाः।।५।।



दैवात् ता जक्षितुं कुड्यमत्स्योऽगात् सरटश्च तम्।
सरटं पुनर्मार्जारो, मार्जारं गृहकुर्कुरः।।६।।
प्रत्यन्तवासिनः श्वा तं, सङ्ग्रामोऽभूत् तयोर्द्वयोः।
युध्यमानौ बहिः प्राप्तावीयुश्चातिथिकुर्कुराः।।७।।
स्वामिनां सारमेयानां, सङ्ग्रामोऽभूत् महान् मिथः।
मन्त्री दध्यौ ध्रुवं त्यक्ता, सा तेनानेन हेतुना।।८।।
चिन्तयंश्चास्मरद् जातिं, लेभे प्रत्येकबुद्धताम्।
लिङ्गं देवतयाऽऽनीतमादायाप्याददे व्रतम्।।९।।
वारत्तकमुनिः सोऽथ, विहरन्नन्यदा ययौ।
सुंसुमारपुरे तत्र, धुन्धुमारोऽस्ति पार्थिवः।।१०।।
तस्याऽङ्गारवती पुत्री, श्रमणोपासिकोत्तमा।
सा परिव्राजिकां वादेऽन्येद्युश्चक्रे निरुत्तराम्।।११।।
सापत्न्ये पातयाम्येनां, रुष्टा दध्यौ तपस्विनी।
ततोऽस्याः फलके रूपं, विज्ञानाधिक्यतोऽलिखत्।।१२।।
चण्डप्रद्योतभूपस्य, दर्शितं तत् तयाऽद्भुतम्।
सोऽप्यपृच्छदियं देवी, किन्नरी वा खचारिणी ?।।१३।।
तपस्विन्याह भूभर्त्तर्मानव्यङ्गारवत्यसौ।
धुन्धुमारं प्रति प्रेम्णा, प्रैषीद् दूतं ततो नृपः।।१४।।
सोऽप्यूचे प्रार्थ्यते कन्या, विनयेन पिपासया।
न प्रसह्येत्यसौ राज्ञा, धर्षितोऽगादिनान्तिकम्।।१५।।

रुष्टस्तद्वचसा चण्डप्रद्योतश्चण्डशासनः।
चतुरङ्गचमूचक्रचञ्चुश्चक्रे प्रयाणकम्।।१६।।
सर्वतः सेनयाऽऽवेष्ट्य, सुंसुमारपुरं स्थितः।
तस्थौ चाल्पबल इति, धुन्धुमारः पुरान्तरा(रम्)।।१७।।
नागागारे तदा तस्थौ, महर्षिश्चत्वरान्तिके।
धुन्धुमारो नृपो भीतः, प्रत्यर्थी बलवानिति।।१८।।
नैमित्तिकं ततोऽपृच्छत्, पुरेशः सोऽप्युपश्रुतिम्।
शृण्वानो भापयामास, भृशं क्रीडापरान् शिशून्।।१९।।
भीतास्ते कम्पमानाङ्गा, ययुर्वारत्तकान्तिकम्।
स दैवात् कृपया तेषां, मा भीर्दानं ददौ तदा।।२०।।
शोभनोपश्रुतिरिति, ज्ञात्वाऽऽगत्य निमित्तवित्।
धुन्धुमारमुवाचोच्चैर्जयं जानीहि हस्तगम्।।२१।।
ज्ञात्वाऽध्वखिन्नं तत् सैन्ये, मध्याह्ने पूःपतिश्छलात्।
उपरिष्टात् पपातेव, श्येनश्चटकपेटकम् (के)।।२२।।
भग्नं रिपुबलं बद्ध्वाऽऽनीतस्तदधिपः पुरे।
विशुद्धाध्वाध्वनीनानां जयः प्रायः कराश्रयी(य)।।२३।।
पुरद्वाराणि बद्धानि, प्रद्योतो भूभुजोदितः।
वातः कुतोमुखो वाति, तव भो ! ब्रूहि पार्थिव !।।२४।।
प्रद्योतोऽप्याह यद् वेत्सि, धुन्धुमार ! कुरुष्व तत्।
सोऽप्युवाच महाराज !, हतेन मम किं त्वया ?।।२५।।



ततोऽङ्गारवती तस्मै, दत्त्वा(त्ता)ऽऽडम्बरपूर्वकम्।
पुरद्वाराणि मुक्तानि, प्रद्योतोऽस्थात् पुरे सुखम्।।२६।।
केऽप्याहुर्देवमुद्दिश्योपवासो भूभुजा कृतः।
डिम्भरूपं कृतं तेन, निमित्तं चाव(वा वि)लोकितम्।।२७।।
प्रद्योतो द्विरदारूढो, भ्रमन्नल्पपरिच्छदः(म्)।
पुरं वीक्ष्य प्रियां प्रोचे, कथं मेऽभूत् पराजयः ?।।२८।।
साधुवागनुभावेन, बभाषेऽङ्गारवत्यपि।
हास्यन् नैमित्तिकं साधुं, वन्दे त्वामित्यवक् नृपः।।२९।।
उपयुक्तोऽभवद् वारत्तकर्षिश्चाव्रतात् स्मृतम्।
मा भीर्दानं तदाऽर्भानां, व्रतिनां व्रतदूषकम्।।३०।।
यदार्षम् – 'थेवो वि गिहिपसंगो, जइणो सुद्धस्स पंकमावहइ।।
जह सो वारत्तरिसी, हसिओ पज्जोयनरवइणा।।३१।।'
तदालोच्य प्रतिक्रम्य, मिथ्यादुष्कृतपूर्वकम्।
वारत्तकमुनिः क्षीणकर्मा प्राप महोदयम्।।३२।।

सोऽयं महर्षिः सुचरितोपायमेवाह–

**न चिरं जणे संवसे मुणी, संवासेण सिणेहु वड्ढती।**
**भिक्खुस्स अणिच्चचारिणो अत्तट्ठे कम्मा दुहायती**
**।।२७–२।।**

**मुनिः**–सुचरितेणैव शिवमिति तत्त्वमन्ता श्रमणः, **जने** एकस्मिन्नेव लोके, तात्स्थ्यात्तद्व्यपदेशाद् ग्रामादावित्यर्थः, **चिरम्**–

बहुकालम्, मासकल्पादिपूर्त्तावप्युर्ध्वकालमित्याशयः, **न संवसेत्,** पुष्टालम्बनमन्तरेण नैव निवासं कुर्यात्। यतः **संवासेन** – लोकेन सह वासकरणेन, अन्योन्यस्य **स्नेहः**-प्रेम, **वर्धते** संयमप्रति-बन्धकताप्रायोग्यां स्फातिं प्रतिपद्यते। यदुक्तम् – संवासाज्जायते स्नेहो जीवितान्तकरेष्वपि। अन्योन्यस्य च विश्वासः, श्वपचेन शुनो यथा – इति **(महाभारते १२-१३९-४०)**

तस्मात्संवासं परिहाय सूत्रोक्तविहारे यतितव्यम्, यतः **अनित्यचारिणः** – वसतिभिक्षाचार्यादौ सर्वत्र नित्यतापरिहारेण विहरतः, **भिक्षोः** – श्रमणस्य, आत्मनोऽर्थः – प्रयोजनम्-**आत्मार्थः**- मोक्षः, तस्मिन् – तत्साधनविधौ, **कर्माणि** – ज्ञानावरणादीनि, **द्विधायन्ते**-भेदमुपयान्ति, आज्ञायोगस्य कर्मवि-योगावहत्वस्वाभाव्यात्। अतः –

**पयहित्तु सिणेहबंधणं झाणज्झयणपरायणे मुणी।**
**णिधुतेण सया वि चेतसा णिव्वाणाय मतिं तु संदधे**
**।।२७-३।।**

स्नेह एव बन्धनम् - **स्नेहबन्धनम्,** न पेमरागा सममत्थि बंधो-इत्युक्तेः, **प्रजहाय** – प्रकर्षेण – तल्लेशस्याप्यनुत्सर्गवर्जनेन त्यक्त्वा, **ध्यानाध्ययने** – प्राग्वत्, तत्**परायणो मुनिः सदाऽपि निभृतेन** – मोक्षविनयविनीतेन, **चेतसा** – मनसा, **निर्वाणाय**-सिद्ध्यधिगमार्थम्, मन्यतेऽनया **मतिः** – तत्त्वनिश्चयः, तां



**सन्दध्यात्** – चन्दनगन्धवदात्मनि परिणमय्य भावयेत्। ज्ञानयोगस्य शुद्धतपस्त्वेन निकाचितकर्मणामपि क्षयापादनेन निर्वाणनि-बन्धनत्वात्, तदुक्तम् – ज्ञानयोगस्तपःशुद्धः-मित्याहुर्मुनिपुङ्गवाः। तस्मान्निकाचितस्यापि, कर्मणो युज्यते क्षयः – इति **(अध्यात्मसारे।।१८-१६४।।)**। ज्ञानयोगो मुनेः पार्श्वमाकैवल्यं न मुञ्चति – इति **(अध्यात्मोपनिषदि।।२-३।।)** च। अतः प्रथमतस्तु स्नेहबन्धनमुक्तौ यतितव्यम्, यस्तु तदेव दृढीकरोति, तमधिकृत्याह-

**जे भिक्खु सखेयमागते**
**वयणं कण्णसुहं परस्स बूया।**
**सेऽणुपियभासए हु मुद्धे**
**आतट्ठे णियमा तु हायती।।२७-४।।**

**यो भिक्षुः सखेदम्** – लोकविजयाद्युग्रचर्यानिर्वेदसहितं भावम्, **आगतः** – कथञ्चित् प्राप्तः, **परस्य** गृहस्थस्य, तदावर्जनाभिसन्धिना **कर्णसुखम्** – श्रोत्रसौख्योत्पादकम्, **वचनम्** – वाक्यम्, **ब्रूयात्** – कथयेत्, जनचित्तरञ्जनं कुर्यादित्याशयः।

**सः** – उक्तभिक्षुः, **अनुप्रियभाषकः** – सागारिकानुवर्तनेन तदावर्जनैकचित्ततया श्रामण्यमुद्रां त्यक्त्वा तदभीष्टवादी, **हुः** – खेदे, **मुग्धः** – स्वार्थभ्रंशपरत्वेन मूढः, **आत्मार्थे** – स्वसिषाध-यिषितप्रयोजने, मोक्षहेतुज्ञानाद्याराधनायामित्यर्थः, **नियमात्** – अवश्यमेव, **हीयते** – यावदुच्छेदमपि हानिमाप्नोति।

कथञ्चिदाज्ञायोग[1] एव रत्नत्रयीसामग्र्यात्, तस्य च तेन विराधनादिति। प्रकृते जिनाज्ञा-गिहिसंथवं न कुज्जा (**दशवैकालिके।।८-५२।।**), तेसिं इहलोगफलट्ठयाए जो संथवं न करेइ स भिक्खू (**उत्तराध्ययने।।१५-१०।।**) । अत एवागमः - [2]पहीणसंथवे - प्रक्षीणः पूर्वपश्चात्संस्तवरूपो वचनसंवासरूपो वा गृहिभिः सह संस्तवो यस्य स प्रक्षीणसंस्तवः।

अत एव जनसम्पर्क एव परैः प्रतिक्रुष्टः, तदाह-जनेभ्यो वाक् ततः स्पन्दो मनसश्चित्रविभ्रमाः। भवन्ति येन सम्पर्कं, जनैर्योगी ततस्त्यजेत् - इति (**समाधितन्त्रे ७२**)। तथा योगी चरेन्नित्यं सतां धर्ममदूषयन्। जना यथावमन्येरन्, गच्छेयुर्नैव सङ्गति- मिति (**नारदपरिव्राजकोपनिषदि**)। न ह्यन्तरवारपारनिमज्जनमन्तरेण ज्ञानानन्दादिरत्नप्राप्तिरिति। इदं त्वत्यसमञ्जसमित्याह-

**जे लक्खण-सुमिण-पहेलियाओ**
**अक्खाईयइ य कुतूहलाओ।**
**भद्दाणाइं णरे पउंजए,**
**सामण्णभावस्स महंतरं खु से।।२७-५।।**

**यः** - नामश्रमणः, **लक्षणम्**- स्त्रीपुरुषयोर्यथा- चक्खुसिणेहे सुहितो दंतसिणेहे य भोयणं मिट्ठं तयणेहेण य सोक्ख णहणेहे होइ परमधणं- इत्यादि। गजादीनां च यथायथं वालुकाप्यादिविहितम्। **स्वप्नम्** - स्वप्नगतं शुभाशुभकथनम्, यथा-गायने रोदनं ब्रूयान्नर्तने

१. प्रकृते जिनाज्ञा - पियमप्पियं कस्सइ नो करेज्जा - इति (सूत्रकृताङ्गे।।१-११।।७।।)। २. उत्त०।।२१-२१।।



वधबन्धनम्। हसने शोचनं ब्रूयात्पठने कलहं तथा-इत्यादि।

तथा **प्रहेलिका** - अभिप्रेतार्थसंवरणकारिवचनविन्यासो गूढाशयपद्यमिति- यावत्। सा च च्युताक्षराद्यनेकप्रकारा, क्रियागुप्तिप्रमुखा च, यथा - पाण्डवानां सभामध्ये दुर्य्योधन उपागतः। तस्मै गाञ्च हिरण्यञ्च सर्वाण्याभरणानि च - इति क्रियागुप्तिः[1]। एवं लक्षणं च स्वप्नं च प्रहेलिकां च - **लक्षण-स्वप्नप्रहेलिकाः**। **कुतुहलात्** - लोकसत्काराद्यवाप्त्यौत्सु-क्यात्, **आख्याति** - पृष्टोऽपृष्टो वाऽपि कथयति, पृष्टेनाऽपि न जाने - इत्येव वक्तव्यमिति सिद्धान्तः (**ओघनिर्युक्तौ गाथा-४२५ वृत्तौ**)। अयं तूपेत्य स्वरसेन वदतीति। तथा **भद्रम्** - विषयाशंसातृप्तिहेतुक-सुखासिका, तदर्थं चूर्ण-भस्म-दवरकादीनां **दानानि**-भद्रदानानि, **नरे** - लोके **प्रयोजयेत्**, भद्रदानप्रयोगेण सत्कारादिप्राप्तौ यत्नं कुर्यादिति हृदयम्, **तस्य** - वेशविडम्बिनः, **श्रामण्यम्** - चारित्रम् (**उत्तराध्ययनबृहद्वृत्तौ।।अ.१८।।**), तस्य **भावः** - आत्मनि परिणतिः - श्रामण्यभावः, तस्य च **खलु महदन्तरम्**[2], अयं श्रामण्यभावस्य सुदूरे वर्तत इति भावः तन्मुद्रासमुल्लङ्घनात्।

इतश्चास्य श्रामण्यविरहः, विलक्षणत्वात्[3], यदार्षम्- छिन्नं सरं भोमं अंतलिक्खं, सुविणं लक्खणं दंड वत्थुविज्जं। अंगविगारं

१. पाण्डवानां सभाया मध्ये यः अधनो दरिद्र उपागत उपस्थित आसीत्, तस्मै गां हिरण्यं सुवर्णं च, सर्वाणि आभरणानि च अदुर्दत्तवन्तः - इत्यर्थः। साहित्य-दर्पणे।। दशमपरिच्छेदः।। कुसुमप्रतिमायां वृत्तौ।। पृ.५९६।। २. उभयोः मध्ये बृहदन्तरालं विद्यते - इत्यर्थः। ३. विगतं वक्ष्यमाणं श्रमणलक्षणं यस्मात् स विलक्षणः।

सरस्स विजयं जो विज्जाहिं न जीवई स भिक्खू - इति (**उत्तराध्ययने।।१५-७।।**)।

एवं चास्य जनसत्कारादिलोभेन संयमसाम्राज्यभ्रंशः, सोऽयं काकिणीहेतोः कोटिहानन्यायापातः, उक्तं च - किन्तु सातैकलिप्सुः स, वस्त्राहारादिमूर्च्छया। कुर्वाणो मन्त्रतन्त्रादि, गृहव्याप्तिं च गेहिनाम्।। कथयंश्च निमित्ताद्यं, लाभालाभं शुभाशुभम्। कोटिं काकिणीमात्रेण, हारयेत् स्वं व्रतं त्यजन् - इति (**योगसारे।।४/२२-२३।।**)।

नन्वस्तु श्रामण्यादन्तरम्, सत्कारादिसुख एव परितोषयोगान्न नः किञ्चिच्छिन्नमिति चेत् ? न, वध्यमण्डनकल्पत्वात्तादृशसत्कारादेः, यदाह- जे लक्खणं सुविण पउंजमाणो निमित्तकोऊहलसंपगाढे। कुहेडविज्जासवदारजीवी, न गच्छई सरणं तंमि काले।। तमंतमेणेव उ से असीले, सया दुही विप्परियासुवेइ। संधावई नरगतिरिक्खजोणी मोणं विराहित्तु असाहुरूवे - इति (**उत्तराध्ययने।।**२०/४५-४६।।) ।

अथ कश्चिन्न लक्षणाद्याख्याति, अनवगमात्, किन्तु गृहिगेहतप्तिं विधत्ते, तमधिकृत्याप्याह-

**जे चोलक-उवणयणेसु वा वि**
**आवाह-विवाह-वधूवरेसु य।**
**जुंजेइ जुज्झेसु य पत्थिवाणं,**
**सामण्णभावस्स महंतरं खु से।।२७-६।।**

**यः** - नामश्रमणः **चौलकानि** - विधिना बालकानां चूला-



कर्माणि-मुण्डनानि, **उपनयनानि** - यज्ञसूत्रपरिधापनरूपा उपवीतसंस्काराः, तेषु **वाऽपि, आवाहः** - विवाहात् प्राक्तनकालीन उत्सवविशेषः, नववध्वा वरगृह आनयनं वा, **विवाहः** - पाणिग्रहणम्, **वधूवरौ** - दयितादयितौ, तयोरन्यदपि यत्किञ्चित् कर्मेति भावः, तेषु **च, पार्थिवानाम्** - राज्ञाम्, **युद्धेषु** - सङ्ग्रामेषु, उपलक्षणादीश्वरादीनां कलहेषु च, आत्मानं मुक्तमर्यादतया **योजयति** - स्वयं तत्र व्यापारयति, सहायादिभावं भजते वा, **तस्ये**त्यादि प्राग्वत्। श्रामण्यभावादस्यान्तरं मुधाजीवित्वक्षतेः[१]। अत एव गिहिकज्जचिंतगो- इति ( **उपदेशमालायाम्।।३७३।।**)। पारमर्षे साध्वाभासलक्षणम्। एवञ्च हिंसाद्यनुमत्यादिः, ततो वज्रलेपायमाना दारुणदुर्गतिसन्ततिः, तथोक्तम्- त्यक्त्वा गृहं स्वं परगेहचिन्ता - तप्तस्य को नाम गुणस्तवर्षे !। आजीविका ते यतिवेशतोऽत्र सुदुर्गतिः प्रेत्य तु दुर्निवारा - इति (**अध्यात्मकल्पद्रुमे।।१३-४७।।**)। शेषस्यापीदृशकृत्यस्य सङ्ग्रहार्थमाह-

**जे जीवणहेतुं पूयणट्ठा**
**किंची इहलोकसुहं पउंजे।**
**अट्ठिविसएसु पयाहिणे से,**
**सामण्णभावस्स महंतरं खु से।।२७-७।।**

**यः** - नामश्रमणः, **जीवनहेतोः**[२]- आजीविकार्थम्, **पूजनार्थम्** - लोकसत्कारश्लाघाद्यवाप्त्यर्थं वा, **किञ्चिदिहलोके**

१. मुधाजीवित्वस्वरूपावगमाय दृश्यतां दशवैकालिके।।५-१/९९-१००।। वृत्तिः।
२. षष्ठ्यर्थे द्वितीया।

**सुखम्** - सुखहेतुकृत्यम्, **प्रयोजयेत्** - सङ्क्लिष्टाध्यवसाय-प्रकर्षेण कुर्यात्, **स** वेशविडम्बकः, **अर्थी** - मत्प्रयोजन-साधकोऽयं भविष्यतीति मत्वा नमस्यमानो भक्तजनः, तस्य **विषयाः** - गृहव्यवहाराद्यर्थाः, तेषु, दक्षते परकार्यं शीघ्रं करोति-**दक्षिणः**, स्वरससमावेशात् प्रकर्षेण दक्षिणः - **प्रदक्षिणः**। **तस्ये**त्यादिप्राग्वत्। अत्र हेतुः प्रवचनप्रतिक्रुष्टस्य प्रतिपत्तिरेव, तदार्षम् - जीवियं नाभिकंखे **(दशवैकालिके।।१०-१७।।)** नोऽविय पूयणपत्थए सिया **(सूत्रकृताङ्गे।। १-३-१६।।)**, चइज्ज पूयणं **(आचाराङ्गे।।२-४५-७।।)**, ण य पूयणट्ठी न सिलोयकामी य परिव्वएज्जा **(सूत्रकृताङ्गे।। १-१०-२३।।)**, गिहिणो वेयावडियं न कुज्जा **(दशवैकालिके।।चू.२-९।।)** - इत्यादि। सर्वमिदं पूजनादि प्रतिष्ठायै काङ्क्ष्यते, सैव योगिभिर्निन्दिता, तदाहुः परेऽपि - प्रतिष्ठा सूकरीविष्ठा समा गीता महर्षिभिः। तस्मादेनां परित्यज्य कीटवत् पर्यटेद्यतिः - इति **(नारदपरिव्राजकोपनिषदि।।५-१५।।)**। विषस्येवोद्विजेतैव सन्मानात् सर्वदा यतिः। अमृतस्येवातृप्येत चापमानस्य सर्वदा - इति। तदेवं स्थिते यत्कर्तव्यं तदुपदिशति-

**ववगयकुरुजे संछिण्णसोते**
**पेज्जेण दोसेण य विप्पमुक्के।**
**पियमप्पियसहे अकिंचणे य**
**आतट्ठं ण जहेज्ज धम्मजीवी।।२७-८।।**

विशेषेणापगताः कुत्सिता रुजाः[1] - भावरोगाः यस्य सः - 

१. रोगो रुजा रुगातङ्कः - हैम।



**व्यपगतकुरुजः** - विलीनपूजादिगृद्धिरित्याशयः। सम्यक् - रागाद्यपासनेन, छिन्नः-निकृत्तो विषयप्रचारो येषां तानि **सञ्छिन्नानि**, सच्छिन्नानि **स्रोतांसि** - इन्द्रियाणि यस्य स **सञ्छिन्नस्रोताः**, सम्भिन्नस्रोतोलब्धिसम्पन्नो वा, विशुद्धचारित्रानुभावेनैकेन्द्रियेणापि पञ्चेन्द्रियविषयसंवेत्तेत्यर्थः। छिन्नानि वा श्रोतांसीव श्रोतांसि-मिथ्यादर्शनादीनि येनासौ **छिन्नश्रोताः**। **प्रेम्णा द्वेषेण च विप्रमुक्तः**, साम्यसामर्थ्येनेति गम्यते, यदाह- को मोहः ? कः शोकः ? एकत्वमनुपश्यतः-इति **(ईशावास्योपनिषदि।।७।।)**। अत एव **प्रियाप्रियसहः**, इष्टानिष्टेषु विषयेषु रागद्वेषनिग्रहकरणे समर्थः, तदाह- प्रियाप्रिये प्राप्य हर्षद्वेषौ ये प्राप्नुवन्ति न। ब्रह्माश्रिता असम्मूढा ब्रह्मज्ञाः समबुद्धयः - इति **(गणेश-गीतायाम्।।४-१०।।)**। पियमप्पियं सव्वं तितिक्खएज्जा - **(उत्तराध्ययने।।२१-१५।।)** इति पारमर्षपरिणतिसम्पन्न इति तात्पर्यम्।

न विद्यते किञ्चनम् - द्रव्यभावग्रन्थिलक्षणम्, यस्य **सोऽकिञ्चनः**, सर्वत्र प्रतिबन्धविनिर्मुक्तत्वात्, धर्मेणैव जीवितुं शीलमस्य- **धर्मजीवी**, इतरथा प्राणविस्रष्टा, धर्मरुचि-प्रभृतिवदिति हृदयम्।

स एवंविधो भूत्वा कदापि आत्मनोऽर्थः - मोक्षलक्षणं प्रयोजनम्-**आत्मार्थः**, तं **न जह्यात्**- नैव त्यजेत्। प्रव्रज्यादि-सर्वाभियोगो मम मोक्षायैवेति कदापि न विस्मरेत्, तद्विस्मरण एव पूजनाद्यैहिकप्रयोजनोद्भवात्। यावन्मुमुक्षुतामेव मुमुक्षुजीवनमिति। एवमात्मार्थात्यागेन यत्पर्यवसति तदाह-

**एवं से सिद्धे बुद्धे विरते विपावे दंते दविए अलंताती णो पुणरवि इच्चत्थं हव्वमागच्छति त्ति बेमि ॥**

**एवमि**त्यादि प्राग्वत्। इति सप्तविंशतितमे वारत्तकनामाध्ययन आर्षोपनिषद् ।

**॥ अथाष्टाविंशतितमोऽध्यायः॥**

अनन्तराध्ययने पूजनाद्याशंसाभिः श्रमणविडम्बनोदिता, अत्राप्याशंसाव्युच्छेदमेव कर्तव्यतयोपदेष्टि–

**छिण्णसोते भिसं सव्वे कामे कुणह सव्वसो।**
**कामा रोगा मणुस्साणं कामा दुग्गतिवड्ढणा॥२८–१॥**

**सर्वशः** – सर्वप्रयत्नेन **सर्वान् कामान्** लोकसत्काराद्याशंसारूपान्, शब्दाद्युपभोगतृष्णारूपान् वा, **भृशम्**– बाढम्, छिन्नानि स्रोतांसि – पूरणमार्गा येषां ते **छिन्नस्रोतसः**, तद्रूपान् **कुरुत**, कामपूरणेन तदभिवृद्धिभावात्, यदाह – न जातु कामः कामानामुपभोगेन शाम्यति। हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते – इति **(विष्णुपुराणे॥४–१०–२३॥)**।

यतो **मनुष्याणाम्** – मानवानाम्, उपलक्षणाच्चतुर्गतिकजीवानाम्, **कामा** एव **रोगाः**, दुःखरूपत्वात्, तदाह– कामरागसमं दुःखं नैव भूतं भविष्यति – इति **(प्रेमगीतायाम्॥२४७॥)**। एतेनैहिकदुःखतोक्ता, साम्प्रतमामुष्मिकेऽपि दुःखावहतामाचष्टे – **कामा दुर्गतिः** – नरकादिः, ता वर्धन्त इति **दुर्गतिवर्धनाः**, अतः–

**णासेवेज्ज मुणी गेही एक्कंतमणुपस्सतो।**
**कामे कामेमाणा अकामा जंति दोग्गतिं॥२८–२॥**



**मुनिः** – कामैर्दुर्गतय इतिज्ञानसम्पन्नः, मोनं वुच्चति ञाणं इति निरुक्तेः **(महानिद्देसपालिसूत्रे॥१–२–१४॥)**। **गृद्धिम्**– विषयासक्तिम्, **नासेवेत** – नैव कुर्यात्, कीदृशो मुनिरित्याह– **एक** एवाहमित्**यन्तो** निश्चयः – **एकान्त**स्तं निश्चय**मनुपश्यन्**– विचारयन्, तदुपयुक्त इति यावत्, एकत्वभावनां भावयन्निति भावः प्रथमार्थे षष्ठी। तद्भावनाभावनेन – न मेऽतिप्रिया अपि विषया सहायाः स्युरित्यादिसंवित्तेः स्यादेव गृद्ध्यपगम इति।

इतश्च गृद्ध्यपगमः, वक्ष्यमाणतत्त्वपरिभावनादित्याह– **कामान् कामयमानाः** – अभिलषन्तः, अपिशब्दस्य लुप्तनिर्दिष्टत्वात् प्रार्थयमाना अपि, आसतां सम्प्राप्तकामाः, **अकामाः** – इष्यमाणकामवर्जिताः, **यान्ति** गच्छन्ति, **दुर्गतिम्** – दुष्टां नरकादिगतिम्, न चोपभुज्यमाना एव, अपि तु प्रार्थ्यमाना अपि कामा दुर्गतिवर्धना इति हृदयम्। किञ्च–

**जे लुब्भंति कामेसु तिविहं हवति तुच्छ[1] से।**
**अज्झोववण्णा कामेसु बहवे जीवा किलिस्संति ॥२८–३॥**

**ये** – जीवाः, **कामेषु लुभ्यन्ति** – सतृष्णा भवन्ति, **तेषाम्**, तिस्रो विधा यस्य तत् **त्रिविधम्** – मनोवाक्कायकदम्बकम्, **तुच्छम्** – क्षुद्रं **भवति**, निर्वीर्यतायोगात्, कामत्यागेनैव वीर्ययोगसम्भवात्, यदाह – ब्रह्मचर्यप्रतिष्ठायां वीर्यलाभः – इति **(योगसूत्रे॥२–३८॥)**। तथा **कामेष्वध्युपपन्नाः**–तल्लीनचित्ताः,

१. ख - तुच्छे से। च.ग.घ.झ.त.ज.ट.ठ.ढ.थ.ध.न.प. - तुच्छ से।

**बहवः** – प्रभूताः, **जीवाः क्लिश्यन्ति** – शारीरमानसानन्तकष्टसन्दोहं विषहन्ते। तदाह – कामसंपाडणनिमित्तं० किलिस्सन्ति अकिलिस्सियव्वं – इति (**समरादित्यकथायां नवमे भवे**)। तस्मात् –

**सल्लं कामा विसं कामा कामा आसीविसोवमा।**
**बहुसाधारणा कामा कामा संसारवड्ढणा।।२८–४।।**

शलति – देहान्तश्चलतीति **शल्यम्**– शरीरान्तःप्रविष्टं तोमरादि। शल्यमिव **शल्यम्**, के ते ? काम्यमानत्वात्**कामाः** – मनोज्ञशब्दादयः, यथा हि शल्यमन्तश्चलद्विविधबाधाविधायि तथैतेऽपि, तत्त्वत एषामपि सदा बाधाविधायित्वात्, तथा वेवेष्टि– व्याप्नोतीति **विषम्**– तालपुटादि, विषमिव **विषं कामाः**, यथैव हि तदुपभुज्यमानं मधुरमित्यापातसुन्दरमिवाऽऽभाति, अथ च परिणतावतिदारुणमेवमेतेऽपि कामाः। तदाह– विषयेन्द्रियसंयोगात् यत्तदग्रेऽमृतोपमम्। परिणामे विषमिव तत्सुखं राजसं स्मृतम् – इति (**भगवद्गीतायाम्।।१८–३८।।**)। तथा **कामाः**, आस्यः–दंष्ट्रास्तासु विषमस्येत्या**शीविष–स्तदुपमाः**, यथा ह्ययमज्ञैरवलोक्यमानः स्फुरन्मणिफणाभूषित इति शोभन इव विभाव्यते, स्पर्शनादिभिरनुभूयमानश्च विनाशायैव भवति तथैतेऽपि कामाः।

किञ्च **कामा बहुसाधारणाः**, कुक्कुरशूकराद्यधमजीवेष्वपि समानतयोपभुज्यमानाः, अतस्तदादृतौ शूकरादेरात्मनो निर्विशेषतैव स्यात्। तथा **कामाः** संसारं वर्धयन्तीति **संसारवर्धनाः**, यतः–

**पत्थंति भावओ कामे जे जीवा मोहमोहिया।**
**दुग्गमे भयसंसारे ते धुवं दुक्खभागिणो।।२८–५।।**



**ये मोहः** – अतत्त्वदर्शनम्, तेन **मोहिताः** – विनष्टविवेकप्रज्ञाः– **मोहमोहिता जीवा भावतः** – स्वरसतः, **कामान् प्रार्थयन्ति** – अभिलषन्ति, **ते** – जीवा अनेकाधिव्याधिशोकजन्मजरामरणादिजटिलत्वेन दुःखेन गम्यते यत्र स **दुर्गमः**, तस्मिन्, अत एव भयनिचिते संसारे – **भयसंसारे ध्रुवम्** – सुनिश्चितम्, **दुःखभागिनः** कष्टलब्धारः। यदुक्तम् – विसए अवइक्खंता, पडंति संसारसायरे घोरे – इति (**इन्द्रियपराजयशतके ।।२८।।**)। एतदेवाह –

**कामसल्लमणुद्धित्ता जंतवो काममुच्छिया।**
**जरा–मरणकंतारे परियत्तंति[1] वक्कमं।।२८–६।।**

**कामेन कामेषु** वा **मूर्च्छिता जन्तवः कामशल्यमनुद्धृत्य** – जिनप्रवचनशलाकया तदुद्धारमकृत्वा, जरामरणान्येव गुपिलतया कान्तारः – **जरामरणकान्तारः**, तस्मिन्, अपगतः क्रमो यथा स्यात्तथा**ऽपक्रमम्**, पृथिव्यादिष्वनियतमिति भावः, **परिवर्तन्ते** – पुनः पुनरुद्भवमाप्नुवन्ति। अतोऽवश्यं कामशल्यमुद्धरितव्यम्, प्राप्तेष्वपि कामेषु तृप्त्यसम्भवाच्चेत्यात्मव्यपदेशेनैवाह–

**सदेवमाणुसा कामा मए पत्ता सहस्ससो।**
**न याहं कामभोगेसु तित्तपुव्वो कयाइ वि।।२८–७।।**

---

१. क.ण - परिव्वयंतिवक्कमं। ख - परियत्तंतिवंक्कवं। ग.द.ढ.ध.न.प.- परियत्तंति वक्कमं। घ.त. - परियत्तन्तवुक्कमं। च - परियत्तंत्यवक्कमं। ज - परियत्तंति पक्कव्वं। ट - परियत्तति पक्कवं। ठ - परियत्तंति पक्कवं। झ - परियत्तंतवुक्कमं। थ - परियत्तंति वक्कवं।

दैवैर्मानुषैश्च कामैः सहिताः - **सदेवमानुषाः, कामा मया सहस्रशः**, उपलक्षणादन्तशोऽपि **प्राप्ताः, न च** तथाप्यहं **कदापि कामभोगेषु तृप्तपूर्वः** - प्राक् प्राप्ततृप्तिः, यदाह- देविंद-चक्कवट्टित्तणाइ रज्जाइ उत्तमा भोगा। पत्ता अणंतखुत्तो न य हं तत्तिं गओ तेहिं - इति **(इन्द्रियपराजयशतके।।१६।।)**। दहनस्तृण-काष्ठसञ्चयैरपि तृप्येदुदधिर्नदीशतैः। न तु कामसुखैः पुमानहो बलवत्ता खलु कापि कर्मणः - इति **(चन्द्रप्रभकाव्ये।।)** च। अतः-

**तित्तिं कामेसु णासज्ज पत्तपुव्वं अणंतसो।**
**दुक्खं बहुविहाकारं कक्कसं परमासुभं।।२८-८।।**

**कामेषु तृप्तिं नासाद्य** - अप्राप्य, **अनन्तशो** रोगशोकादि-प्रकारैर्बहुविधा आकाराः- स्वरूपा यस्य तद् **बहुविधाकारम्**, कर्कशद्रव्यमिव **(व्याख्याप्रज्ञप्तौ।।९-३३।।)** **कर्कश**मनिष्टमिति यावत्, कर्कशस्पर्शसम्पादितत्वेन **(स्थानाङ्गे।। नवमे स्थाने।।)** चण्डं वा, यथा कर्कश-पाषाणसङ्घर्षः शरीरस्य खण्डानि त्रोटयति, एवमात्मप्रदेशान् त्रोटयद् यद्दुःखमुपजायते **(राजप्रश्नीये।)** **तत्क-र्कशम्। परमाशुभम्** - अत्यन्तमशिवं **दुःखं प्राप्तपूर्वम्**, यतः-

**कामाण मग्गणं दुक्खं तित्ती कामेसु दुल्लभा।**
**विज्जुज्जोतो परं दुक्खं, तणहक्खय परं सुहं।।**
**।।२८-९।।**

**कामानां मार्गणम्** - अन्वेषणम्, **दुःखम्**, अपेक्षाया एव दुःखरूपत्वात्, तथा च पारमर्षम् - अविक्खा अणाणंदे - इति **(पञ्चसूत्रे।।५।।)**।



अन्वाह च - पुरःफलायामाशायां जनः कामं विडम्ब्यते इति **(विदग्धमाधवे।।४-१८।।)**। **कामेषु** प्रवृत्तस्य **तृप्तिर्दुर्लभा**, कामानामेवातृप्तिबीजत्वात्, तदाह- आरम्भे तापकान् प्राप्तावतृप्तिप्रतिपादकान्। अन्ते सुदुस्त्यजान् कामान् कामं कः सेवते सुधीः - इति **(इष्टोपदेशे।।१७।।)**। तत्त्वमप्येषां[1] सङ्कल्पेनापि तृष्णावहत्वात्, तदाह- अपि सङ्कल्पिताः कामाः सम्भवन्ति यथा यथा। तथा तथा मनुष्याणां तृष्णा विश्वं विसर्पति- इति **(ज्ञानार्णवे।।२०-३०।।)**। किञ्च विद्युत उद्योत इव **विद्युदुद्योतः**[2], कामसुखस्य क्षणिकत्वमित्याशयः, तदाश्रयस्य जीवितस्यैव तदाभत्वात्, यदाह- विज्जुलयाचंचलं जए जीअं - इति **(वैराग्यशतके।।३६।।)**। अतस्तदपि **परम्**- परमम्, **दुःखम्। किं** तर्हि सुखमित्याह- **तृष्णाक्षयः परं सुखम्**, उक्तं च - आशा हि परमं दुःखं, नैराश्यं परमं सुखम्- इति **(भागवते।।११-८-४४।।)**।

स्यादेतत्, यत्काममार्गणे दुःखमुक्तं तत्तु दरिद्राणामेव सङ्गतिमङ्गति, नृपादीनां तु नैतदिति तेषां सुखसम्भवः स्यादिति चेत् ? न, परिणामादिना कामानामेव दुःखात्मकतायाः प्रागुपपादितत्वात्, परिणामविरसत्वाच्च, एतदेवाचष्टे -

**कामभोगाभिभूतप्पा वित्थिण्णा वि णराहिवा।**
**फीतिं खितिं इमं भोच्चा दोग्गतिं विवसा गता।।**
**।।२८-१०।।**

---

१. अतृप्तिबीजत्वं कामानाम्। २. घ.झ.त. - पिज्जुज्जोगो।

साम्राज्यान्तःपुरबलवाहनादिभि**र्विस्तीर्णा अपि** – विस्तृत-सुखसाधनसम्पन्ना अपि, **नराधिपाः** – भूपालाः, **कामभोगेनाभिभूतः**– विडम्बित आत्मा येषां ते **कामभोगाभिभूतात्मानः** सन्तः, कञ्चित् कालं याव**दिमाम्**– प्रत्यक्षं दृश्यमानाम्, **स्फीतिम्** सागरमेखलालङ्कृततयातीव विशालाम्, **क्षितिम्**– पृथिवी-लक्ष्मीम्, **भुक्त्वा**– तत्स्वामितया तदुपभोगं कृत्वा, **विवशाः**– कामभोगोपार्जितक्लिष्टकर्मविपाकाधीनत्वेन परतन्त्राः, **दुर्गतिम्** – नरकादिदुष्टगतिम्, **गताः** – उपयाताः। अत एषां सुखमपि परमार्थतो हेयमेव, आह च– किं विभुत्वेन ? किं भोगैः ? किं सौन्दर्येण ? किं श्रिया ?। किं जीवितेन जीवानां दुःखं चेत् प्रगुणं पुरः – इति **(योगसारे।। ४-२७।।)**। एवं च–

**काममोहितचित्तेणं विहाराहारकंखिणा।**
**दुग्गमे भयसंसारे परीतं केसभागिणा।।२८-११।।**

**काममोहितचित्तेन** जीवेन **विहारः** – स्वैररतिक्रीडादिः, **आहारः** – मधुराद्यभीष्टभोजनम्, विहारश्चाहारश्च **विहाराहारौ**, तौ काङ्क्षते– कामकामितया समभिलषति – **विहाराहार-काङ्क्षी**, तेन, **क्लेशभागिना** – दुःसहदुःखसन्दोहपात्रेण सता, **दुर्गमे भयसंसारे** प्राग्वत्, परिसमन्तात् इतम् – गतम् भ्रान्तमिति यावत् – **परीतम्**। यदार्षम् – कामाणुगिद्धिप्पभवं खु दुक्खं सव्वस्स लोयस्स सदेवयस्स – इति **(उत्तराध्ययने।।३२-१९।।)**।, एवञ्च तद्धेतोरेवास्तु किन्तेनेतिन्यायात्स्वयमेव जीवो दुःखकर्तेत्याह–



**अप्पक्कतावराहोऽयं जीवाणं भवसागरो।**
**सेओ जरग्गवाणं वा अवसाणम्मि दुत्तरो।।२८-१२।।**

**जीवानामयं भवसागर आत्मकृतापराधः** – आत्मनैव प्राक्कृतवृजिनव्युष्टिरूप[1] इति भावः, हेतौ फलोपचारात्। **जरद्गवामिव** – वृद्धबलीवर्दानामिव **सेयः** पङ्कः, तथा**ऽवसाने** – पर्यन्ते दुःखेन तीर्यत इति **दुस्तरः**, भवति।

अयं भावः, यथा हि ते बलीवर्दाः स्वरसत एव पङ्के निमज्जन्ति, पर्यन्ते च तत आत्मानमुद्धर्तुमशक्तास्तत्रैवावसन्ना-स्तीरमवाप्तुं न शक्नुवन्ति, तथा जीवा अपि स्ववशतया कर्माणि कृत्वा तद्विपाककाले विवशतया सीदन्तीति। इत्थं च –

**अप्पक्कतावराहेहिं जीवा पावंति वेदणं।**
**अप्पक्कतेहिं सल्लेहिं सल्लकारी व वेदणं।।**
**।।२८-१३।।**

**जीवा आत्मनैव कृतैः** – विहितैः, **अपराधैः** – दुष्टकृत्यैः, **वेदनाम्** – दुःखम्, **प्राप्नुवन्ति। यथा** कश्चित् **शल्यम्** – प्रहरणविशेषः, तं करोति – निर्वर्तयतीति **शल्यकारी**, स प्रमत्तः सन्, **आत्मकृतैरेव शल्यैर्वेदनाम्** – स्वहस्तादिवेधकृतपीडाम्, प्राप्नोति। यथोक्तम् – हणाइ सत्थं जह कुग्गहीयं – इति **(उत्तराध्ययने।।२०-४४।।)**। तस्मात् –

**जीवो अप्पोवघाताय पडते मोहमोहितो।**
**बंधमोग्गरमाले[2] वा णच्चंतो बहुवारिओ।।२८-१४।।**

१. पापफलम्। २. घ.झ.त - माले वा। च - मालो वा। ट - मांलोदा। ढ - मापोदा। ण - मायोदा। ध - माकोदा। न - मावोदा। प - मा। कोदा।

**मोहमोहितो जीव आत्मोपघाताय** – स्ववधाय पापेषु **पतति**। **यथा** बध्यत इति **बन्धः** – गुम्फः, स[1] च प्रस्तावात् श्लथो गृह्यते, तेन सहिता **मोद्गराः** – कुसुमविशेषाः, तैर्यथाकथञ्चिन्निर्मितो **मालः** – मञ्चः, तात्स्थ्यात्तद्व्यपदेश-योगात्तत्र स्थिता लोका इत्यर्थः। स **बहुभिः** – प्रभूतैः शिष्टजनैः, **वारितः** – **बहुवारितो**ऽपि **नृत्यन्** – नर्त्तनप्रवृत्तः सन्, आत्मो-पघाताय पतत्येवेति। आत्मोपघातक्रममेव स्फुटयति –

**असब्भावं पवातंति दीणं भासंति वीकवं।**
**कामग्गहाभिभूतप्पा जीवितं पयहंति य।।२८–१५।।**

काम एव ग्रह इव ग्रहः– **कामग्रहः**, भूतावेशवद्वि-चेष्टितादिजनकत्वसाधर्म्यात्, ते**नाभिभूतः** सञ्जातविकृतिः, **आत्मा** येषां ते– **कामग्रहाभिभूतात्मानः**, वचनव्यत्यासः प्राकृतत्वात् **असद्भावम्**– अविद्यमानवस्तु **प्रवाचयन्ति** – उन्मत्तताप्रकर्षेण लपन्ति, यथोक्तम् – कुन्दान्यस्थीनि दशनान् मुखं श्लेष्मगृहं विधुम्। मांसग्रन्थिः कुचौ कुम्भौ हेम्नो वेत्ति ममत्ववान् – इति **(अध्यात्मसारे ८–१४)**। तथा **दीनं विक्लवं** च यथा स्यात्तथा **भाषन्ते**, दैन्यादिविशिष्टं वचो वा भाषन्त इत्यर्थः, यथोदितम् – मरणे वि दीणवयणं माणधरा जे नरा न जंपंति। ते वि हु कुणंति लल्लिं, बालाणं नेहगहगहिला।। सक्को वि नेव खंडइ माहप्पमडुप्फुरं जए जेसिं ते वि नरा नारीहिं कराविआ निअयदासत्तं– इति **(इन्द्रियपराजयशतके ६६–६७)**। तथा **जीवितम्**– प्राणधारणम्, **चः**– समुच्चये, **प्रजहति** – सर्वथा त्यजन्ति, मरणं च होइ दसमे

१. मोगरा - इति गुर्जरे।



– इत्युक्तेः **(प्रवचनसारोद्धारे – द्वार १६९)**। किञ्च –

**हिंसादाणं पवत्तेंति कामतो केति माणवा।**
**वित्तं णाणं च विण्णाणं केयी णेंति हि संखयं।।**
**।।२८–१६।।**

**केचित् मानवाः कामतः** – अन्तर्जाज्वल्यमानेच्छामदन-दहनात् सन्तप्ताः सन्तस्तन्निर्वापनाय **हिंसाया आदानम्** – साधनं खरकर्मादि **प्रवर्त्तयन्ति**। नानुपहत्य भूतानि भोगः सम्भवतीत्यन्यमपि तथाविधहिंसाया आदानमत्र द्रष्टव्यम्। तथा **केचित्** कामत एव स्वकीयं **वित्तम्**-धनम्, एतच्च चारित्रिणोऽपेक्षया चारित्रमेवेति ध्येयम्, **ज्ञानम्**– सामान्यमतिप्रभवोऽवबोधः, **विज्ञानम्**–स एव श्रुतादिपरिकर्मितः, **चः** – समुच्चये, **सङ्क्षयं हि नयन्ति** – स्व-जन्यजननप्रक्षीणसामर्थ्यतामेव प्रापयन्ति, उक्तं च – तज्ज्ञानं तच्च विज्ञानं तत्तपः स च संयमः, सर्वमेकपदे भ्रष्टं सर्वथा किमपि स्त्रियः – इति। अन्यत्रापि – न तस्य धनं धर्मः शरीरं वा यस्यास्ति स्त्रिष्वत्यासक्तिः – इति **(नीतिवाक्यामृते।।३–१२।।)**।

अत्र **मानवा** इति व्यपदेश उपलक्षणम्, अन्यत्रापि कामविडम्बनासद्भावादिति स्पष्टयति –

**सदेवोरगगंधव्वं सतिरिक्खं समाणुसं।**
**कामपंजरसंबद्धं किस्सते विविहं जगं।।२८–१७।।**

**देवाः** – ज्योतिष्कवैमानिकसुराः, **उरगाः** – नागकुमाराख्य-भवनपतिविशेषाः, उपलक्षणमेतच्छेषभवनपतिनाकिनाम्, **गन्धर्वाः** – व्यन्तरविशेषाः, उपलक्षणमेतच्छेषव्यन्तराणाम्। एतैः सहितम्–

**सदेवोरगगन्धर्वम्**। तथा तिर्यञ्चैः सहितम् – **सतिर्यञ्चम्,** एवं मानुषैः सहितम् – **समानुषम्,** किमित्याह–**जगत्**– विश्वम्, काम एव बन्धनहेतुत्वात् पञ्जरम् – **कामपञ्जरम्,** तस्मिन् सुतरां बद्धम् – **सम्बद्धम्, विविधं** – अनेकप्रकारं यथा स्यात्तथा, यथोक्तम् – कामकामी खलु अयं पुरिसे, से सोयति जूरति तिप्पति पिड्डति परितप्पति–इति **(आचाराङ्गे १–२–५)**। यद्वा **जगद्विशेषणमिदम्। क्लिश्यते** – विडम्ब्यते। तदाह– स्त्रीसमुद्रेऽत्र गम्भीरे निमग्न–मखिलं जगत् – इति **(योगसारे ४–१५)**। अवदाम चात्र – अनन्त–लोकमितनिगोदजीवाः, असङ्ख्यतन्मिता एकेन्द्रियाः, विकल–निरयिप्रभृतयोऽसङ्ख्याश्च सततं तृतीयप्रकृतयस्तद्वेदवेदयितारः। मनुजविडम्बना अपि प्रत्यक्षसिद्धाः। परमशुचिदिव्यरूपैश्वर्याणाम–च्युतान्तसुराणामपि कदाचिदतिपशु–विण्मूत्रबीभत्समनुष्यवनितासु निधुवनविडम्बना भवन्तीति पारमर्षं उक्तम्। शक्रेन्द्रोऽप्यनेकशः शचीप्रणतिप्रवणो भवति – इति **(सत्त्वोपनिषदि – १५)**। तत्र नरतिर्यग्विडम्बना यथा–व्याभिन्नकेसरबृहच्छिरसश्च सिंहा, नागाश्च दानमदराजिकृशैः कपोलैः। मेधाविनश्च पुरुषाः समरे च शूराः, स्त्रीसन्निधौ परमकापुरुषा भवन्ति।। कृशः काणः खञ्जः श्रवण–रहितः पुच्छविकलः, क्षुधाक्षामो जीर्णः, पिठरककपालार्दितगलः। व्रणैः पूयक्लिन्नैः, कृमिकुलशतैरावृततनुः, शुनीमन्वेति श्वा, हतमपि च हन्त्येव मदनः– इति। सुरसङ्क्लेशो यथा – रमणीविरहेण वह्निना, बहुबाष्पानिलदीपितेन यत्। त्रिदशैर्दिवि दुःखमाप्यते, घटते तत्र कथं सुखस्थितिः – इति **(अध्यात्मसारे ७–१९)**। तस्मात्



**कामग्गहविणिम्मुक्का धण्णा धीरा जितिंदिया।**
**वितरंति मेइणिं[1] रम्मं सुद्धप्पा सुद्धवादिणो।।**
**।।२८–१८।।**

ये कामग्रहेण विशेषेण निःशेषतया मुक्ताः– **कामग्रहविनिर्मुक्ताः**, मनोविकारलेशस्याप्यभावात्। त एव **धन्याः**, धर्मधनलब्धृत्वात्, **धीराः**, सानुबन्धसुखासुखहेतु–विवेकधिया राजितत्वात्, **जितेन्द्रियाः,** परिवशीकृतप्रत्याहारत्वात्। एवं च **शुद्धात्मानः,** [2]कलाकेलिकलङ्काकलङ्कितत्वात्, **शुद्धवादिनः**, अशुद्धवादहेतुविरहात्, इत्थम्भूताश्च ते **रम्याम्** – तत्त्वज्ञमनोमनोज्ञाम्, **मेदिनीम्** – विशुद्धतरधर्मभूमिकाम्, **वितरन्ति** – विचरन्ति, उत्तरोत्तरविशुद्धधर्माराधका भवन्तीत्यर्थः।

यद्वा **रम्यां मेदिनी**मिति रमणीयस्वर्गभूमिमित्यर्थः, तां च ब्रह्मचर्यादिफलत्वेनावाप्य तत्र **विचरन्ती**त्यर्थः, विवक्कतवबंभ–चेराणं देवाणं – इत्युक्तेः **(स्थानाङ्गे ५–२–४६४)**।

यद्वा **रम्यां मेदिनीं** सुन्दरसुरलोकवसुन्धरां देवकुर्वादिलक्षणां भोगभूमिं च **वितरन्ति** – सिद्धिसम्प्राप्त्या समुल्लङ्घयन्ति। ततोऽप्यनन्तगुणरमणीयभूमिकाऽवाप्त्या भवेदेव तत्समुल्लङ्घन–मिति। मुख्योऽर्थ एष एव, सिद्धेरेव कामग्रहविनिर्मुक्तिमुख्य–फलत्वात्, यदाहुः– एस [3]धम्मे धुवे निच्चे सासए जिणदेसिए। सिद्धा सिज्झंति चाणेणं सिज्झिस्संति तहाऽवरे – इति **(उत्तराध्ययने १६–**

१. क.ट.ठ.ढ.ण.थ - मेइणि रमं। ख- मेइइणि रमं सुद्धवादिणो। ग.घ.च.झ.त. मेइणिं रम्मं। न.ध.प.फ. - मेइणिं रंमं। २. कामदेवः। ३. ब्रह्मचर्यलक्षणः।

१९)। **मेइणिरमं** – इति पाठे तु विरक्ता राजानः स्वकीयां पृथ्वीलक्ष्मीं (मेदिनीरमां) **वितरन्ति** – उत्तराधिकारिणं समर्पयन्ति, प्रव्रजन्ति चेत्यर्थः। तदेतद् ब्रह्मफलम्, इतरफलमाह–

**जे गिद्धे कामभोगेसु पावाइं कुरुते नरे।**
**से संसरति संसारं चाउरंतं महब्भयं।।२८–१९।।**

**यो नरः कामभोगेषु गृद्धः**– तदेकाध्यवसिततालक्षणा–ऽऽसक्त्यतिशयानुस्यूतान्तःकरणः सन् **पापानि** हिंसादिरूपाणि, **कुरुते, स चातुरन्तं** – नारकादिचतुर्विभागम्, **महाभयम्**, सर्व–भयनिलयत्वात्, एवम्भूतं **संसारम्** – सन्ततसंसृत्येकलक्षणं भवम्, **संसरति** – बम्भ्रमीति, आह च – अविद्वान् पुद्गलद्रव्यं, योऽभिनन्दति तस्य तत्। न जातु जन्तोः सामीप्यं, चतुर्गतिषु मुञ्चति इति – **(इष्टोपदेशे ४६)**। तस्मात् सौख्यार्थिनां कामभोगा अनाश्रयणीया एव, अन्यथाऽपायध्रौव्यादिति निदर्शयति –

**जहा [1]अस्साविणिं नावं जातिअंधो दुरूहिया।**
**इच्छते पारमागंतुं अंतरे च्चिय सीदति।।२८–२०।।**

**यथा** कश्चिज्**जात्यन्धः** – जन्मत एव नयनयुगलविकलः, आसमन्तात् स्रवति जलं छिद्रसहस्रसङ्कुलत्वादि**त्यास्राविणी**, ताम्, **नावम्** – पोतम्, **आरुह्य पारमागन्तुमिच्छति**, न चासौ सच्छिद्रपोतारूढतया पारगामी भवति, किं तर्हि ? **अन्तर एव** –

१. क.ढ.ण - जहा अस्सा। ख - जेहारिस्सा। ग.ध.च.छ.त.झ - जहा निस्सा। ज.ठ.थ.ध.न.फ - जहा रिस्सा। ट - जहा रिश्रा। ड - जहा हिस्सा। प - जहां रिस्सा।



जलमध्य एव **सीदति** – निमज्जतीत्यर्थः। अत्र काममूढस्य जात्यन्धसाधर्म्यम्, भोगानां च सच्छिद्रपोतसङ्काशतेत्युपनयः सुगमः।

द्वितीयाङ्ग इदमेव दृष्टान्तं सोपनयमभिहितं यथा– जहा आसाविणिं नावं, जाइअंधो दुरुहिया। इच्छई पारमागंतुं अंतरा य विसीयति।। एवं तु समणा एगे मिच्छदिट्ठी अणारिया। सोयं कासिणमावन्ना आगंतारो महब्भयं – इति **(सूत्रकृताङ्गे १–११/३०–३१)**। अत्रोपनयवृत्तिः– एवमेव श्रमणा एके शाक्यादयो मिथ्यादृष्टयोऽनार्या भावस्रोतः कर्माश्रवरूपं कृत्स्नं सम्पूर्णमापन्नाः सन्तस्ते महाभयं पौनःपुन्येन संसारपर्यटनया नारकादिस्वभावं दुःखम्, आगन्तारः – आगमनशीला भवन्ति, न तेषां संसारोदधेरास्राविणीं नावं व्यवस्थितानामिवोत्तरणं भवतीति भावः।

अत्र श्रमणानामपि प्रकरणाद्विषयैषिणामेव ग्रहणमित्युप–लक्षणमेतत्तथाविधानामन्येषामपीति न प्रकृतविसदृशमिदं निदर्शन–मुपनयश्चेति ध्येयम्। क एवमाहेत्याह– **अद्दएण अरहता इसिणा बुइतं – आर्द्रकेनार्हतर्षिणोदित**मिति।

यद्येवं कामभोगा हेयास्तर्हि किं कर्तव्यमित्याह–

**काले काले य मेहावी पंडिए य खणे खणे।**
**कालातो कंचणस्सेव उद्धरे मलमप्पणो।।२८–२१।।**

त्रिकालदर्शिनी प्रतिभा **मेधा**, मेधा कालत्रयात्मिकेत्युक्तेः, साऽस्त्यस्येति **मेधावी**, तथा **पण्डा**–तत्त्वानुसारिणी मतिः, पण्डा तत्त्वानुगा – इति वचनात् **(अभिधानचिन्तामणौ ३१०)**। सा

सञ्जाताऽस्येति **पण्डितः**। स **काले काले** ग्लानप्रतिचरणादि-प्रत्येकावसरे, **क्षणे क्षणे** तादृशावसरविरहेऽपि स्वाध्यायसद्ध्यानो-पयुक्ततया प्रतिक्षणम्, **च**कारौ - समुच्चये। **कालात्** क्रमशो भावमलहानप्रायोग्याध्वनः, **काञ्चनस्येव** - सुवर्णस्येव, **आत्मनो मलम्** - कर्मकुवासनात्मकं भावकचवरम्, **उद्धरेत्** - स्वस्मा-त्पृथक्कुर्यात्।

इदमुक्तं भवति, यथा छेददाहक्रमेण सुवर्णं निर्मलीक्रियते, तथा तत्तत्कालोचितानुष्ठानासेवनाद्बुद्धिमताऽऽत्मा निर्मलीकर्तव्यः, इत्थमेव मेधादिसाफल्यादिति। किञ्च -

**अंजणस्स खयं दिस्स वम्मीयस्स य संचयं।**
**मधुस्स य समाहारं उज्जमो संजमे वरं।।२८-२२।।**

**अञ्जनस्य** - कज्जलस्य प्रतिदिनं प्रक्ष्यमाणतया **क्षयम्**-समाप्तिम्, **दृष्ट्वा**-प्रत्यक्षमुपलभ्य। इदमुक्तं भवति यथेषदिषदपि गृह्यमाणमञ्जनं कालान्तरे निःशेषीभवति, तथायुरपि प्रतिसमयं तनूभवत् समाप्तिं प्रति धावति, नियतकाले चाशेषतया क्षीयते तदेतदञ्जनज्ञातेनोपलभ्य संयम उद्यमो वरतर इत्यग्रे योगः।

**च** - तथा **वल्मीकस्य** - वामलूरस्य, **सञ्चयम्** - कृमिभिः क्रियमाणमुपचयम्, दृष्ट्वेति वर्तते। यथा कृमिभिरणुरणुरुपनीयमानो महतो वल्मीकस्य हेतुतां प्रतिपद्यते। तथा क्षणं क्षणमपि संयमाराधनेन सफलीकृतं महते फलाय सम्पद्यत इति भावः।

स्यादेतत्, धनमपि प्रतिदिनं सञ्चीयमानमस्माकं समीहितसिद्धिविधौ प्रत्यलमित्यस्माकं तु तत्सञ्चय एवाभियोग इत्यत्राह - **मधुनश्च** मक्षिकाभिरतियत्नेन स्तोकं स्तोकमुपनीय सञ्चितस्य **समाहारम्**- एकपद एव बर्बरादिजघन्यजनकृतापहरणं दृष्ट्वा **संयम** एव **उद्यमः** सञ्चययत्नः **वरम्**- श्रेष्ठतरः। अयं भावः, कदर्यस्यार्थसङ्ग्रहो राजदायादतस्कराणामन्यतमस्य निधिः - इत्युक्तेः **(नीतिवाक्यामृते २-११)**। मधुमक्षिकावत्तत्सञ्चितमपि सपदि ह्रियते, यावदन्तेऽन्तक एव सर्वं संहरति, न तु संयम-धनमीदृशम्, तदपहारासम्भवात्, तत्फलस्य सानुबन्धभावाच्च। अतोऽत्रैवाभियोगः श्रेयान्।



ननु तथापि धनेनैवोत्तमसुखसाधनसंयोग इति प्रत्यक्षमीक्ष्यत इति किं न तत्रैव यतामह इति चेत् ? अत्राह-

**उच्चादीयं विकप्पं तु भावणाए विभावए।**
**ण हेमं दंतकट्ठं तु चक्कवट्टी वि खादए।।२८-२३।।**

एतन्ममोत्कृष्टं सुखसाधनमेतन्मध्यमं निकृष्टं चैतदिति-लक्षण**मुच्चादिकं विकल्पम्** - आभिमानिकं सङ्कल्पमात्रम्, **भावनया** - अनादिकुवासनया, **विभावयेत्,** मूढजन्तुर्विमृश-तीत्यर्थः, तत्त्वत उच्चत्वादेरेवाभावात्, वस्तुस्वरूपस्य रागादेश्च परावर्त्तनशीलत्वात्।

यद्वा योऽनन्तरोक्त उच्चादिको विकल्पः, तं **भावनया** - तत्त्वचिन्तनेन **विभावयेत्,** किंस्वरूपया भावनयेत्याह-यच्**चक्रवर्त्त्यपि** - सार्वभौमोऽपि **हैमम्**- सौवर्णम्, दन्तधावनार्थं काष्ठं **दन्तकाष्ठम्, न**-नैव **खादयेत्,** दन्तधावन उपयुञ्ज्यात्, प्रकृतानुचितत्वात्। चक्री-अपि प्राकृतजनवत् प्राकृतदन्तकाष्ठमेव

दन्तधावने व्यापारयति, धान्यनिष्पन्नमेवापूपाद्यभ्यवहरति न तु सौवर्णमिति व्यर्थ एवोच्चादिविकल्प इति भावः। आह च – सहस्रिणोऽपि जीवन्ति, जीवन्ति शतिनस्तथा। धृतराष्ट्र ! विमुञ्चेच्छां, न कथञ्चिन्न जीव्यते – इति **(महाभारते–उद्योगपर्वणि ३९–८३)**। न च जीवनसाम्येऽपि धनिनां विशिष्टतरभोग्यभोगात्सुखम्, दुःखं चेतरेषामिति वैषम्यमिति वाच्यम्, विपर्यासस्याप्युपलम्भात्, यथोक्तम् – सम्पन्नतरमेवान्नं दरिद्रा भुञ्जते सदा। क्षुत् स्वादुतां जनयति, सा चाढ्येषु सुदुर्लभा – इति **(महाभारते ५–३४–५०)**। तथा – प्रायेण श्रीमतां लोके भोक्तुं शक्तिर्न विद्यते। जीर्यन्त्यपि हि काष्ठानि, दरिद्राणां च सर्वशः– इति **(महाभारते १२–१८–२९)**।

वस्तुतस्तु दुःखावहं सुखमपि दुःखमेवेति हेयैव वध्यमण्डनकल्पस्य सुखसाधनस्याशंसा, तस्मादलं धनादिना, संयमोद्यमेनैव क्षणादि सार्थकीक्रियतामित्युपदिशति –

**खणथोवमुहुत्तमंतरं सुविहित ! पाउणमप्पकालियं।**
**तस्स वि विपुले फलागमे किं पुण जे सिद्धिं परक्कमे ?**
**।।२८–२४।।**

**क्षणः** – लोचननिमेषमात्रः कालः **(आवश्यके।।अ.३।।)**, **स्तोकः** सप्तप्राणात्मकः कालविशेषः, **मुहूर्त्तः** – अहोरात्रस्य त्रिंशत्तमो भागो द्विघटिकारूपः, एतावन्मात्रमप्य**न्तरम्** – यथेष्टाचरणायावकाशम्, कीदृशमित्याह – **अल्पकालीनम्**, उक्तान्तरस्यात्यल्पाध्वरूपत्वात् **प्राप्य** – कथञ्चिदुपलभ्य, हे **सुविहित** ! – हे शोभनाचरणशाली ! यस्तावन्तमपि कालं ज्ञानाद्याराधनया नयति, **तस्यापि विपुलः** – साधिकद्विनवतिकोटिपल्योपमदेवायुष्यादिलक्षणोऽनल्पः, **फलागमः** – अवन्ध्यशुभकर्माश्रवोऽशुभनिर्जरा च। उक्तं च – यस्य क्षणोऽपि सुरधामसुखानि पल्यकोटिर्नृणां द्विनवतिं ह्यधिकां ददाति। किं हारयस्यधम ! संयमजीवितं तद् हा हा प्रमत्त ! पुनरस्य कुतस्तवाप्तिः ? – इति **(अध्यात्मकल्पद्रुमे १३–५६)**।



**किं पुनर्यः सिद्धिम्**– कृत्स्नकर्मक्षयलक्षणां मुक्तिं प्राप्तुं तदभीप्सया सर्वात्मना तपःसंयमयोः **पराक्रमेत्** – अपूर्ववीर्योल्लासेनोद्यमातिशयं कुर्यात् ? तस्य तु तर्कातीतनिरूपमफलागम इति भावः। ननु यद्यपि तर्कातीत उपमारहतिश्चासौ, तथापि पराक्रमितुर्यत्सम्पद्यते, तल्लेशेनाप्युच्यताम्, पराक्रमप्रायोग्यवीर्योल्लासस्य तच्छ्रवणनान्तरीयकत्वादित्यत्राह–

**एवं से सिद्धे बुद्धे विरते विपावे दंते दविए अलंताती णो पुणरवि इच्चत्थं हव्वमागच्छति।। त्ति बेमि।।**

**एवम्** – तपःसंयमपराक्रमेण, **स** इत्यादि प्राग्वत्। इत्यष्टाविंशतितम आर्द्रकीयाध्ययन आर्षोपनिषद्।

## ।। अथैकोनत्रिंशत्तमोऽध्यायः ।।

अनन्तराध्ययने कामभोगत्यागोऽभिहितः, तत्र यतमानस्याप्यनादिकुवासनावशात् कस्यचित्पूर्ववदेव विषयप्रवृत्तिर्भवतीति तन्मुखेनैव प्रश्नयति –

**सवंति सव्वतो सोता किं ण सोतोणिवारणं ?।**
**पुट्ठे मुणी आइक्खे कहं सोते पिहिज्जति ?।।**
**।।२९-१।।**

**वद्धमाणेण अरहता इसिणा बुइतं।**

**स्रोतांसि** - इन्द्रियाणि, हृषीकमक्षं करणं स्रोतः खं विषयीन्द्रियम्- इत्युक्तेः **(अभिधानचिन्तामणौ १३८३)**।, **सर्वतः** - समन्तात्, **स्रवन्ति** - स्यन्दन्ति। यत्र यत्राभीष्टविषयोपलब्धिस्तत्र तत्र धावन्तीत्याशयः। **किं न स्रोतसाम्** - इन्द्रियाणाम्, विषयप्रवृत्तानामिति गम्यते, **निवारणम्** - प्रत्याहारलक्षणा विषयेभ्यः समाहृतिः ? इति **पृष्टे** सति **कथम्**- केनोपायेन, **स्रोतः पिधीयते** विषयावगमद्वारावच्छेदेन संवृतीक्रियते, तन्**मुनिः** - वक्ष्यमाणोपायादृत्यवाप्तोपेयो यतिः, **आख्यात्** - प्रवचन-प्रतिपादितमर्यादयाऽवोचत्।

इदमपि केनोदितमित्याह- **वद्धमाणेण अरहता इसिणा बुइतं - वर्द्धमानेनार्हतर्षिणोदितमि**ति। स्रोतोनिवारणोपायमभि-धातुकाम एवोपक्रमते -

**पंच जागरओ सुत्ता, पंच सुत्तस्स जागरा।**
**पंचहिं रयमादियति, पंचहिं च रयं ठए।।२९-२।।**

**पञ्च** - पञ्चसङ्ख्या शब्दादिविषयाः, **जाग्रतः** - निद्रादि-प्रमादरहितस्य, सुप्ता इव **सुप्ताः**, भस्मच्छन्नवह्निवत्प्रतिहतशक्तयो भवन्ति। कर्मबन्धकारणस्य प्रमादस्य तदानीं तेषामभावात् कर्मबन्धकारणानि न भवन्तीत्यर्थः।



तथा त एव **पञ्च** शब्दादयः **सुप्तस्य** - निद्रादिप्रमादवतो जागरा इव **जागराः**, शब्दादयो हि सुप्तानां संयतानां जाग्रद्वह्निवदप्रतिहतशक्तयो भवन्ति, कर्मबन्धाभावकारणस्या-प्रमादस्य तदानीं तेषामभावात्, कर्मबन्धकारणानि भवन्तीत्यर्थः। तथा च पारमर्षम्- संजतमणुस्साणं सुत्ताणं पंच जागरा पण्णत्ता, तं जहा सद्दा जाव फासा। संजतमणुस्साणं जागराणं पंच सुत्ता पण्णत्ता, तं जहा सद्दा जाव फासा - इति **(स्थानाङ्गे ५-२-४६०)**

तथा **पञ्चभिर**गुप्तैरिन्द्रियै **रजः** - कर्मलक्षणम्, जीव-स्वरूपोपरञ्जनात्, **आदत्ते** - गृह्णाति - बध्नातीत्यर्थः। **पञ्चभिश्च** गुप्तैरिन्द्रियैः, **रजः स्थगयेत्** - संवरानुभावेन स्वस्मिन्नाश्रवन्निवारयेत्।

यद्वा **पञ्चभि**राश्रवैः प्राणातिपातादिभी **रज आदत्ते**, संवरैश्च **पञ्चभिस्तत् स्थगयेदि**त्यर्थः। यदार्षम् - पंचहिं ठाणेहिं जीवा रतं आइयंति, तं जहा- पाणातिवातेणं जाव परिग्गहेणं। पंचहिं ठाणेहिं जीवा रतं वमंति, तं जहा पाणातिवातवेरमणेणं जाव परिग्गहवेरमणेणं इति **(स्थानाङ्गे ५-२-४६१)**।

यद्येवं तर्हि संवरोपाय एव तावदुच्यतामित्यत्राह-

**सद्दं सोतमुवादाय मणुण्णं वा वि पावगं।**
**मणुण्णम्मि ण रज्जेज्जा, ण पदुस्सेज्जा हि पावए।।**
**।।२९-३।।**

**श्रोत्रम्** - कर्णः, **मनोज्ञम्** - प्रियम्, **वा, पापकम्** - अप्रियम**पि वा, शब्दम्** - ध्वनिम्, **उपादाय** - योग्य-

संयोगेनोपलभ्य, **मनोज्ञे न रज्येत** – नाभिष्वङ्गं कुर्यात्, **पापके हि न प्रदुष्येत्** – न प्रद्वेषं विदध्यात्, तत्त्वभावनयेति शेषः, यथा – सचेतनाः पुद्गलपिण्डजीवा, अर्थाः परे चाणुमया द्वयेऽपि। दधत्यनन्तान् परिणामभावांस्तत्तेषु कस्त्वर्हति रागरोषौ – इति **(अध्यात्मकल्पद्रुमे १-३४)**। ततः –

**मणुण्णम्मि अरज्जंते अदुट्ठे इयरम्मि य।**
**असुत्थे अविरोधी णं एवं सोए पिहिज्जति।।२९-४।।**

**मनोज्ञेऽरज्यन्, इतरे चा**मनोज्ञे, **अद्विष्टः** – द्वेषलेशविरहितः, अगुप्तैरिन्द्रियैराश्रवद्वारेषु **सुतरां स्थितः**–सुस्थः, नासौ–**असुस्थः** मनोज्ञामनोज्ञविषयेषु रागद्वेषपरिहारेण सर्वात्मना संवृतः, अत एवा**विरोधी** – अविपर्यस्तः – सम्यक् स्रोतोनिवारणोपायप्रवृत्त इति यावत्, **एवम्** – इत्थंभवनेन, **स्रोतः पिधीयत** इति प्राग्वत्। तथा –

**रूवं चक्खुमुवादाय मणुण्णं वा वि पावगं।**
**मणुण्णम्मि ण रज्जेज्जा, ण पदुस्सेज्जाहि पावए**
**।।२९-५।।**

**मणुण्णम्मि अरज्जंते अदुट्ठे इयरम्मि य।**
**[1]असुत्थे अविरोधी णं एवं चक्खू पिहिज्जति**
**।।२९-६।।**

१. क.ख.ज.ठ.ड.ढ.ण.द.थ.ध.न.प.फ. - असुत्थे। ग-असुते। घ.च.त.झ - असुत्ते। ट-अमुत्ते।



**गंधं घाणमुवादाय मणुण्णं वा वि पावगं।**
**मणुण्णम्मि ण रज्जेज्जा, ण पदुस्सेज्जाहि पावए**
**।।२९-७।।**

**मणुण्णम्मि अरज्जंते अदुट्ठे इयरम्मि य।**
**असुत्थे अविरोधी णं एवं घाणे पिहिज्जति।।२९-८।।**

**रसं जिब्भमुवादाय मणुण्णं वा वि पावगं।**
**मणुण्णम्मि ण रज्जेज्जा, ण पदुस्सेज्जाहि पावए**
**।।२९-९।।**

**मणुण्णम्मि अरज्जंते अदुट्ठे इयरम्मि य।**
**असुत्थे अविरोधी णं एवं जिब्भा पिहिज्जति**
**।।२९-१०।।**

**फासं तयमुवादाय मणुण्णं वा वि पावगं।**
**मणुण्णम्मि ण रज्जेज्जा ण पदुस्सेज्जाहि पावए**
**।।२९-११।।**

**मणुण्णम्मि अरज्जंते अदुट्ठे इयरम्मि य।**
**असुत्थे अविरोधी णं एवं फासे पिहिज्जति**
**।।२९-१२।।**

श्रोत्रालापकानुसारेण सुगमाः।

ननु सुदुष्करोऽयमिन्द्रियनिग्रहः, दुस्त्यजौ च रागद्वेषाविति कथमेष उपदेशोऽनुसरणीय इति चेत् ? निग्रहानिग्रहविपाकाऽऽलोचनयेति गृहाण, कस्तद्विपाक इति चेत् ? अत्राह –

**दुद्दंता इंदिया पंच संसाराय सरीरिणं।**
**ते चेव णियमिया सम्मं णेव्वाणाय भवंति हि**
**।।२९-१३।।**

प्रागवत् (**ऋषिभाषिते १६-३**)। उक्तमेव समर्थयति -

**दुद्दंतेहिंदिएहऽप्पा दुप्पहं हीरए बला।**
**दुद्दंतेहिं तुरंगेहि सारही वा महापहे।।२९-१४।।**

**दुर्दान्तैः** - अत्युच्छृङ्खलतया दमयितुमशक्यैः, **इन्द्रियैः** - हृषीकैः, **आत्मा**-जीवः, **बलादपि दुष्पथम्** - उन्मार्गं प्रति **ह्रियते,** भवहेतुक्रियाकारितां नीयत इति हृदयम्। अत्र निदर्शन-माह- **यथा महापथे** - राजमार्गे सम्यग् व्रजन्नपि **सारथि-र्दुर्दान्तैस्तुरङ्गैः** - अश्वैर्हठादप्युन्मार्गं नीयते। उक्तप्रतिपक्षमाह-

**इंदिएहिं सुदंतेहिं ण संचरति गोयरं।**
**विधेयेहिं तुरंगेहिं सारहि व्वा व संजए।।२९-१५।।**

**यथा विधेयैः** - जात्यतया सुशिक्षिततया च प्रज्ञापनीयैः, विनीतैरिति यावत्, **तुरङ्गैः**- हयैः, **सारथिरुन्मार्गं** न नीयते, तथा **संयतोऽपि सुदान्तैः** - प्रवचनप्रतिपादितविधिना सुष्ठु दमितैः, **इन्द्रियैः** - अक्षैः, **गोचरं न सञ्चरति,** विषयेषु न प्रवर्तत इत्यर्थः। एवं च तानीन्द्रियाणि जात्याश्ववत् सन्मार्गनयनेनेर्यासमित्या-द्युपयुक्तानि शिवपुरप्रापकाण्येव स्युरित्यभिप्रायः। इन्द्रियदमनोपाय-मेवाभिदधन्नाह -

**पुव्वं मणं जिणित्ताणं वारे विसयगोयरं।**
**विधेयं गयमारूढो सूरो वा गहितायुधो।।२९-१६।।**



**पूर्वं मनः** - चित्तम्, **जित्वा** - वशीकृत्य, **विषयगोचरम्**-श्रोत्रादीन्द्रियोपलब्धान् शब्दादिविषयलक्षणानर्थान् रागादि-विषयीकुर्वन्, **वारयेत्** - निरुन्ध्यात्, इत्थमेवास्य निर्विषयत्वापत्त्या मुक्तिनिबन्धनभावात्। अत्रैव दृष्टान्तमाह- **यथा गृहीतायुधः** - हस्तादिव्यवस्थितचापादिप्रहरणः, **विधेयम्** - प्रज्ञापनीयम्, **गजम्** - हस्तिनम्, **आरूढः, शूरः** - सुभटः। स यथा सिसाधयि-षितसिद्धिप्रत्यलो भवति, एवं प्रकृतेऽप्यनुसन्धेयम्। मनोविजया-दिफलमाह-

**जित्ता मणं कसाए या जो सम्मं कुरुते तवं।**
**संदिप्पते स सुद्धप्पा अग्गी वा हविसाऽऽहुते।।**
**।।२९-१७।।**

**यः** कश्चिदात्मा **मनः कषायाँश्च जित्वा सम्यक् तपः कुरुते, स शुद्धात्मा** - भावमलापगमप्रयुक्तनिर्मलताकलितात्मा, **हविषा** - घृतादिना, **आहुतः** - अभिविधना होमगोचरीकृतः, **अग्निरिव** - वह्निवत्, **सन्दीप्यते**-सङ्क्षिप्तविपुलतेजो-लेश्यत्वादिलब्ध्या सम्यक् चकास्ति। तदेवम् -

**सम्मत्तणिरतं धीरं दंतकोहं जितिंदियं।**
**देवा वि तं णमंसंति मोक्खे चेव परायणं।।**
**।।२९-१८।।**

**समयक्त्वम्** - तमेव सच्चं नीसंकं जं जिणेहिं पवेइयं (**भगवतीसूत्रादौ**) - इत्यास्तिक्यमूलकशुभात्मपरिणामः, तस्मिन् **निरतम्** - परायणम्, सन्ततं तद्भावभावितान्तरात्मेत्याशयः, तम्,

**धिया** – सम्यग्ज्ञानानुविद्धमत्या **राजत** इति **धीरः**, तम्, तथा **दान्तः** – अनन्तानुबन्ध्याद्यवच्छेदेन क्षयादिभावमानीतः, सञ्ज्वलनावच्छेदेन च निगृहीतः **क्रोधो** येन सः, **दान्तक्रोधः**, तम् मानादिदमनोपलक्षणमिदम्, **जितेन्द्रियम्** – वशीकृतकरणग्रामम्। अत्राद्यविशेषणयुगलेन सम्यग्दर्शनज्ञानसम्पन्नता चरमविशेषणद्वयेन सच्चारित्रशालिता चोक्ता। एवं **मोक्ष एव** हेतौ फलोपचारात् सज्ज्ञानादिलक्षणमुक्तिमार्ग एव, **परायणम्** – एकायनीभावं प्राप्तम्, अत्रैवकारेणान्यत्रान्तर्भावव्यवच्छेदो बोध्यः, **तम्** – जीवन्मुक्तं महात्मानम्, **देवा अपि नमस्यन्ति**, आस्तां राजादिरित्यपि-शब्दार्थः। सोऽयम् –

**सव्वत्थ विरये दंते सव्ववारीहिं वारिए।**
**सव्वदुक्खप्पहीणे य सिद्धे भवति णीरये।।२९-१९।।**

**सर्वत्र** – तृणमणिस्त्रैणपलालादौ, **विरतः** – संहृतरत्यादिविकारः, **दान्तः** – जितात्मा, **सर्वाभिः द्वारिकाभिः** संवरछिद्रैराश्रवैरिति यावत्, **वारितः** – कृतनिवर्तनः, सर्वात्मना सुसंवृत इत्यर्थः। एवं चाश्रवनिरोधनिर्जराभ्यां क्रमेण कृत्स्न-कर्मक्षयेण, प्रहीणानि सर्वदुःखानि यस्यासौ **सर्वदुःखप्रहीणो** भवति, हेतौ विलीने न फलस्य भाव इति न्यायात्, विशेषण-परनिपातः प्राकृतत्वात्, ततश्च **नीरजाः** – आत्मस्वरूपोपरञ्जकैः कर्मनोकर्मविकल्पादिलक्षणै रजोभिर्विमुक्तः, किमुक्तं भवति – **सिद्धो भवती**ति। कर्मक्षयोऽपि तत्क्षयोपशमक्रमेण सम्भवतीत्याह–

**एवं से सिद्धे बुद्धे विरए विपावे दंते दवीए अलंताती णो**



**पुणरवि इच्चत्थं हव्वमागच्छति।। त्ति बेमि।।**

**एवमि**त्यादि प्राग्वत्। इत्येकोनत्रिंशत्तमे वर्धमाननामाध्ययन आर्षोपनिषद्।

**।। अथ त्रिंशत्तमोऽध्यायः ।।**

इहानन्तराध्ययने सिद्धभावावाप्त्युपायोऽभिहितः, अत्रापि स एव प्रकारान्तरेणाभिधीयते –

**अधासच्चमिणं सव्वं वायुणा सच्चसंजुत्तेणं अरहता इसिणा बुइतं।।३०-१।।**

**यथासत्यम्** – सत्यं न्यायोपपन्नत्वमनतिक्रम्य व्यवस्थितम्, **सर्वम्** – निःशेषम्, **इदम्** – प्रत्यक्षत उपलभ्यमानं वस्तुजातम्।

अयं भावः, इह हि जगति यस्य यस्य वस्तुनो हेतुरध्यक्षतो नोपलभ्यते, तत्र तत्रेन्द्रजालत्वान्याय्यत्वासत्त्वाद्याशङ्का न निवर्तते, एवं राजरङ्कादिवैचित्र्यमपि निर्मूलतयानुपश्यतः कस्यचित्त-त्रासत्त्वाद्यारेकाऽभूत्, यन्निरासायेदं वाक्यमुदितम् – **यथे**त्यादि। केनैवमभिहितमित्याह– **वायुना सत्यसंयुक्तेन** – मनोवाक्कायवि-संवादपरिहारत ऋतम्भरेण, **अर्हतर्षिणोदितम्**। उदितमेवोप-पत्तिभिः समर्थयन्नाह–

**इध जं कीरते कम्मं तं परत्तोवभुज्जइ।**
**मूलसेकेसु रुक्खेसु फलं साहासु दिस्सति।।३०-२।।**

**यत्** शुभाशुभं **कर्म इह** जन्मनि **क्रियते, तत्** – हेतौ फलोपचारात्तदापादितं फलम्, **परत्र** – परलोके, **उपभुज्यते** – तत्कर्त्रैवानुभूयते। अत्रैव लौकिकं निदर्शनमाह – मूले सेको येषां ते **मूलसेकाः**, तेषु **वृक्षेषु शाखासु फलं दृश्यते**। न च कोऽपि

पर्यनुयुङ्क्ते - कथमन्यत्र सेकोऽन्यत्र फलोत्पत्तिरिति, मूलशाखा-द्यवच्छेदेन वृक्षस्य भिन्नत्वेऽपि वस्तुत एकत्वात्। एवं नरामरादिपर्यायपरावृत्तावप्यात्मनो द्रव्यत्वेनैकत्वाद्य एव कर्मकर्ता स एव तत्फलभोक्तेति सर्वमवदातम्। निदर्शनान्तरमाह -

**जारिसं वुप्पते बीयं तारिसं बज्झए फलं।**
**णाणासंठाणसंबद्धं णाणासण्णाभिसण्णितं।।**
**।।३०-३।।**

**यादृशं बीजमुप्यते** - वपनक्रियाविषयीक्रियते, **तादृशं फलं** वृन्तादौ **बध्यते** - निर्वर्त्यते। कीदृशमित्याह - **नाना** - अनेक-प्रकाराणि, **संस्थानानि** - अवस्थाविशेषरूपाणि - **नाना-संस्थानानि**, तेषु **सम्बद्धम्** - कृतसम्बन्धम्, तथा **नाना सञ्ज्ञाः** - सहकारनिम्बकदलीप्रमुखा आख्याः, ताभिर**भिसञ्ज्ञितम्** - विहितव्यपदेशम्। उपनयति -

**जारिसं किज्जते कम्मं तारिसं भुज्जते फलं।**
**णाणापयोगणिव्वत्तं दुक्खं वा जइ वा सुहं।।**
**।।३०-४।।**

एवं **यादृशं** शभाशुभं **कर्म क्रियते तादृशमेव फलं भुज्यते,** पुनः कीदृशमित्याह - **नाना** - अनेकप्रकारः, कर्मोदयनिबन्धनानां **प्रकर्षेण** - अवन्ध्यरूपेण, **योगः** - **प्रयोगः**, तेन **निर्वृतम्** - **नानाप्रयोगनिर्वृतम्,** पुनः कीदृशमित्याह - **दुःखं वा** - दुःखात्मकं वा, **यदि वा सुखम्** - सुखात्मकम्। अत्र यादृशमित्यादि सामान्यतोऽभिहितम्, तदेव विशेषाभिधानेन



स्पष्टयति -

**कल्लाणा लभति कल्लाणं, पावं पावा तु पावति।**
**हिंसं लभति हंतारं, जइत्ता य पराजयं।।३०-५।।**

**कल्याणाः** - परेषां कल्याणे कारणभूताः, हेतौ फलो-पचारात्, **कल्याणम्** - अभ्युदयादिलक्षणमात्मनः श्रेयः, **लभन्ते-**प्राप्नुवन्ति। **पापास्तु पापम्** - दुःखम्, हेतौ फलोपचारात्, **प्राप्नुवन्ति**। **हिंसन्** - प्राणिनं व्यापादयन्, **हन्तारम्** - स्वात्मव्यापादयितारम्, **लभते,** हिंसाकृतकर्मविपाककालेऽवश्यतया प्राप्नोति, परान् हिंसन् स्वयं हिंस्यत इति तात्पर्यम्। तथा **जित्वा च** - परेषां पराजयं कृत्वा, स्वयं **पराजयं** लभते। तथा -

**सूदणं सुदइत्ताणं णिंदित्ता वि अ णिंदणं।**
**अक्कोसइत्ता अक्कोसं णत्थि कम्मं णिरत्थकं।।**
**।।३०-६।।**

**सूदयित्वा** - मारयित्वा, **सूदनम्,** आत्मन एव मारणं लभते, परान् **निन्दित्वाऽपि च निन्दनं** लभते, निन्दापात्रं भवतीत्यर्थः, **आक्रोश्य चाक्रोशं** लभते, यतः **कर्म निरर्थकम्** - निष्प्रयोजनम्, **नास्ति**। एतदेव कर्मत्वेन परिणतस्य कार्मण-वर्गणापुद्गलस्य प्रयोजनं यत् कर्त्रे स्वानुरूपं फलं दातव्यमिति।

यद्वा **कर्मे**ति शुभाशुभकृत्यमेव, तच्च **न निरर्थकम्** - निष्फलं भवति, कृतनाशप्रसङ्गादिति। तस्माच्छुभफलमिच्छता शुभं कर्म कर्तव्यम्, तदर्थं चात्मना शुभेन भाव्यम्, यतः -

**[1]मण्णेंति भद्दका भद्दकाइं [2]मधुराइं मधुरं मण्णेति।**
**[3]कडुयभणियाइं कडुअं, [4]फरुसं फरुसाइं मण्णेति**
**।।३०-७।।**

**भद्रकाः** - स्वतः सुन्दरात्मानः, परेषां यादृशतादृशान्यपि वचांसि **भद्रकानी**ति **मन्यन्ते**, तथैव यस्य वचो **मधुरम्,** मधुररसवदपरेषामाह्लादनिबन्धनम्, सोऽपरेषां वचनानि **मधुराण्येव मन्यते**। यस्य च **कटुकं** वचः, कटुकरसास्वादवदुद्वेगजनकमित्यर्थः, सोऽपरेषां **कटुकभणिता**न्येव मन्यते, एवं यस्य **परुषं** वचनं स इतरेषां वचांसि **परुषाण्येव मन्यते**।

अयमाशयः, यथा दृष्टिस्तथा सृष्टिरितिनीत्या भद्रपरिणामस्य सर्वेषु भद्रकतादर्शनं सञ्जायते, एवं च स्वतः शोभनस्य, सर्वेषु शोभनत्वदर्शिनस्तेषु व्यवहरतो मधुरवचनान्येव निसर्गतो निःसृज्यन्ते, तच्छ्रवणेन सञ्जाताह्लादातिशयाः परेऽप्यनेन सह तथैव व्यवहरन्ति। ततश्चासौ मन्यते स्वभावत एव मधुराणि वचांस्येषामिति।

१. क.ज. - मण्णेतिं भद्दका भद्दकाइं। ख. थ - मोणंति भद्दकाइं। ग.ढ.फ - मण्णेंति भद्दका भद्दकाइं। ण.ध.प - मण्णेति भद्दका भद्दकाइं। घ.त. - मण्णंति भद्दका भद्दका इ मधुरं मधुरं ति माणति। कडुयं कडुयं भणियं ति फरुसं फरुसं ति माणति।। २. क.ढ - मधुराइं मधुरं मण्णेति। ग - मधुरं मधुणति च - मधुरंति माण ति। ख.ज.ठ.थ.ध.न.प.फ - मधुराइं - विना। ण - मधुराइं मधुरमाण्णेति। ३. क.ख.ज.ढ.ण.थ - कडुयभणियाइं कडुअं। ग - कडुयं (कडुय) भणियाइं। झ - कडुयं कडुयभणियं ति। ध.न.प.फ - कडुयं - विना। ४. क.ख.ज.ढ.ण.थ.ध.न.प - फरुसं फरुसाइं मण्णेंति। ग - फरुसं फरुसाइं माणति।



यस्तु कटुकमेव वचनं भाषते, सोऽपि स्वानुरूपप्रति-वचनान्यवाप्य सर्वेषामपि कटुकभणितान्येव स्वभावत इति मन्यते, एवं परुषेष्वपि ज्ञेयम्। उक्तं च - नादत्तं लभ्यते क्वचित् - इति। तस्मात् -

**कल्लाणं ति भणंतस्स कल्लाणा ए पडिस्सुया।**
**पावकं ति भणंतस्स पावया ते पडिस्सुया।।३०-८।।**

**कल्याणमिति भणतः प्रतिश्रुद्** गिरिकन्दरादौ **कल्याणा** इत्याकारैव भवति तथैव **पापकमिति भणतः प्रतिश्रुत् पापका** इत्याकारैव भवतीति प्रसिद्धम्। दार्ष्टान्तिकमाह-

**पडिस्सुयासरिसं कम्मं णच्चा भिक्खू सुभासुभं।**
**तं कम्मं तु णिसेवेज्जा जेणं भवति णीरए।।३०-९।।**

**भिक्षुः** - रागादिलक्षणक्षुद्भेत्ता, **प्रतिश्रुत्सदृशम्** - अनन्तरोक्तशुभेतरशब्दानुरूपप्रतिशब्दसङ्काशम्, **शुभाशुभम्** - कल्याणं पापकं च, **कर्म**-मनोवाक्कायकृत्यम्, इति **ज्ञात्वा, तत् कर्म तु** - तदेव कृत्यम्, **निःशेषेण** - सर्वात्मनोद्यम्य, **सेवेत** - आराधयेत्, **येन** - यत्कर्मणा, **नीरजाः** - निर्गतकृत्स्नकर्मरेणुः, **भवति**। नीरजस्कीभवनमेव व्यासत आह -

**एवं से सिद्धे बुद्धे विरए विपावे दंते दविए अलंताती णो पुणरवि इच्चत्थं हव्वमागच्छति।। त्ति बेमि।।**

**एवम्** - नीरजस्कावस्थाबीजभूतकर्मनिषेवनेन, **सः** - निषेविता, **सिद्ध** इत्यादि प्राग्वत्। इति त्रिंशत्तमे वायुनामाध्ययन आर्षोपनिषद्।

**।। अथैकत्रिंशत्तमोऽध्यायः।।**

अनन्तराध्ययने कर्मजं लोकवैचित्र्यमित्यभिहितम्, अत्र तु तद् वैचित्र्यमेव विविच्यत इत्यत्रादावेव तन्निरूपयितुकामस्तज्जिज्ञासा-मुत्पादयति –

**केऽयं लोए १ ? कइविधे लोए २ ? कस्स वा लोए ३ ? के वा लोयभावे ४ ? केण वा अट्ठेण लोए पवुच्चई ५ ? का गती ६ ? कतिविधा गती ७ ? कस्स वा गती ८ ? के वा गतिभावे ९ ? केण वा अट्ठेण गती पवुच्चति १० ?**

**कोऽयं लोकः** ? इति स्वरूपप्रश्नः (१)। **कतिविधो लोकः** ? इति प्रकारप्रश्नः (२)। **कस्य वा लोकः** ? इति स्वामित्वप्रश्नः (३)। **को वा लोकभावः** ? इति भावप्रश्नः (४)। **केन वाऽर्थेन लोक** इति **प्रोच्यते** ? इति व्युत्पत्तिप्रश्नः (५)। **का गतिः** ? इति स्वरूपप्रश्नः (६)। **कतिविधा गतिः** ? इति भेदप्रश्नः (७)। **कस्य वा गतिः**? इति स्वामित्वप्रश्नः (८)। **को वा गतिभावः** ? इति भावप्रश्नः (९)। **केन वाऽर्थेन गति**रिति **प्रोच्यते** ? इति व्युत्पत्तिप्रश्नः (१०)।

क एवमाहेत्यत्राह– **पासेण अरहता इसिणा बुइतं – पार्श्वेनार्हतर्षिणोदितम्।** अत्र प्रत्युत्तरयत्यपि –

**जीवा चेव अजीवा चेव १। चउव्विहे लोए वियाहिते – दव्वतो लोए खेत्तओ लोए कालओ लोए भावओ लोए २। अत्तभावे लोए सामित्तं पडुच्च जीवाणं**



**लोए, निव्वत्तिं पडुच्च जीवाणं चेव अजीवाणं चेव ३। अणादीए अणिहणे पारिणामिए लोकभावे ४। लोकतीति लोको ५। जीवाण य पुग्गलाण य गतीति आहिता ६। जीवाणं पुग्गलाणं चेव गती ८ दव्वतो गती खेत्तओ गती कालओ गती भावओ गती ७। अणातीए अणिधणे लोकभावे ९। गम्मतीति गती १०।।३१-१।।**

**जीवा एवाजीवा एवे**ति लोकस्वरूपम्, एवकारेण तदतिरिक्तव्यवच्छेदः, तदतिरिक्तस्य लोकस्यैवाभावात् (१)।

तथा **चतुर्विधः** – चतुष्प्रकारः, **लोको व्याख्यातः**, तद्यथा – **द्रव्यतो लोकः** षड्द्रव्यलक्षणः, **क्षेत्रतो लोकः** – असङ्ख्येयाकाशप्रदेशपरिमाणः, **कालतो लोकः** – अनाद्यनन्तः, **भावतो लोकः** – अनन्तोत्पादाद्यात्मकः पारिणामिको वा (२)।

तथा **आत्मभावे लोकः**, सर्वमस्ति स्वरूपेण पररूपेण नास्ति चेति वचनात्। **स्वामित्वं प्रतीत्य जीवानां लोकः**, इन्द्रो दक्षिणार्धजम्बूद्वीपाधिपतिरित्यादिव्यवस्थादर्शनात्, न चैवं कदा-चिदजीवानां स्वामित्वव्यपदेश इति। **निर्वृतिं प्रतीत्य** तु **जीवा-नामेवाजीवानामेव**, न तु केषाञ्चिदेकेषामेवेत्यवधारणतात्पर्यम्, अजीवैरपि लोकनिर्वृतिभावादिति (३)।

एव**मनादिः**, द्रव्यत्वेनोत्पत्तिविरहात्। **अनिधनः**, तत्त्वैनै-वान्ताभावात्। किमुक्तं भवति – **पारिणामिको लोकभाव** इति, तदाह– निष्पादितो न केनापि, न धृतः केनचिच्च सः। स्वयंसिद्धो

निराधारो गगने किन्त्ववस्थितः - इति **(योगशास्त्रे ४-१०६)**।

तथा **लोक्यते** - केवलालोकेनावलोकनगोचरीक्रियत **इति लोकः** (५)।

**जीवानां च पुद्गलानां च** या गमनक्रिया सैव **गतिरित्याख्याता** (६)।

**जीवानां पुद्गलानामेव गतिः**, एवकारेणाकाशादौ गतिपरिणतिव्यवच्छेदः प्रोक्तः, तत्र तदभावात् (८)।

**द्रव्यतो गतिः** द्रव्याणाम्, द्रव्यान् प्रति, द्रव्येषु वा गतिः, **क्षेत्रतो गतिः** क्षेत्रे गतिः, **कालतो गतिः** काले गतिः, **भावतो गतिः** - पर्यायात्पर्यायान्तरे गमनम् (७)। **अनादिकोऽनिधनो लोकभावः**, यथाऽसौ तथा गतिभावोऽपि लोकस्य जीवा-जीवात्मकत्वात्, तेषां च कथञ्चिद्गतिक्रियात्मकत्वात्, कथञ्चित्तदभिन्नत्वात्, एकान्तभेदे तेषां गतिरितिव्यपदेशानुपपत्तेः, सम्बन्धाभावात्, अन्यथाऽतिप्रसङ्गाच्चेति सूक्ष्ममीक्षणीयम् (९)। व्युत्पत्तिमाह - **गम्यत इति गतिरिति** (१०)।

जीवानां पुद्गलानां च गतिरित्युक्तम्, इदानीं तत्स्वरूप-मेवावेदयन्नाह-

**उड्ढगामी जीवा, अहेगामी पोग्गला। कम्मप्पभवा जीवा, परिणामप्पभवा पोग्गला। कम्मं पप्प फलविवाको जीवाणं, परिणामं पप्प फलविवाको पोग्गलाणं। णेविमा पया [1]कयाई**

१. क - पयायी। ख.ग.घ - कयाई। च - कयाइ। ढ.प - कयायी।



**अव्वाबाहसुहमेसिया, कसं कसावइत्ता। जीवा दुविहं वेदणं वेदेंति, [1]पाणाइवाएणं मुसावाएणं अदिन्नादाणेणं एवं जाव मिच्छादंसणसल्लेणं किच्चा जीवा असाय णं वेयणं वेदेंति। पाणातिवातवेरमणेणं जाव मिच्छादंसण-वेरमणेणं [1]किंतु जीवा सात णं वेयणं वेदेंति। जस्सट्ठाए णिहेति[2] समतिच्छिज्जिस्सति[3], अट्ठा-[4]समुच्छि णिट्ठितकरणिज्जे [5]संतिसंसारमग्गा**

१. क.ढ - पाणाइवाएणं मुसावाएणं अदिन्नादाणेणं एवं जाव मिच्छादंसणसल्लेणं किच्चा जीवा असाय णं वेयणं वेयंति (ढ - वेदेंति) पाणातिवातवेरमणेणं जाव मिच्छादंसणवेरमणेणं। ख.ग.च.ज.ट.ठ.थ.ध.प - पाणातिवातवेरमणेणं जाव मिच्छादंसणवेरमणेणं किं तु (ध.प - किं च) जीवा सात (ध.प - सातं) णं वेदणं वेदेंति। (ख.थ - प्रतौ वेदणं द्विरस्ति)। घ.त.झ - पाणातीवात- (....) वेरमणेणं जाव मिच्छादंसणवेरमणेणं। किच्चा (झ - किंतु) जीवा, सातणं वेयणं वेदेन्ति। ण जीवा, दु वदण वेदेंति पाणाइवाएणं मुसावाए०। अदिन्नादाणेणं। एवं जाव मिच्छादसणेसल्लणं किच्चा असायणं वेयणं वेयंति। पाणातिवा——णं जाव मिच्छादसणवेरमेण। २. क.ण.ध.न.प.फ - णिहेति। ख.ज.ट.ठ.थ - णिहेति विहेति। ग - जिहेति बिहेति। घ.त - बिहेति। च - विहेति। ढ - णीहेति। ३. क.झ.ढ.ण.ध.न.प.फ - समतिच्छिज्जिस्सति। ख.ठ.थ - समतिच्छिज्जस्सति। ज.ट - समतिछिज्जस्सति। ग - समत्तिच्छिट्ठास्सति। घ.च.त - समुच्छिज्जिस्सति। ४. क.ख.ढ.ण.थ.न.प.फ - समुच्छिणिट्ठितकरणिज्जे। ज - समुछिणिट्ठितकरणिज्जे। ग - समुच्छिट्ठास्सति णि०। घ.त - समुच्चिट्ठिसति णि०। ट - समच्छिणिद्दितकरणिज्जे। च - समुच्छिट्ठिस्सति णि०। ठ. ध- समुच्छिण्णिद्धितकरणिज्जे। ५. ण.क - सति। ख - सत। ग.ज.ट.थ.ध.न.प - संति। घ.त - सन्ते। च - संते।

**[1]अंमडाई णियंठे णिरुद्धपवंचे वोच्छिण्णसंसारे वोच्छिण्णसंसारवेदणिज्जे पहीणसंसारे पहीण-संसारवेयणिज्जे णो पुणरवि इच्चत्थं हव्वमागच्छति।।३१-२।।**

**उद्‌र्ध्वगामिनो जीवाः**, तथास्वभावात्, **अधोगामिनः पुद्‌गलाः**, तत एव। न च विपर्यासस्याप्युपलब्धेर्मिथ्येदमिति वाच्यम्। स्वभावगतेरधिकृतत्वात्, इतरस्य कर्मादिजत्वात्, तदाह- ऊर्ध्वगौरवधर्माणो जीवा इति जिनोत्तमैः। अधो गौरवधर्माणः पुद्‌गला इति चोदितम्।। यथाधस्तिर्यगूर्ध्वं च लोष्टवाय्वग्निवीतयः। स्वभावतः प्रवर्तन्ते तथोर्ध्वं गतिरात्मनाम्।। अतस्तु गतिवैकृत्यमेषां यदुपलभ्यते। कर्मणः प्रतिघाताच्च प्रयोगाच्च तदिष्यते।। अधस्तिर्यगथोर्ध्वं च जीवानां कर्मजा गतिः। ऊर्ध्वमेव तु तद्धर्मा भवति क्षीणकर्मणाम् - इति **(तत्त्वार्थभाष्यसम्बन्धकारिकायाम् २-१३/१६)**।

ननु च कथं मूर्त्तेण कर्मणाऽमूर्त्तस्य जीवस्य प्रतिघात इति चेत्? न, मदिरया ज्ञानोपघातस्य प्रसिद्धत्वात्, यदाह- मुत्तेणममुत्तिमओ उवघायाऽणुग्गहा वि जुज्जंति। जह विण्णाणस्स इह मइरापाणोसहादीहिं- इति **(योगशतके ५६)**। युक्तं चैतत्, संसारिजीवस्य कथञ्चित् कर्मनिर्वर्तितत्वेन मूर्त्तरूपत्वादित्याह-

१. क.ग.ण - अमडाइ। ख.ज.ट.थ.ध.न.प.द - अंमडाइ। घ.त. - मडाइ। झ - मडाई। च - भडाई।



**कर्मप्रभवा जीवाः**, भवति हि तत्तद्‌गतिजातिशरीरादि-विशिष्टानामात्मनां कर्मप्रभवत्वमिति। पुद्‌गलास्तु किम्प्रभवा इत्याह - **परिणामप्रभवाः पुद्‌गलाः**, प्रयोगविस्रसान्यतरपरिणामेनैव तत्तद्वर्णादिविशिष्टतया पुद्‌गलानामुत्पत्तिरिति।

उक्तमेव स्पष्टयति - **कर्म प्राप्य फलविपाको जीवानाम्। परिणामं प्राप्य फलविपाकः पुद्‌गलानाम्।**

स्यादत्र कस्यचिदाशङ्का - यदि जीवानां फलविपाकः कर्माधीनः, पुद्‌गला अपि चेदपरापरपरिणामपरिणता भवन्ति, तदा कदाचित्तथाविधकर्मोदयादुत्कृष्टसुखसाधनीभूतपुद्‌गलसंयोगाच्चोत्कृष्टं सुखं सम्भविष्यतीत्यत्राह - **इमा** - प्रत्यक्षमीक्ष्यमाणा, **प्रजा** - जन्तुजातरूपा, **कदाचिद**पि **नैवाव्याबाधसुखम्** - दुःखसम्भिन्न-त्वाद्यकलङ्कितत्वेन परमं सुखम्, **एषेत** - प्राप्नुयात्, कर्मणां पुद्‌गलानां च तत्प्रयोजकत्वासम्भवात्, शुद्धात्मस्वरूपसम्प्राप्तावेव स्वतस्तदाविर्भावभावात्, न च तत् कदाचिदपि दृश्यमानैर्जीवैः सम्प्राप्तम्, कथमिति चेत् ? अनुपायप्रवृत्तेः, तामेवाह - **कषं कशायित्वा** - हिंसां कृत्वा, भवति हि विशेषसमवधाने विशिष्टानामपि सामान्यार्थता, यथा तपस्तप्तम् - तपः कृतमिति, तथा प्रकृतेऽपि द्रष्टव्यम्। हिंसां कृत्वैताभिः प्रजाभिर्दुःख-मेवानुभूतम्, कुतोऽव्याबाधसुखवार्तेति भावः।

यद्येवं तर्हि सुखदुःखहेतूनेव स्फुटीक्रियतामित्यत्राह- **जीवा द्विविधां वेदनाम्**- अनुभूतिम्, **वेदयन्ति** - अनुभवन्ति, सहेतुकामाद्यां वेदनामाह- **प्राणातिपातेन, मृषावादेन**

**अदत्तादानेन, एवं यावन्मिथ्यादर्शनशल्येन** पापकर्म **कृत्वा** तद्विपाककाले **जीवा असातरूपां वेदनां वेदयन्ति**।

द्वितीयामाह- **प्राणातिपातविरमणेन यावन्मिथ्यादर्शन-विरमणेन, किन्तुः** - पूर्वस्मादि्भन्नपक्षद्योतकः, **जीवाः** सातरूपां **वेदनां वेदयन्ति**। एवं यः कृतप्राणातिपातविरमणः, स **यस्य** - कृत्स्नकर्मसमुच्छेदलक्षणस्य, **अर्थाय** - उक्तसमुच्छेदनिष्पत्त्यै **णिहेति** - पश्यति - अपेक्षते - समीहत इति यावत्, समीहामेव कण्ठत आह- **सम्यक्** - एकान्तिकतया, **अति** - आत्यन्तिकरूपेण **छेत्स्यते** मे कर्मबन्धनमिति।

सोऽसौ सदुपायप्रवृत्त्या, **अर्थः** - कृत्स्नकर्मसमुच्छेदलक्षणः, **आ** - प्रवचनप्रतिपादितेनाभिविधिना, **समुच्छिअ** इति देश्य-शब्दस्तोषितपर्यायः, तस्मादर्थ आतोषितः-परिपूरितो येन सः - **अर्थासमुच्छिः**, क्तान्तपरनिपातः प्राकृतत्वात्, कृतकर्मसमतिच्छेद - इति समासार्थः, अत एव **निष्ठितकरणीयः** - कृतकृत्यः, **शान्तिः** - मोक्षः[१], **संसारः** - भवः, तयो**र्मार्गान्** - साधनान् प्रति समचित्तः, उभयत्र स्पृहाविगमात्, तदाह- मोक्षे भवे च सर्वत्र निःस्पृहो मुनिः सत्तमः - इति।

**अम्मड**स्तत्काले प्रसिद्धः कश्चिदन्तकृन्महात्मा सम्भाव्यते, स यस्याऽऽलम्बनीयतयाऽऽदिरसौ - **अम्मडादिः**। **निर्ग्रन्थः**-अष्टविधकर्मग्रन्थिविनिर्मुक्तः, **निरुद्धप्रपञ्चः** - प्रतिषिद्धचतुर-शीतियोनिलक्षभीमभवग्रहणः, अत एव **व्युच्छिन्नसंसारः** -

१. आचाराङ्गे।।१.२.४.४।। सूत्रकृताङ्गे।। १.१.१।। स्थानाङ्गे।।८।।



एकान्तिकात्यन्तिकतया क्षीणसंसृतिः, यतः, व्युच्छिन्नं संसारे वेदनीयमनुभवनीयं कर्म यस्य सः - **व्युच्छिन्नसंसारवेदनीयः**, प्रक्षीणश्चतुर्गतिकः संसारो यत्सम्बन्धितयाऽसौ **प्रक्षीणसंसारः**, यतः, प्रक्षीणं संसारे वेदनीयमनुभवनीयं कर्म यस्य सः - **प्रक्षीणसंसारवेदनीयः**। स एवम्भूतः सिद्धिसौधाध्यारूढः सन् **न पुनरपि इत्यर्थम्** - इत्थंभूतं जन्मादि - दुःखात्मकं संसाराख्यमर्थं **हव्वमि**ति कदाचिद्, **आगच्छति,** अपुनरागतिगतत्वात्तस्य।

उक्तनिष्ठितकरणीयादित्वमप्यस्य क्रमेण भवतीत्याह -

**एवं से सिद्धे बुद्धे विरते विपावे दंते दविए अलंताती णो पुणरवि इच्चत्थं हव्वमागच्छति।। त्ति बेमि।।**

**एवमि**त्यादि प्राग्वत्। इत्येकत्रिंशत्तमे पार्श्वीयनामाध्ययन आर्षोपनिषद्।

**।। अथैकत्रिंशत्तमस्यैवाध्ययनस्य वाचनान्तरम् ।।**

**गतिवागरणगंथाओ पभिति जाव समाणितं इमं अज्झयणं ताव इमो बीओ पाढो दिस्सति। तं जहा-**

**गतिव्याकरणग्रन्थात्** प्रथमवाचनोक्तात्, **प्रभृति यावत् समाप्तमिदमध्ययनं तावदयं द्वितीयः पाठो दृश्यते, तद्यथा-**

**जीवा चेव गमणपरिणता पोग्गला चेव गमणपरिणता ६। दुविधा गती-पयोगगती य वीससागती य ७। जीवाणं चेव पोग्गलाणं चेव ८। उदइयपारिणामिए गतिभावे ९। गम्ममाणा**

**इयि गती १०।**

गतिस्वरूपमभिधत्ते – **जीवा एव गमनपरिणताः, पुद्गला एव गमनपरिणताः**, ततो व्यतिरिक्ताया गतेरनुपलम्भात्, एतेन द्रव्यकर्मणोरेकान्तभेदो निरस्तः (६)।

भेदमाह – **द्विविधा गतिः** प्रयोगेण निर्वृता गतिः **प्रयोगगतिः** – यथा चापादिप्रयुक्ता बाणादिगतिः, **विस्रसागतिश्च** – स्वभावसम्पन्ना गतिः, यथा परमाणोर्गतिः (७)।

गतिस्वामिनमाह– **जीवानामेव पुद्गलानामेव**, आकाशादीनां गतिविरहादेवकारेण तद्व्यवच्छेदः (८)। भावमाह – **औदयिकपारिणामिको गतिभावः**, तत्र जीवेष्वौदयिको गतिभावः, कर्मनिर्वृतत्वात्, पुद्गलेषु तु पारिणामिकः, विस्रसादिलक्षण – स्वभावाहितत्वात्। यद्वोभयमप्युभयत्र यथानय-मनुयोज्यम्, यथा कार्मणादिशरीरलक्षणपुद्गलानुविद्धत्वाज्जीवस्य पुद्गलेष्वप्यौदयिको गतिभावः, यद्वाऽचित्तपुद्गलानामपि जीवानुग्रहोपघातनिबन्धनगतिदर्शनात्तस्या अपि तत्तच्छुभाशुभ-कर्महेतुकत्वेनौदयिकभावोऽविरुद्धः। एवं जीवानामप्यशेषकर्म-विनिर्मुक्तानामुर्ध्वगतिः पारिणामिकभाव इति प्रतिपत्तव्यम्, तत्र कर्मोदयस्य हेतुत्वेन वक्तुमशक्यत्वात्, न चास्य पारिणामिकत्वेऽभ्युपगम्यमाने सदा तद्भावप्रसङ्ग इति वाच्यम्, तत्स्वभावसद्भावेऽपि प्रतिबन्धकेन कार्योत्पत्तिप्रतिरोधात्, न चैतावताऽस्य स्वभावविगम इति भावनीयम्। अन्यथा तु मणिप्रतिबद्धदाहशक्तेर्वह्नेरपि दाहकस्वरूपविगमप्रसङ्गः।



प्रतिबन्धकौ च प्रकृते कर्मप्रयुक्तप्रतिघाताभावो लोकान्तात् परं धर्मास्तिकायाभावश्चेति सर्वमवदातम् (९)।

व्युत्पत्तिमाह – **गम्यमानेति गति**रिति (१०)। गत्यादि-वक्तव्यतामाह –

**उड्ढंगामी जीवा अधेगामी पोग्गला, पावकम्मकडे णं जीवाणं परिणामे, पावकम्मकडे णं पुग्गलाणं। ण कयाति पया अदुक्खं पकासीति। अत्तकडा जीवा किच्चा किच्चा वेदेंति, तं जहा– पाणातिवाएणं जाव परिग्गहेणं।**
**एस खलु असंबुद्धे असंवुडकम्मंते, चाउज्जामे णियंठे अट्ठविहं कम्मगंठिं पगरेति, से य चउहिं ठाणेहिं विवागमागच्छति, तं जहा– णेरइएहिं तिरिक्खजोणिएहिं मणुस्सेहिं देवेहिं।**

**उर्ध्वंगामिनो जीवाः, अधोगामिनश्च पुद्गलाः**, तथा-स्वभावात्। ननु कथं तर्हि विपरीतगतिपरिणामदर्शनमिति चेत् ? अत्राह– **पापकर्मकृतो जीवानां परिणामः**। अयं भावः, या जीवस्याधस्तिर्यगादिविचित्रगतिरुपलभ्यते सा गत्यादिनामकर्मविहितो जीवपरिणामः, यद्वा यद्यज्जीवस्यौपाधिकमौदयिकं रूपं दृश्यते तत्तत् सर्वमपि पापकर्मनिर्वर्तितो जीवपरिणामः। न च देवादि-पर्यायस्य पापकर्मनिर्वर्तितत्वाभावाद्व्यभिचार इति वाच्यम्, सर्वस्यापि कर्मणो मुक्तिप्रतिबन्धकतया कथञ्चित्पापरूपत्वा-विरोधात्।

पुद्गलपरिणाममाह– **पापकर्मकृतः पुद्गलानां** परिणामः।

इदमत्र तात्पर्यम्, तत्तदुपभोक्तृपापकर्मवशात्तत्तद्पुद्गलानां परिणामः सञ्जायते, यथा नरकेषु क्षुरप्रसङ्काशः पृथिवीपरिणामः। अत्राप्याक्षेपपरिहारौ पूर्ववद्वाच्यौ।

एवं पापकर्मोदयानुभावेन **न कदाचिदपि प्रजा** – जन्तुजातरूपा, **अदुःखमकार्षीत्**, सदैव दुःखमेवान्वभवदित्यर्थः। दुःखमपि कर्ममूलकम्, तदपि स्वयंकृतमिति स्फुटयति – **जीवा आत्मकृतानि** कर्माणि **कृत्वा कृत्वा** तत्फलं वेदयन्ति, **तद्यथा – प्राणातिपातेन यावत् परिग्रहेण**। पञ्चाश्रवैरित्यर्थः।

**एष खलु असम्बुद्धः** – मिथ्यात्वोपेततया सज्ज्ञानविवर्जितः, **असंवृतकर्म** – आश्रवविशेषभूतं कृत्यम्, त**स्यान्तः** परिणामो विपाक इति यावद् भोग्यतया यत्सम्बन्धी सः – **असंवृतकर्मान्तः**, **चातुर्यामः** – व्यवहारमात्रतः प्रतिपन्नयमचतुष्टयः, **निर्ग्रन्थः** – मुक्तकञ्चुकविषधरवद् बाह्यग्रन्थमात्रत्यागी, नामनिर्ग्रन्थ इत्याशयः। सो**ऽष्टविधम्** – ज्ञानावरणीयाद्यष्टप्रकारम्, कर्म एव ग्रन्थिः – **कर्मग्रन्थिः**, बन्धनहेतुतासाधर्म्यात्, तं **प्रकरोति** अशुभाध्यवसायप्रकर्षेण बध्नाति। **स च** कर्मग्रन्थिश्**चतुर्भिस्स्थानैर्विपाकमागच्छति, तद्यथा – नैरयिकैस्तिर्यग्योनिकैर्मनुष्यैर्देवैः**, एतत्पर्यायाननुभूयमानैस्तैस्तत्कर्मविपाको वेद्यत इत्यर्थः। सैषाऽशुभकर्मवेदनवक्तव्यता, साम्प्रतं शुभकर्मवेदनविषयमाह–

**अत्तकडा जीवा णो परकडा किच्चा किच्चा वेदेंति, तं जहा – पाणातिवातवेरमणेणं जाव परिग्गहवेरमणेणं। एस खलु संबुद्धे संवुडकम्मंते**



**चाउज्जामे णियंठे अट्ठविहं कम्मगंथिं णो पकरेति, से य चउहिं, ठाणेहिं णो विपाकमागच्छति, तं जहा – णेरइएहिं तिरिक्खजोणिएहिं मणुस्सेहिं देवेहिं।**

**जीवा आत्मकृतान्**येव कर्माणि, **न** – नैव **परकृतानि**, कर्ता यः कर्मणां भोक्ता तत्फलानां स एव तु – इत्युक्तेः (**स्वरूपसम्बोधने**)। तानि कर्माणि **कृत्वा कृत्वा** – प्रतिसमयमपि बद्ध्वा, **वेदयन्ति**, विपाककाले तत्फलमनुभवन्ति। कथं बध्नन्तीत्याह– **तद्यथा – प्राणातिपातविरमणेन यावत् परिग्रहविरमणेन** संवरपञ्चकेनेत्यर्थः। अत्रापि सरागसंयमेन देवायुष्यादिशुभकर्मबन्धं प्रति हेतुता द्रष्टव्या, एवं च सविशेषणस्य विधेर्विशेषणेऽनुसङ्क्रमात् प्रशस्तरागस्यैव शुभकर्मबन्धनिबन्धनत्वमापन्नम्, संवरस्य तद्धेतुत्वायोगादिति भावनीयम्।

यद्वा वीतरागसंयमविषय एवायं विधिरिति संवरलक्षणकारणस्य यद्यदक्रियाप्रमुखं फलम्, तदेव तत्कृतत्वेन कार्यतया कर्मरूपेण विवक्षितम्, संवरानुभावेन तत्तत्फलं जीवा अनुभवन्तीति। तमेव वीतरागसंयमशालिनमधिकृत्याऽऽह – **एष खलु सम्बुद्धः** – केवलज्ञानात्मकसम्बोध सम्पन्नः, **संवृतकर्म** – पञ्चाश्रवविरमणादिरूपः संयमः, त**स्यान्तः** – परिणामो भोक्तव्यतया यस्य सम्बन्धी सः – **संवृतकर्मान्तः**, तमेव विशेषयति – **चातुर्यामः** परमार्थतः प्रतिपन्नयमचतुष्टयः, सफलत्वेनार्थक्रियाकारित्वलक्षणसल्लक्षणयोगादस्य यमचतुष्टयस्य पारमार्थिकतेति भावनीयम्।

तमेव विशेषयति - **निर्ग्रन्थः** - काञ्चनादिरूपबाह्यग्रन्थेनाष्ट-विधकर्माद्यात्मकाभ्यन्तरग्रन्थेन च विनिर्मुक्तः, अत एवासौ **अष्टविधं कर्मग्रन्थिं न प्रकरोति**। अतोऽकृतत्वादेव **स च** कर्मग्रन्थिश्**चतुर्भिस्स्थानैर्न विपाकमागच्छति**। **तद्यथा** - **नैरयिकैस्तिर्यग्योनिकैर्मनुष्यैर्देवैः**। नैष निर्ग्रन्थस्तान् पर्यायान् प्राप्य तद्विपाकमनुभवतीत्यभिप्रायः।

उक्तगतिचतुष्टयं च समासतो लोक एवेति तद्वक्तव्यतामाह-

**लोए ण कताइ णासी, ण कताइ ण भवति, ण कताइ ण भविस्सति, भुविं च भवति य भविस्सति य, धुवे णितिए सासए अक्खए अव्वए अवट्ठिए णिच्चे, से जहाणामते पंच अत्थिकाया ण कयाति णासी जाव णिच्चा एवामेव लोके वि ण कयाति णासि जाव णिच्चे।।**

**लोको न कदाचिन्नाऽऽसीत्**, अपि तु सदैवासीत्। **न कदाचिन्न भवति**, अपि तु सदैव भवति। **न कदाचिन्न भविष्यति**, अपि तु सदैव भविष्यति। किमुक्तं भवति - **अभवत् - भवति भविष्यति च**, कालत्रयेऽप्यस्यावस्थानमिति **ध्रुवः**, मेर्वादिवत्। ध्रुवत्वादेव सदैव **नियतः**, चतुर्गतिषु संसारवचनवत्, नियतत्वादेव **शाश्वतः** - शश्वद्भवनस्वभावः, शाश्वतत्वादे-**वाक्षयः**, तत्प्रदेशमात्रस्यापि क्षयविरहात्, अक्षयत्वादे**वाव्ययः**, मानुषोत्तराद्बहिः समुद्रवत्। अव्ययत्वादेव सदैव प्रमाणेऽ-**वस्थितः**, जम्बूद्वीपादिवत्, एवं च सदावस्थानेन **नित्यः**,



आकाशवत्।

निदर्शनेन व्यक्तीविधत्ते - **ते यथानामकाः पञ्चास्तिकायाः** - जीवधर्माधर्मपुद्गलाकाशलक्षणाः, **न कदाचिन्नासन् यावन्नित्या एवमेव लोकोऽपि न कदाचिन्नासीद्यावन्नित्यः**।

प्रकृताध्ययनपरिणतिफलमाह-

**एवं से सिद्धे बुद्धे विरते विपावे दंते दविए अलंताती णो पुणरवि इच्चत्थं हव्वमागच्छति।। त्ति बेमि।।**

**एवमि**त्यादि प्राग्वत्। इत्येकत्रिंशत्तमस्य पार्श्वीयाध्ययनस्य वाचनान्तर आर्षोपनिषद्।

### ।। अथ द्वात्रिंशत्तमोऽध्यायः ।।

अनन्तराध्ययने संवरोपदेशोऽभिहितः, अत्र तु स एवोपमानेनाभिधीयते -

**''दिव्वं भो किसिं किसेज्जा णो अप्पिणेज्जा'' पिंगेण माहणपरिव्वायएणं अरहता इसिणा बुइतं।।३२-१।।**

**दिव्य**मित्यादि प्राग्वत् **(ऋषिभाषिते २६-८)**। केनैव-मुक्तमित्याह - **पिङ्गेन ब्राह्मणपरिव्राजकेनार्हतर्षिणोदितम्**। दिव्यकृष्युपदेष्ट्रा स्वयमप्यवश्यं तत्कर्त्रा भाव्यम्, किन्तु नास्य तथाविधसाधनलेशोऽपि दृश्यत इत्याशङ्क्य कश्चित् प्रश्नयति -

**कतो छेत्तं ? कतो बीयं ? कतो ते जुग-णंगला ?।**
**गोणा वि ते ण पस्सामि अज्जो ! का णाम ते किसी ?**
**।।३२-२।।**

**कुतः क्षेत्रम्** ? किम्पार्श्वतो तव क्षेत्रं वर्तते ? क्व तव क्षेत्रं

विद्यत इति प्रश्नयितुराशयः। **कुतो बीजम्** ? कृषिविधौ व्यापार्यमाणं तव बीजमपि क्व ? **कुतश्च ते युगलाङ्गले** वोढृस्कन्धकाष्ठहललक्षणे ? **हे आर्य ! ते गावावपि न पश्यामि** ? न ते बलीवर्दावपि मे दृष्टिगोचरीभवतः, न केवलं क्षेत्राद्येव तव न पश्यामि, गावावपि दृगविषयावित्**यपि**शब्दार्थः। अतोऽदर्शनानुमितं तदसद्भावमेव वितर्क्य पृच्छामि – **का नाम ते कृषिः** ? नैषा घटाकोटिमाटीकते, निःसाधनायाः सिद्धेरसम्भ-वादित्याशयः। अत्रोत्तरयति –

**[1]आता छेत्तं, तवो बीयं, संजमो जुग–णंगला।**
**अहिंसा समिती जोज्जा एसा धम्मंतरा किसी।।**
**।।३२–३।।**

**आत्मे**त्यादि प्राग्वत् **(ऋषिभाषिते २६–९)**, अस्यां कृषि-प्रक्रियाया**महिंसा समिति**श्च **योज्या**, अत्रोपलक्षणात्सत्यादेर्ग्रहः, समितिशब्देनेर्यादिपञ्चकसङ्ग्रहो बोध्यः। एतद्योजनप्रयोजनं च शस्यनिष्पत्तिरेव, सहकारिविकलस्य बीजमात्रस्य तन्निष्पत्ताव-प्रत्यलत्वात्। **सैषा धर्मान्तरा**–लोकोत्तरधर्मरूपा **कृषिः**। लौकिक-कृषिसाधनादर्शनेनानुमितस्तदसद्भावस्तु यथार्थ एव, किन्तूक्त-कृषिस्तु मम विद्यत एव, आत्मादितत्साधनसद्भावादित्यभिप्रायः।

ननु लौकिकायामपि कृषौ क्षेत्रादि भवति, अस्यामपि, तदा कोऽस्या विशेष इति चेत् ? अत्राह –

१. तुलना - सुत्तनिपाते तुर्ये कसिभारद्वाजसुत्ते द्वितीयं विवरणम्।



**एसा किसी [1]सोभतरा अलुद्धस्स वियाहिता।**
**एसा बहुसई होइ परलोकसुहावहा।।३२–४।।**

**एषा** – लोकोत्तरा **कृषि**र्लौकिकायाः सकाशात् **शुभतरा**, एतेनास्याः स्वरूपमुक्तम्। **अलुब्धस्य** – विनिवर्तितविषयतृष्णस्य, **व्याख्याता** – प्रवचने प्रतिपादिता, एतेनास्या अधिकारी ज्ञापितः। एतदुक्तं भवति, यः कोऽपि विषयेष्वलुब्धोऽनुत्कटमोहः सोऽस्या अधिकारी, न तु ब्राह्मणादिरेवेति स्फुटीभविष्यत्यनन्तरवृत्त एव।

त**थैषा बहुसती** – अतिसाध्वी, **भवति**, यतः परलोकेऽपि सुखावहा– **परलोकसुखावहा**, एतेनास्याः फलमावेदितम्। इत्थं चास्यां लौकिककृषिवत्फलव्यभिचारिताया अभावात्, एकान्ति-कात्यन्तिकफलभावात्, उभयलोकहितत्वाच्च स्फुटमेवातिशयित्व-मिति सिद्धमेवास्याश्शुभतरत्वम्। उपलक्षणमेतत् तेन क्रमेण सिद्धिसम्पादकताऽप्यस्या द्रष्टव्येत्याह –

**एयं किसिं कसित्ताणं सव्वसत्तदयावहं।**
**माहणे खत्तिए वेस्से सुद्दे वा वि य सिज्झती।।**
**।।३२–५।।**

**एतामि**त्यादि प्राग्वत् **(ऋषिभाषिते २६–१६)**। पर्यवसितमाह–

**एवं से सिद्धे बुद्धे विरते विपावे दंते दविए अलंताती णो पुणरवि इच्चत्थं हव्वमागच्छति।। त्ति बेमि**।। **एवमि**त्यादि प्राग्वत्। इति द्वात्रिंशत्तमे पिङ्गाध्ययन आर्षोपनिषद्।

१. क.ण. - सोभरता। ख - सोततरो। ग - सोभ(सुद्ध)तरा। घ.च.छ.ढ.त.ध.प.न.फ - सोभतरा। ज.ट.ठ.थ - सोततरा।

## ।। अथ त्रयस्त्रिंशत्तमोऽध्यायः।।

अनन्तराध्ययने दिव्यकृषिरभिहिता, तस्यां च स्तेनस्थानीया बालजीवा विघ्ना भवन्ति, सहायाश्च सज्जनस्थानीयाः पण्डित-जीवाः, अतस्तेषां परिहारपरिचर्यासिद्धयेऽत्र तान् विवेचयन्नाह –

**दोहिं ठाणेहिं बालं जाणेज्जा,**
**दोहिं ठाणेहिं पंडितं जाणेज्जा–**
**सम्मा–मिच्छापओतेणं,**
**कम्मुणा भासणेण य।।३३–१।।**

**द्वाभ्यां स्थानाभ्यां बालं जानीयात्**– वक्ष्यमाणलक्षण-द्वयेनायं बाल इति लक्ष्यपरिज्ञानं कुर्यादित्यर्थः। एवं **द्वाभ्यां स्थानाभ्यां पण्डितं जानीयात्**। स्थान एव स्पष्टमाचष्टे – **सम्य-ग्मिथ्याप्रयोगेण कर्मणा भाषणेन च**। एतदुक्तं भवति – सम्यक् प्रयोगो यस्य तत् – सम्यक्प्रयोगम् – समीचीनतया प्रयुक्तमित्यर्थः, स्वरूपतो सुन्दरस्याऽप्यसम्यक् प्रयुक्तस्यासुन्दरत्वापत्तेरित्थ-मभिधानमिति ध्येयम्। एवं मिथ्याप्रयोगमित्यत्रापि ज्ञातव्यम्। प्रत्येकं कर्मविशेषणमिदम्, तेन **कर्मणा** – कृत्येन **भाषणेन** – वाचा च।

ननु दुष्टादुष्टमनोऽपि तल्लिङ्गं भवतीति न्यूनतेति चेत् ? न, तस्यार्वाग्दृशामगोचरत्वेन प्रकृतेऽनुपयोगात्, अर्वाग्दृश एवोद्दिश्य प्रस्तुतोपदेशस्योपदिष्टत्वाच्च। साम्प्रतमेत एव स्थाने व्यासत आह–

**दुभासियाए भासाए दुक्कडेण य कम्मुणा।**
**बालमेतं वियाणेज्जा कज्जाकज्जविणिच्छए।।**
**।।३३–२।।**



**दुर्भाषितया भाषया**, एतच्चाहिताप्रियत्वादिना स्वरूपतो दुष्टत्वात्, असम्यक् प्रयुक्तत्वाद्वा, **दुष्कृतेन च कर्मणा**, उक्त-हेतुद्वयेनैवात्रापि दुष्टता प्रत्येया। एतत् कार्यम् – करणीयम् – कर्तुमुचितमिति यावत्, इतरं त्वकार्यम्, उक्तविपरीतम्, एवं कार्याकार्ययोर्विशेषेण निश्चयो यस्यासौ **कार्याकार्यविनिश्चयः**, स **एतम्** – दुर्वाक्कर्मविशिष्टं यं कञ्चित्, **बालम्** – बालवद-ज्ञतया हितेतरविवेकशून्यम्, **विशेषेण** – अव्यभिचारिलक्षणलक्षि-ततया, **जानीयात्** – अवगच्छेत्। यद्वा **कार्याकार्यविनिश्चय**-विधावयं **बालः** – अज्ञः **इत्येनं विजानीयादि**त्यर्थः। पण्डितपरि-ज्ञानोपायमाह–

**सुभासियाए भासाए सुकडेण य कम्मुणा।**
**पंडितं तं वियाणेज्जा धम्माधम्मविणिच्छये।।**
**।।३३–३।।**

**सुभाषितया** – हितमितप्रियलक्षणया शोभनया भाषितया, **भाषया** – वाचा, **सुकृतेन** – स्वपरहितानुबन्धितया विहितेन, **कर्मणा** – कृत्येन, **चः** – समुच्चये। अयं धर्मोऽधर्मोऽयमिति विशेषेण – अविपर्यस्तरूपेण निश्चयो यस्य स **धर्माधर्मवि-निश्चयः, तम्** – सद्वचनादिविभूषितम्, **पण्डितम्** – तत्त्वानु-गामिनीप्रज्ञासम्पन्नत्वेनात्मपरहितनिबन्धनम्, **विजानीयात्** – परिज्ञानगोचरीकुर्यात्।

यद्वाऽयं **धर्माधर्मविनिश्चये पण्डितः** – विचक्षणः, इति **तं विजानीयादि**त्यर्थः। दुर्भाषितादीनेवोपमया स्पष्टयति –

**दुभासियाए भासाए दुक्कडेण य कम्मुणा।**
**[1]जावखेव महंतं तु उसु वाया व सिंचति।।३३-४।।**

**दुर्भाषितया भाषया दुष्कृतेन च कर्मणा, जापः** - देवताद्याराध्यस्य सततं संस्मरणफलम्, हेतौ फलोपचारात्, जापानुभावाभिमतवस्तु - इति यावत्, तस्य **क्षेपः** - न्यासः, स्वस्मिन् प्रतिष्ठा, फलावाप्तिरिति यावत्, तम्, लुप्तद्वितीयान्तो निर्देशः प्राकृतत्वात्। **महत्** - काङ्क्षत्, चित्तमिति गम्यते। **ऊषम्** - क्षारभूमिम्, **वाचा** - वाङ्मात्रेण **सिञ्चतीव** - शस्याशया सेकाधिकरणीकुरुत इव। अत्र प्रथमं तु तावदुषपृथिव्यां सिञ्चनमेव निष्फलम्, तदपि चेद्वाङ्मात्रेण, तदा तु किं वाच्यमित्यन्तनिष्फलत्वसाधर्म्यान्निदर्शनौचित्यम्। तद्वद्दुष्टवाक्कर्मकलङ्कितस्य यत्किञ्चिदाराधनाप्रयासोऽप्यत्यन्तं विफल एवेति भावः। इतरगोचरमाह -

**सुभासियाए भासाए सुकडेण य कम्मुणा।**
**पज्जण्णे कालावासी वा जसं तु अभिगच्छति।।**
**।।३३-५।।**

**सुभाषितया भाषया, सुकृतेन च कर्मणा, कालवर्षी पर्जन्य इव** योग्यकाले वर्षाकारी जलधर इव सफलतां लभते, यद्यत्कृत्यं कुरुते तत्तत् सफलीभवति, अत एव **यशस्तु**-कीर्तिमेव, **अभिगच्छति** - प्राप्नोति - अपयशोमूलवैफल्यविरहात्, वागादि-

१. ख.ट.थ - जावखेवमहंतं। ग - जोगक्खेम वहंतं। घ.त - जोगकखेमं वहन्तं। च - जोगक्खेमं वहंतं। न.ध.ण.ज.ठ.ढ - जोवखेवमहंतं। प - जोपखेवमहंतं। फ - जोवखेवमंहंतं।



दोषविरहेण लोकप्रियीभवनाच्च। अतो नित्यमेव पण्डितजनैरेव संसर्गः करणीयः, महागुणस्वरूपसुभाषितादिशालित्वात्तेषाम्, एतदेव व्यतिरेकेणाह-

**णेव बालेहिं संसग्गिं णेव बालेहिं संथवं।**
**धम्माधम्मं च बालेहिं णेव कुज्जा कदायि वि।।**
**।।३३-६।।**

**बालैः** - उक्तलक्षणैः सह **संसर्गम्** - पार्श्वसेवादि, कदापि **नैव** कुर्यात्। **बालैः** सह **संस्तव**मपि परिचय - आलापप्रमुखमपि **नैव** कुर्यात्। तथा **धर्माधर्मम्** - पदैकदेशे पदसमुदायोपचारात् धर्माधर्मविषया शास्त्रवार्त्तेत्यर्थः, तं **च बालैः** सह **कदापि नैव कुर्यात्**। यतो कृतबालसंसर्गः -

**इहेवाकित्ति पावेहिं पेच्चा गच्छेइ दोग्गतिं।**
**तम्हा बालेहिं संसग्गिं णेव कुज्जा कदायि वि।।**
**।।३३-७।।**

**इहैव** - इह भव एव, **अकीर्तिम्** - अयमप्येतादृश एवेत्याद्याकारकमपयशः, **प्राप्नोति**- स्वविषयतयाऽधिगच्छति, चौरग्रामे निवासकारिसज्जनवत्। उक्तं च- पक्कणकुले वसंतो सउणीपारोऽवि गरहिओ होइ। इय गरहिया सुविहिया मज्झि वसंता कुसीलाणं - इति **(आवश्यकनिर्युक्तौ - ११२६)**। **प्रेत्य** पुनः **दुर्गतिम्** - नरकादिलक्षणाम्, **गच्छति** - बालसंसर्गानुभावानुसङ्क्रान्तदोषसन्दोहप्रयुक्तक्लिष्टकर्मविपाकेनानुयाति। **तस्मात्** - उक्तापायभयात्, **बालैः** सह **कदापि नैव संसर्गं कुर्यात्**। कैस्तर्हि

कुर्यादित्याह–

**साहूहिं संगमं कुज्जा साधूहिं चेव संथवं।**

**धम्माधम्मं च साहूहिं सदा कुव्वेज्ज पंडिए।।३३–८।।**

**साधुभिः** – सुविहिताचरणशालिभिः, सह **सङ्गमम्** – पार्श्वसेवाम्, **कुर्यात्** – विदधीत, **साधुभिरेव संस्तवम्** – परिचर्यालापसंलापादिम्, कुर्यात्, **पण्डितः** – आत्महिततत्वानुसारिणीप्रतिभापूतात्मा, **सदाऽपि साधुभिरेव** सह **धर्माधर्मम्** – धर्माधर्मगोचरां विचारणाम्, **चः** – समुच्चये, **कुर्यात्**। यतः –

**इहेव कित्तिं पाउणति पेच्चा गच्छइ सोगतिं।**

**तम्हा साधूहिं संसग्गिं सदा कुव्विज्ज पंडिए ।।**

**।।३३–९।।**

**इहैव** – इह लोक एव, **कीर्तिम्** – सज्जनसंसर्गसञ्जनितजनश्लाघाम्, **प्राप्नोति**। **प्रेत्य** च **सुगतिम्** – सुदेवसुमनुष्यलक्षणाम्, **गच्छति** – सत्संसर्गानुभावानुसङ्क्रान्तसदाचारसम्बद्धसत्कर्मविपाकेनानुयाति। अत्रानुयातीति तेषामेव सतां सद्गतिं गच्छतामनुगमनं करोतीत्यर्थः, बलदेवमुनिसान्निध्यसेवकहरिणवत्। **तस्मात् पण्डितः सदाऽपि साधुभिरेव संसर्गं कुर्यात्**। उक्तं च – परिचरितव्याः सन्तो यद्यपि न कथयन्ति कञ्चिदुपदेशम्। यास्तेषां स्वैरकथास्ता एव भवन्ति शास्त्राणि – इति। एवं हि कदाचित्क्लिष्टकर्मोदयात्सम्भाव्यमानात्पतनादपि रक्षणं भवति, तदाह – यद्यपि निर्गतभावस्तथाऽप्यसौ रक्ष्यते सद्भिरन्यैः। वेणुर्विलूनमूलोऽपि वंशगहने महीं नैति – इति (**धर्मबिन्दुवृत्तावुद्धरणम्**)। एवं च स्फुट एव दुर्गतिनिरोधः, सद्गतिध्रौव्यं च, विपर्ययश्च विपर्यये, अन्वाह– यदि सत्सङ्गनिरतो भविष्यसि भविष्यसि। अथासज्जनगोष्ठीषु पतिष्यसि पतिष्यसि – इति (**धर्मबिन्दुवृत्तावुद्धरणम्**)।



इतश्च सत्सङ्ग आसेव्यः, धर्मश्रवणस्यान्यथानुपपत्तेः, तस्य च महाफलत्वात्, यतः –

**खइणं पमाणं वत्तं च देज्जा [1]अव्वीति यो धणं।**

**सद्धम्मवक्कदाणं तु अक्खयं अमतं व तं।।३३–१०।।**

**यो धनं दद्यात्**, स **क्षयिनम्** – क्षयशीलं पदार्थम्, **प्रमाणम्** – नियतप्रमाणोपेतत्वेन परिमितम्, **वार्त्तम्** – असारम्, राजदायादादिसाधारणत्वात्, सपदि ज्वलनादिनाश्यत्वात्, प्रायो ममत्वमात्रफलत्वात्, सुखानुदान एकान्तिकसामर्थ्यविरहितत्वाच्च। **अर्वागेवैति** – अनुयातीति – अर्वागेति – प्राकृतत्वात् – **अव्वीति** – रूपसिद्धिः, मरणकाले त्ववश्यमेव वियुज्यत इति हृदयम्, **चः** – विशेषणसमुच्चये। एतादृशमेव वस्तु धनदाता ददातीत्यत्र न कोऽप्यतिशयः। कुत्रस्तर्ह्यतिशय इत्याह– **यस्तुः**– पुनः सद्धर्मवाक्यं ददाति – सद्धर्मं श्रावयति तेन दत्तं **सद्धर्मवाक्यलक्षणं दानमक्षयम्** – तदवाप्य फलस्याक्षयत्वात्, अत एव नैतत्परिमितम्। नापि वार्त्तम्, अनपहार्यत्वात्, सद्यः सानुबन्धशर्मबीजत्वाच्च। सङ्क्षेपत आह – **यद्वा तदमृत**मेव, सुधासरूपस्य जिनवचनस्यामरत्वप्रदानप्रत्यलत्वात्, आह च– पीतामृतेष्वपि महेन्द्रपुरःसरेषु, मृत्युः

१. ग - अच्चाति। घ.च.छ.त - अज्जति। झ - अज्जेति। थ.ज - अव्वीति।

स्वतन्त्रसुखदुर्ललितः सुरेषु। वाक्यामृतं तव पुनर्विधिनोपयुज्य, शूराभिमानमवशस्य पिबन्ति मृत्योः –इति (**सिद्धसेनी द्वात्रिंशिकायाम् २-४**)। अत एतदेव परमार्थतोऽमृतम्, अपरत्र वाङ्मात्रत्वादिति सिद्धम्। तस्मात्–

**पुण्णं तित्थमुवागम्म पेच्चा भोज्जाहि जं फलं।**
**सद्धम्मवारिदाणेणं खिप्पं सुज्झति माणसं।।**

**।।३३-११।।**

**पुण्यम्** – वक्ष्यमाणरीत्या मनोविशुद्धिहेतुत्वेन पवित्रम्, **तीर्थम्** – संसारसागरनिस्तारकम्, एतच्च साधुजनविशेषणम्, यदाह – साधूनां दर्शनं पुण्यं, तीर्थभूता हि साधवः। तीर्थं फलति कालेन, सद्यः साधुसमागमः – इति। तदेतत् तीर्थ**मुपागम्य** धर्मश्रोता **प्रेत्य यद**स्य पूर्वोक्तममृतात्मकं **फलं** तद् **भुञ्ज्यात्**।

उक्तफलावाप्तिरपि शुभानुबन्धिपुण्यवशात्, तदपि तथाविधमनःपरिणामविशुद्ध्येति धर्मश्रवणस्यैतदेवानन्तरफलत्वेन साक्षादाह– **सद्धर्म** एव **वारि** जलम्, मलशोधनसाधर्म्यात्, तस्य **दानेन** – धर्मवाक्यश्रावणेनेत्याशयः, **क्षिप्रम्** – झटिति, योग्ये श्रोतरि तत्फलोत्पत्तौ कालक्षेपायोगात्, **मानसम्** – अन्तःकरणम्, **शुध्यति**–भावमलापगमेन निर्मलीभवति। अधर्मवाक्यं तु विपरीतफलमित्याह–

**सब्भाववक्कविवसं सावज्जारंभकारकं।**
**दुम्मित्तं तं वियाणेज्जा उभयोलोयविणासणं।।**

**।।३३-१२।।**



**स्वभावेन** – प्रकृत्यैव, यदुत्सूत्रत्वादिदोषदुष्टं **वाक्यम्** – वचनम्, तद्वक्तुं **विवशम्** – परतन्त्रम्, अयं भावः – उत्सूत्रादेः कटुविपाकत्वेऽपि तथाविधभवितव्यतादेरसाववशतया तदेव वक्तीति। तथा **सावद्यः** पापसहितः, **आरम्भः**–गृहनिर्वर्तनादिविषय उपक्रमः, तस्य **कारकः** – कारयिता, न चैतद्विषयप्रेरणमपि युज्यते, अनर्थदण्डापत्तेः, किन्त्वसौ धाष्टर्यमवलम्ब्य तमुपदिश्य कारयतीति। उपलक्षणमेतत्, तेनान्याऽप्यस्य तथाविधा स्वपरापकारकहेतुता द्रष्टव्या। तदेवमुत्सूत्रभाषणादिदोषदुष्टं **तं दुर्मित्रम्** – दुष्टहृदं नामसुहृदम्, अभिधानमात्रेण मित्रं परमार्थशत्रुमित्यर्थः, **उभयलोकयोः** – इहपररूपयोः, **विनाशनम्** – सुखलेशोच्छेदकम् **विजानीयात्** – श्रुतप्रज्ञाचक्षुषाऽवगच्छेत्। यतः – सप्पो इक्कं मरणं कुगुरु अणंताइं देइ मरणाइं। तो वरि सप्पं गहिउं मा कुगुरुसेवणं भद्द ! इति (**षष्टिशतके ३७।।**)। भवति हि दुर्मित्रसेवया दौर्गत्यादिदुःखम्, उक्तं च – अमित्तो मित्तवेसेण कंठे घेत्तूण रोयइ। मा मित्ता सुग्गइं जासु दो वि गच्छामु दोग्गइं – इति (**सूत्रकृते १-३-२ वृत्तौ**) कस्तर्हि सन्मित्रमित्यत्राह –

**सम्मत्तणिरयं धीरं सावज्जारंभवज्जकं।**
**तं मित्तं सुट्ठु सेवेज्जा उभओलोकसुहावहं।।**

**।।३३-१३।।**

**सम्यक्त्वम्** – प्रशमादिव्यक्तीभवन् शुभात्मपरिणामः, तस्मिन् **निरतम्** – सततं परिणतम्। धिया सम्यग्ज्ञानपूतप्रज्ञया राजत इति **धीरः**, तम्। तथा **सावद्यारम्भस्य वर्जकम्** – त्रियोगकरणशुद्ध्या

त्यागिनम्, एवं सम्यग्दर्शनज्ञानचारित्रविभूषिततया स्वपरयोर्हित-हेतुत्वेनो**भयलोकसुखावहं, तं मित्रं** - सद्गुरुं, **सुष्ठु** सम्यग्प्रीत्या, यथा दरिद्रादिरीश्वरादिं सेवते तथा प्रयत्नपुरस्सरमित्यर्थः **सेवेत** - पर्युपासेत, तत्र बहुमानादियुक्ततया तदाज्ञाचरो भवेदिति यावत्, उक्तं च - सेवेज्ज धम्ममित्ते विहाणेण, अंधो विय अणुकड्ढगे, वाहिओ विव वेज्जे, दरिद्दो विय ईसरे, भीओ विव महानायगे। न इओ सुंदरतरमन्नं ति बहुमाणजुत्ते सिया, आणाकंखी, आणापडिच्छगे, आणा अविराहगे, आणानिप्फायगे त्ति - इति **(पञ्चसूत्रे २)**।

ननु निरर्थकोऽयमुपदेशः, मित्रामित्रयोरकिञ्चित्करत्वात्। एतच्च मणिकाचज्ञातेनैव सिद्धम्, यदाह- एकत्र विनिवेशेऽपि काचः काचो मणिर्मणिः - इति **(त्रिषष्टिशलाकापुरुषचरित्रे)** चेत् ? न, मण्यादेरभावुकद्रव्येनोदाहरणवैषम्यात्, जीवस्य भावुक-द्रव्यत्वात्, पवनादिवदित्याह-

**संसग्गितो पसूयंति दोसा वा जइ वा गुणा।**
**वाततो मारुतस्सेव ते ते गंधा सुहावहा।।३३-१४।।**

**दोषा वा** - कुशीलत्वादयः, **यदि वा गुणाः** - सुशील-त्वादयः, **संसर्गतः** - दुर्मित्रमित्रसंस्तवादेः, **प्रसूयन्ते** - प्रागसन्तोऽपि समुद्भवन्ति। **वाततः** कृतचन्दनवनादिसम्पर्कात् पवनतः, **मारुतस्येव** - अपरसमीरणस्येव, **ते ते शुभावहा गन्धा** भवन्ति - तादृश-तादृशमनोज्ञसुरभिहेतुकसुखनिबन्धनानि जायन्त इत्यर्थः। एवं नगरनिर्धमनादिदिश आगतस्य वातस्य दुरभिताऽप्यूह्या।



तद्वद्भावुकद्रव्यस्य जीवस्य गुणदोषभावो द्रष्टव्यः, उक्तं च - जीवो अणाइनिहणो तब्भावणभाविओ य संसारे। खिप्पं सो भाविज्जइ मेलणदोसाणुभावेणं।। अंबस्स य निम्बस्स य दुण्हंपि समागयाइं मूलाइं। संसग्गीइ विणट्ठो अंबो निबंत्तणं पत्तो - इति **(आवश्यक-निर्युक्तौ ११२९-११३०)**। निदर्शनान्तरमाह -

**संपुण्णवाहिणीओ वि आवन्ना लवणोदधिं।**
**पप्पा खिप्पं तु सव्वा वि पावंति लवणत्तणं।।**
**।।३३-१५।।**

**सम्पूर्णवाहिन्योऽपि** - विमलमधुरसलिलपरिपूर्णतटिन्योऽपि, आसतां कलुषितपानीया नद्य **इत्यपि**शब्दार्थः। **लवण**-रस**मुदधिम्** - समुद्रम् - **लवणोदधिम्, आपन्नाः**, प्रतिगता मिलिता इत्यर्थः, तं सागरं **प्राप्य तु क्षिप्रम्** - त्वरितम्, **सर्वाः** - निःशेषा **अपि** तास्तरङ्गिण्यः, **लवणत्वं प्राप्नुवन्ति**, स्वसंसर्गाधिकरणदोषानुषङ्गेन तद्दोषदुष्टा भवन्तीत्यर्थः, अन्वाह- जह नाम महुरसलिलं सायरसलिलं कमेण संपत्तं। पावेइ लोणभावं मेलणदोसाणुभावेणं।। एवं खु सीलवंतो असीलवंतेहिं मीलिओ संतो। पावइ गुणपरिहाणिं मेलणदोसाणुभावेणं।। खणमवि न खमं काउं अणाययणसेवणं सुविहियाणं। हंदि समुद्दमइगयं उदयं लवणत्तणमुवेइ - इति **(आवश्यकनिर्युक्तो ११३३-११३५)**। दृष्टान्तान्तरमाह-

**समस्सिता गिरिं मेरूं णाणावण्णा वि पक्खिणो।**
**सव्वे हेमप्पभा होंति तस्स सेलस्स सो गुणो।।**
**।।३३-१६।।**

सुगमम्। उक्तं च - उत्तमगुणसंसग्गि, सीलदरिद्दं पि कुणइ सीलड्ढं। जह मेरुगिरिविलग्गं तणं वि कणगत्तणमुवेइ - इति। अत्र शीलगुणानुसङ्क्रमोदाहरणमेव दार्ढ्यार्थमुपन्यस्यति -

**कल्लाणमित्तसंसग्गिं संजयो मिहिलाहिवो।**
**फीतं महितलं भोच्चा तम्मूलाकं दिवं गतो।।**
**।।३३-१७।।**

**मिथिलाधिपः** - मिथिलानगरीस्वामी, **संयतः**, स्वनाम-ख्यातो राजा, कल्याणप्रयोजकं मित्रम् - **कल्याणमित्रम्**, तस्य **संसर्गं** कृत्वा, प्रागवस्थायां **स्फीतम्** - विस्तीर्णम्, **महीतलम्** - वसुन्धरातलम्, **भुक्त्वा**, स्वकीयराज्यलक्ष्मीतयोपभोगं कृत्वा, **तन्मूलकम् - सः**- कल्याणमित्रसंसर्गः, यथा **मूलम्** - निबन्धनं स्यात्तथा, **दिवम्** - स्वर्गम्, **गतः** प्राप्तः, सत्सङ्गानुभावानुषक्त-शीलादिगुणपरिणतिप्रभावेन सुरालयमाससादेत्याशयः।

एष च राजा तृतीयाङ्गोदितः श्रीवीरस्वामिप्रव्राजितनृपाष्टक-मध्यगतः सम्भाव्यते, यथोक्तम् - समणेणं भगवता महावीरेण अट्ठ रायाणो मुंडे भवेत्ता अगारातो अनगारितं पव्वाविता, तं० - वीरंगय वीरजये **संजय** - एणिज्जते य रायरिसी। सेयसिवे उदायणे (तह संखे कासिवद्धणे) - इति **(स्थानाङ्गे ८-७३२)**।

क एवमाहेत्यत्र प्रतिविधत्ते -

**अरुणेण महासालपुत्तेण अरहता इसिणा बुइतं।**
**अरुणेन महासालपुत्रेणार्हतर्षिणोदितम्**। उपसंहरति -
**सम्मत्तं च अहिंसं च सम्मं णच्चा जितिंदिए।**



**कल्लाणमित्तसंसग्गिं सदा कुव्वेज्ज पंडिते।।**
**।।३३-१८।।**

तस्मात् **जितेन्द्रियः** - अमित्रसंस्तवादौ प्रतिषिद्धेन्द्रियः, **सम्यक्त्वम्** - सम्यग्दर्शनम्, एतेन सम्यग्ज्ञानग्रहः, सहभावित्वात्। **अहिंसाम्** - सम्यक्चारित्रम्, **चौ** - समुच्चये। एतत्त्रितयमेव **सम्यक्** समीचीनमिति **ज्ञात्वा** - प्रवचनेन प्रतिपद्य **पण्डितः** - मित्रामित्रपरिज्ञानपटुमतिः, **सदा** - नित्यम्, **कल्याणमित्रसंसर्गं कुर्यात्**। तत एव सद्दर्शनादिसम्प्राप्तेस्तद्विशुद्धेश्च सम्भवात्। तदेतत् कल्याणमित्रसंसर्गस्यानन्तरं फलम्, साम्प्रतं परम्परफलं साक्षादेवाभिदधन्नाह -

**एवं से सिद्धे बुद्धे विरते विपावे दंते दविए अलंताती णो पुणरवि इच्चत्थं हव्वमागच्छति।। त्ति बेमि।।**

**एवम्** - नित्यं कल्याणमित्रसंसर्गात्, **सः** - तत्संसर्गकृत्, **सिद्ध** इत्यादि प्राग्वत्। इति त्रयस्त्रिंशत्तमेऽरुणीयाध्ययन आर्षोपनिषद्।

## ।। अथ चतुस्त्रिंशत्तमोऽध्यायः।।

अनन्तराध्ययने बालस्थानीयामित्रपरिहार उपदिष्टः, तं परिहरतोऽपि कदाचिद् भवितव्यतादियोगात्ततः परीषहादिसम्भवः स्यात्, अतस्तत्कालोचितं कर्तव्यमाह-

**पंचहिं ठाणेहिं पंडिते बालेणं परीसहोवसग्गे उदीरिज्जमाणे सम्मं सहेज्जा खमेज्जा तितिक्खेज्जा अधियासेज्जा - बाले खलु पंडितं परोक्खं फरुसं**

**वदेज्जा। तं पंडिते बहुमणेज्जा – ''[1]दिट्ठे मे एस बाले परोक्खं फरुसं वदति, णो पच्चक्खं, मुक्खसभावा हि बाला, ण किंचि बालेहिंतो ण विज्जति।'' तं पंडिते सम्मं सहेज्जा खमेज्जा तितिक्खेज्जा अहियासेज्जा १।**

**पञ्चभिः स्थानैः** – सहनशीलताद्यालम्बनैः, **पण्डितः** – वक्ष्यमाणस्थानविशारदः, **बालः** – तुमंसि नाम सच्चेव जं हंतव्वं ति मन्नसि – इत्यादिसिद्धान्तानभिज्ञः, तेन, **उदीर्यमाणान्** – बलादप्युदयं प्राप्यमाणान्, **परीषहोपसर्गान् सम्यक्** – परमानन्दरसमनुपिबन्निव, **सहेत**, भयाभावेनाविचलनात् **(स्थानाङ्गे–५–१–४४३।।)**। **क्षमेत**, क्षान्त्या। **तितिक्षेत**, अदीनतया। **अध्यासीत** – परीषहादावेवाधिक्येनासीत, न चलेदित्यर्थः।

अत्राऽऽद्यं स्थानमाह – **बालः खलु पण्डितं परोक्षम्** – तस्याशृण्वतः **परुषम्** – जात्युद्घटनादि कठोरं वचनं **वदेत्**। **तत् पण्डितो बहुमन्येत**, किं सम्प्रधार्येत्याह– **दिष्ट्या एष बालो मे** – मह्यम्, मद्विषयमिति यावत् **परोक्षं परुषं वदति**। **न प्रत्यक्षम्**। यद्वा दिट्ठे – इति **द्विष्टः**, मद्विषयद्वेषसहित इत्यर्थः, शेषं प्राग्वत्। **हि** – यस्मात्, मूर्ख इव स्वभावः – प्रकृतिः, येषां ते **मूर्खस्वभावा बालाः**, न हि ते विदन्ति यदन्यस्मै परुषवदने ममैव परुषफलं भविष्यन्तीत्यज्ञा एत इति भावः। तस्मान् **न किञ्चिद्**

१. ख.ज.ट.थ.प.फ.ध - दिट्ठे एस समे बाले। ग.द - दिट्ठे मे एस बाले। घ.च.छ.झ.त - दिट्ठा मे एस बाले। ढ - दिट्ठे एस मे बाले।



**बालेभ्यो न विद्यते**, नैषोऽपायो यो बालैः परस्य न क्रियते। उक्तं च – नास्ति क्लिष्टसत्त्वानामकृत्य–मिति। सर्वमपि यावदति–जघन्यमपि तैः क्रियमाणं सम्भवत्येवेत्यहं तु केवलं परोक्षमाक्रुष्टः, न तु प्रत्यक्षं परुषं भाषितोऽपीति किं ममैतन्मात्रेण, अति–सुसहमेवैतदिति विभाव्य **तत् पण्डित** इत्यादि प्राग्वत्। द्वितीयं स्थानमाह –

**बाले खलु पंडितं पच्चक्खमेव फरुसं वदेज्जा। तं पंडिए बहुमण्णिज्जा – ''[1]दिट्ठे मे एस बाले पच्चक्खं फरुसं वदति, णो [2]दंडेण वा लट्ठिणा वा लेट्ठुणा वा मुट्ठिणा वा बाले कवालेण वा अभिहणाति तज्जेति तालेति परितालेति परितावेति उद्दवेति। मुक्खसभावा हि बाला, ण किंचि बालेहिंतो ण विज्जति।'' तं पंडिते सम्मं सहेज्जा खमेज्जा तितिक्खेज्जा अहियासेज्जा २।**

पूर्वानुसारेण नेतव्यम्। नवरम् – **दिष्ट्ये**ति सद्दैवेन **न दण्डेन वा लष्ट्या वा लेष्टुना वा मुष्ट्या वा बालः कपालेन वाऽभिहन्ति** – आभिमुख्येन प्रद्वेषजनितेन घातं कुरुते, **तर्जयति** – शिरोऽङ्गुल्यादिस्फोरणतो ज्ञास्यसि रे जाल्म ! इत्यादि भणति,

१. घ.च.झ.त - दिट्ठा मे। ख.ग.ज.ठ.ढ.ण.थ.ध.प.फ - दिट्ठे मे। २. ख.ज.ठ.थ. - णो दंडेण वा लहिणा वा मुट्ठिणा बालो कवालेण वा। ग - णो दंडे वा लट्ठिणा वा (लेट्ठुणा वा) मुट्ठिणा वा बाले कवालेण वा। घ.च.झ - णो दण्डेण वा लट्ठिणा वा लेट्ठुणा वा मुट्ठिणा वा बाले कवालेण वा। ध.प.फ - णओ डंडेण वा लट्ठिणा वा मुट्ठिणा वा बाले कवालेण वा।

**ताडयति** – उरःशिरःकुट्टनकेशलुञ्चनादि करोति, **परिताडयति** – परिसमन्तात् ताडनं विधत्ते, **परितापयति** – परितस्ताप-मुत्पादयति, **अपद्रवति** – अतिपातशेषपीडामुदीरयति। तृतीयं स्थानमभिधत्ते –

**बाले य पंडितं दंडेण वा एवं चेव, णवरं लट्ठिणा वा लेट्ठुणा वा मुट्ठिणा वा कवालेण वा अभिहणेज्जा तज्जेज्जा तालेज्जा परितालेज्जा परितावेज्जा उद्दवेज्जा। तं पंडिए बहुमण्णेज्जा – ''दिट्ठा मे एस बाले दंडेण वा लट्ठिणा वा लेट्ठुणा वा मुट्ठिणा वा कवालेण वा अभिहणति तज्जेति तालेति परितालेति परितावेति उद्दवेति, णो अण्णतरेणं सत्थजातेणं अण्णयरं सरीरजायं अच्छिंदइ वा, विच्छिंदइ वा, मुक्खसभावा हि बाला, ण किंचि बालेहिंतो ण विज्जति।'' तं पंडिए सम्मं सहेज्जा खमेज्जा तितिक्खेज्जा अहियासेज्जा ३।**

पूर्ववत्, केवलम् – **न अन्यतरेण शस्त्रजातेन** – अस्यादि-शस्त्रविशेषेण, **अन्यतरं शरीरजातम्** – शरीरावयवम्, **आच्छिनत्ति वा** – इषत्छेदगोचरीकुरुते, **विच्छिनत्ति वा** – विशेषेण छेदविषयीकृत्य शरीरात् पृथक्कुरुते। तुर्यमाह –

**बाले य पंडियं अण्णतरेणं सत्थजाएणं अण्णतरं सरीरजायं अच्छिंदेज्ज वा विच्छिंदेज्ज वा तं पंडिए बहु मन्नेज्जा – ''दिट्ठा मे एस बाले अण्णतरेणं सत्थजातेणं**



**अण्णतरं सरीरजायं अच्छिंदति वा विच्छिंदति वा, णो जीवितातो ववरोवेति, मुक्खसभावा हि बाला, ण किंचि बालेहिंतो ण विज्जति।'' तं पंडिए सम्मं सहेज्जा खमेज्जा तितिक्खेज्जा अहियासेज्जा ४।।**

प्राग्वत्, नवरं **जीविताद्व्यपरोपयती**ति व्यापादयति। चरममाह –

**बाले य पंडितं जीवियाओ ववरोवेज्जा,। तं पंडिते बहुमण्णेज्जा – 'दिट्ठा मे एस बाले जीविताओ ववरोवेति, णो धम्माओ भंसेति, मुक्खसभावा हि बाला, ण किंचि बालेहिंतो ण विज्जति।' तं पंडिते सम्मं सहेज्जा खमेज्जा तितिक्खेज्जा अहियासेज्जा ५।''**

सुगमम्। नवरं **धर्माद् भ्रंशयती**ति प्रतिपन्नशीलादितः पातयतीत्यर्थः, यथाऽभयाराज्ञी सुदर्शनश्रेष्ठिनं प्रति तादृशयत्नं कृतवती।

तदिदमाह **वाचकमुख्यः** – बालस्वभावचिन्तनाच्च (क्षमि-तव्यम्) परोक्षप्रत्यक्षाक्रोशताडनमारणधर्मभ्रंशानामुत्तरोत्तररक्षार्थम्। बाल इति मूढमाह – परोक्षमाक्रोशति बाले क्षमितव्यमेव, एवंस्वभावा हि बाला भवन्ति, दिष्ट्या च मां परोक्षमाक्रोशति न प्रत्यक्षमिति लाभ एव मन्तव्य इति। प्रत्यक्षमप्याक्रोशति बाले क्षमितव्यम्, विद्यत एवैतद्बालेषु, दिष्ट्या च मां प्रत्यक्षमाक्रोशति न ताडयति, एतदप्यस्ति बालेष्विति लाभ एव मन्तव्यः। ताडयत्यपि

बाले क्षमितव्यम्। एवंस्वभावा हि बाला भवन्ति, दिष्ट्या च मां ताडयति, न प्राणैर्वियोजयतीति, एतदपि विद्यते बालेष्विति। प्राणैर्वियोजयत्यपि बालैः क्षमितव्यम्, दिष्ट्या च मां प्राणैर्वियोजयति न धर्माद् भ्रंशयतीति क्षमितव्यम्। एतदपि विद्यते बालेष्विति लाभ एव मन्तव्यः – इति **(तत्त्वार्थभाष्ये ९-६)**।

एतदेव समासत उक्तमन्यत्र–अक्कोस–ताडण–मारण–धम्मभंसाण बालसुलभाण। लाभं मन्नइ धीरो जहुत्तराणं अभावम्मि – इति। केनैवमुक्तमित्याह–

**इसिगिरिणा माहणपरिव्वायएणं अरहता बुइतं।।१।।**

**ऋषिगिरिणा ब्राह्मणपरिव्राजकेनार्हतर्षिणोदितमि**ति।

इत्थं च –

**जेण केणइ उवाएणं पंडिओ मोइज्ज अप्पकं।**

**बालेणुदीरिता दोसा तं पि तस्स [१]हिता भवे।।**

**।।३४–२।।**

**पण्डितः**–अनन्तरोक्ततत्त्वकोविदः, **येन केनाप्युपायेन** क्षमानुगुणाध्यवसायेन, **आत्मानम्** – निजम्, **मोचयेत्** – कोपविकारविमुक्तीकुर्यात्। कथमेतन्मोचनं परीषहादौ शक्यमिति चेत् ? अत्राह – **बालेनोदीरिता दोषाः** – आक्रोशाद्यपायाः, तदप्युदीरणं पाण्डित्यानुभावेन तथा परिणमेत् यद् **ते** – उक्तापाया **अपि तस्य हिताः** – कल्याणकरा एव **भवेयुः**, क्षमागुणस्फाति–हेतुभावादिति।

१. क.ग.द.ढ.ण.ध.न.प.फ - हिता। ख - हंता। घ.त.झ - हितं। च - हिजं। ज.ट.ठ.थ - हता।



स्यादेतत्, अध्यास्यापि चेदसौ बालं प्रतिवचःप्रमुखं दद्यात्, तदा तु दोषवृद्धिरेवेति कथं हितमिति चेत् ? न, प्रतिवचस एवाभावात्, एतदेव स्पष्टयति–

**अपडिण्णभावाओ उत्तरं तु ण विज्जती।**

**सइं कुव्वइ वेसे णो अपडिण्णे इह माहणे।।३४–३।।**

न विद्यते काचित् प्रतिज्ञा – सर्वैरपि मया सहानुकूलीभूय एव वर्त्तितव्यमित्यादिलक्षणा यस्य सः–अप्रतिज्ञः, तस्य भावः – **अप्रतिज्ञभावः**, तस्मात्, **उत्तरम्** – प्रतिवचः, **न तु** नैव, **विद्यते** यदाऽस्य पाण्डित्यानुभावेनाक्रोशाद्यपि बालसुलभतया सङ्गतत्वेनैव प्रतिभासते, तदा कोऽस्य प्रतिवचोगन्धोऽपीति। तस्माद**प्रतिज्ञो माहन**श्चासौ **इह** – अध्यासनविधौ **स्वयं** कदापि **द्वेषान्** – विरोधान्, **न करोति** – नैवोदीरयति। अत्र विरोधानुदीरणे कर्तृविशेषणद्वारेण हेतुद्वयमुपदर्शितम्, **अप्रतिज्ञत्वात्**, अहमाक्रोशादेरविषय एव, मा भून्ममेषदपि कष्टम्, सर्वैः सज्जनैरेव भाव्यम्, मया सहानुकूलमेव व्यवहरितव्यम् – इत्याद्याकाराया प्रतिज्ञाया अभावात् – इत्याद्यो हेतुः। तथा **माहनत्वात्** – मनसाऽपि परपीडापरिहारपरायणत्वात्तादृशवचोविषयेऽस्य मूकत्वा–दित्यपरो हेतुः। अनया चोदारविचारणया पण्डित उपेक्षत इत्याह–

**किं कज्जते उ दीणस्स [१]णण्णता देहकंखणं।**

१. क.ज.ठ.ढ.ण - णण्णता। ख - पण्णता वि ह कंखणं। ग - णऽण्णत्ता। घ.त.झ - णऽण्णत्थ। च - णण्णत्थ। ट.फ - णणता। प - पाणता। ध.प - ण्णण्णता।

**कालस्स कंखणं वा वि णण्णत्तं वा वि हायती।।**

**।।३४-४।।**

**दीनस्य** - उत्कटमोहोदयविवशस्य, **तुः** - प्रज्ञापनीयाद्भिन्न-पक्षद्योतकः, **किम्** - गुणकरणोद्देशेन प्रतिवचनादि, **क्रियते** - कर्तुं शक्यते ? न किञ्चिदित्याशयः। यतो **णण्ण** इति देश्यशब्दो दुर्जनपर्यायः, तद्भावो **णण्णता**, दुर्जनतेत्यर्थः, सा किंरूपेत्याह - **देहकाङ्क्षणम्**, आत्मीयैहिकशरीरमात्रसुखाभीप्सा, न परशरीर-पीडासापेक्षता, नाप्यात्मन एव परलोकीयकायसौख्यस्पृहा तस्य भवतीति हृदयम्, तस्मादस्मिन्नुक्तमपि विफलतामेव भजत इति न किञ्चिदस्मायुच्यते।

यद्वा तादृशस्यानुग्रहार्थम**पि कालस्य** - उचितसमयस्य, **काङ्क्षणम्** - प्रतीक्षा कर्तव्या, किं सम्प्रधार्येत्याह- **यद्वाप्यस्य णण्णत्वम्** - दुर्जनत्वम्, तथाविधभवितव्यतादिपरिपाकतोऽन्तराले **हीयते** - हानिमापद्यते। न चाप्तवचसोऽपि तदर्वाक् परिणमनं सम्भवीत्यवश्यं कालप्रतीक्षा कर्तव्या, उक्तं च- नागमवचनं तदधः सम्यक् परिणमति नियम एषोऽत्र। शमनीयमिवाभिनवज्वरोदये-ऽकाल इति कृत्वा - इति **(षोडशके ५-४)**। अन्यत्रापि - गुरुकम्माणं जम्हा किलिट्ठचित्ताण तस्स भावत्थो। नो परिणमेइ सम्मं कुंकुमरागो व्व मलिणंमि।। विट्ठाण सूअरो जह उवएसेण वि न तीरए धरिउं। संसारसूअरो इय, अविरत्तमणो अकज्जम्मि - इति **(पञ्चवस्तुके ४२-४३)**। एवं चोपदेशस्याप्यविषयत्वेन दुर्लभबोधिको लोकस्तत्तदकार्यप्रवृत्तेस्तत्प्रत्ययिककर्माणि बद्ध्वा विपाककाले



निपीड्यते, एतदपि पण्डितस्य निर्वेदायेत्याह-

**णच्चाण आतुरं लोकं णाणावाहीहि पीलितं।**
**णिम्ममे णिरहंकारे भवे भिक्खू[1] जितिंदिए।।**

**।।३४-५।।**

**नाना** - कुष्ठाद्यनेकप्रकाराः, **व्याधयः**-रोगाः, **तैस्पीडितम्** - दुःखितम्, अत एवा**तुरम्** - ग्लानिमापन्नम्, **लोकं ज्ञात्वा** - श्रुतादिचक्षुषोपलभ्य, **भिक्षुः**, तत्तद्दुःखनिबन्धनरागादि-दोषात्मकक्षुधाभिदाकृत्, **निर्ममः** - स्वशरीरेऽपि ममकारवर्जितः, **निरहङ्कारः** - अहम्भावमात्रेणाऽप्यस्पृष्टः, **जितेन्द्रियश्च** - उपस्रष्टुरप्यनुकम्पनीयतया तद्दोषेक्षणादावव्यापृतेन्द्रियः, **भवेत्**। किञ्च -

**पंचमहव्वय[2]जुत्ते अकसाए जितिंदिए।**
**से हु दंते सुहं सुयति णिरुवसग्गे य जीवति।।**

**।।३४-६।।**

**पञ्चमहाव्रतैर्युक्तः** - सन्ततसम्यगभ्यस्ततया तदनुस्यूतात्मा, **पंचमहव्वयगुत्ते** - इति पाठे तु पञ्च महाव्रतानि यस्य विद्यन्ते सः - **पञ्चमहाव्रतः**, स च त्रिसृभिर्गुप्तिभि**र्गुप्त** इति कर्मधारयः। यद्वा **पञ्चमहाव्रतैर्गुप्तः** - हिंसादिपापेभ्यः कृतात्मरक्षण इत्यर्थः।

तथा**ऽकषायः** - उदयनिरोधनिग्रहाभ्यामफलताऽऽपादनेना-किञ्चित्करतयाऽसत्प्रायाः - क्रोधादिकषाया यस्य सः, तमेव

१. क.ख.ग.घ.ज.ट.ठ.ढ.ण.त - भिक्खू। च.थ.ध.प.फ.झ - भिक्खु। २. क.ख.ज.द.ट.ठ.ढ.ण.थ.न.फ - महव्वयगुत्ते। ग.घ.च.छ.झ.त.ध.प - महव्वयजुत्ते।

विशेषयति – **जितेन्द्रियः** – सुखासुखनिमित्तभूतविषयेषु समचित्तः। उद्देश्यमभिधाय विधेयमाह – **स तु** – स एव, **दान्तः**–दमितात्मा, स एव स **सुखं स्वपीति** – चतुर्विधसंवरसमाधिलक्षण–सुखशय्योपभोगं विधत्ते। **निरुपसर्गश्च जीवति,** सम्यक् तितिक्षया क्रमशोऽसातवेदनीयकर्मक्षपणात्, हेत्वभावतस्तत उपसर्गनिमित्ता–योगात्। यद्वोपसर्गसद्भावेऽपि तितिक्षादियोगमाहात्म्यात्तदवेदनान्नि–रुपसर्गजीवनं विज्ञेयम्, तदुक्तम् – अवेदनं विदुर्योगम् – इति **(अक्ष्युपनिषदि – २)**। उपसर्गेष्वप्यनुकूलोपसर्गाः सुदुःसहा इति तत्फलप्रख्यापनेन तदधिसहनायोपदेष्टि –

**जे ण लुब्भति कामेहिं छिण्णसोते [१]अणस्सवे।**
**सव्वदुक्खप्पहीणो हु सिद्धे भवति णीरए।।**

**।।३४–७।।**

**यः** – महात्मा, छिन्नान्यपनीतानि स्रोतांसि – संसारा–वतरणद्वाराणि यथाविषयमिन्द्रियवर्तनानि, प्राणातिपातादीनि वाऽऽश्रवद्वाराणि येन सः – **छिन्नस्रोताः**, अत **एवानाश्रवः** – पापकर्मबन्धरहितः, यद्वाऽऽश्रवति – विषयान् शोभनत्वेना–शोभनत्वेन वा गृह्णातीत्याश्रवः, नाश्रवः– **अनाश्रवः**, अत एव **कामैः** – मनोज्ञैः शब्दादिविषयैः, **न लुभ्यति** – न तृष्णाविकार–मापादयितुं शक्यते, स **सर्वदुःखानि** – शारीरमानसकष्टानि, **प्रहीणा**नि क्षीणानि यस्य स **सर्वदुःखप्रहीणः**, विशेषणपरनिपातः प्राकृतत्वात्, **तुः** – दुःखाक्रान्ताशेषविश्ववैशिष्ट्यद्योतकः, दुःख–

१. क.ख.ज.ट.ठ.ढ.ण.थ.ध.न.प.फ - अणस्सवे। ग.घ.च.छ.झ.त - अणासवे।



क्षयोऽपि कथमित्याह– **सितम्** – पूर्वबद्धं कर्म, **ध्मातम्** – शुक्लध्यानानलपरिप्लुष्टं येन सः – **सिद्धः**, दुःखहेतुविनाशेन तद्विनाशनादित्याशयः, किमुक्तं भवति – **नीरजाः** – व्यपगतात्म–स्वरूपोपरञ्जकाशेषोपाधिरजा **भवति**। एतदेव व्यासत आह –

**एवं से सिद्धे बुद्धे विरते विपावे दंते दविए।**
**अलंताती णो पुणरवि इच्चत्थं हव्वमागच्छति।। त्ति बेमि।।**

**एवम्** – कामतृष्णाविरहेण, **सः**– पण्डितात्मा **सिद्ध** इत्यादि प्राग्वत्। इति चतुस्त्रिंशत्तम ऋषिगिरिनामाध्ययन आर्षोपनिषद्।

## ।। अथ पञ्चत्रिंशत्तमोऽध्यायः।।

अनन्तराध्ययने तितिक्षाद्युपदेशोऽभिहितः, स च कषाय–निग्रहमन्तरेणानुष्ठातुमशक्यः, तस्मादत्र तन्निग्रहविधावेवोपदेश–यन्नाह–

**''चउहिं ठाणेहिं खलु भो ! जीवा कुप्पंता [१]मज्जेंता गूहंता लुब्भंता वज्जं समादियंति, वज्जं समादिइत्ता चाउरंतसंसारकंतारे पुणो पुणो अत्ताणं पडिविद्धंसंति, तं जहा – कोहेणं माणेणं मायाए लोभेणं। तेसिं च णं अहं पडिघातहेउं अकुप्पंते अमज्जंते अगूहंते अलुब्भंते तिगुत्ते तिदंडविरते णिस्सल्ले अगारवे चउविकहविवज्जिए[२] पंचसमिते**

१. क.ख.ज.ट.ठ.थ.ध.न.प.फ - मेज्जंता। ग.च.झ.ढ - मज्जंता। घ.छ.त - मज्जन्ता। ण - मज्जता। २. क.ख.ढ.ध.ज.थ.न.प.फ - विवज्जए। ग.घ.च.झ.ट.ठ.ण.त - विवज्जिए।

**पंचेंदियसुसंवुडे सरीरसाधारणट्ठा जोगसंधणट्ठा णवकोडीपरिसुद्धं दसदोसविप्पमुक्कं उग्गमुप्पा-यणासुद्धं तत्थ तत्थ इतराइतरकुलेहिं परकड-परणिट्ठितं विगतिंगालं[१] विगतधूमं सत्थातीतं सत्थपरिणतं पिंडं सेज्जं उवहिं च एसे भावेमि'' त्ति अद्दालएणं अरहता इसिणा बुइतं।।३५-१।।**

**चतुर्भिस्स्थानैः** - अप्रशस्तयोगालम्बनभूतैः **खलु भोः !** **जीवाः कुप्यन्तः** - कोपविकारवशीभवन्तः, **माद्यन्तः** - अभिमानं कुर्वन्तः, **गूहन्तः** - मायावशवर्तिनः, **लुभ्यन्तः** - सतृष्णीभवन्तः, **वज्रम्** - पापम्, **समाददति। वज्रं समादाय चातुरन्तसंसारकान्तारे पुनः पुनरात्मानं परिविध्वंसयति,** कृतकर्मविपाककाले छेदनादिविषयीकुर्वन्ति। न चाकामत्वादन्य-कर्तुरुपलम्भाच्च परिविध्वंसकर्तृत्वेन व्यपदेशस्यानुपपन्नतेति वाच्यम्, कर्मण एवान्तरङ्गत्वेन मुख्यहेतुत्वात्, तत्राऽपि तद्धेतोरेवास्तु किं तेनेति न्यायेन कर्मकर्तृत्वेन जीवानामेव परिविध्वंसकर्तृत्व-मायातमिति सर्वमवदातम्।

चतुर्भिस्स्थानैः परिविध्वंसयन्तीत्युक्तम्, तानि स्थानान्येवा-भिदधन्नाह- **तद्यथा- क्रोधेन मानेन मायया लोभेन। तेषां च** कषायाणा**महं प्रतिघातहेतोरकुप्यन्नमाद्यन् अगूहन्नलुभ्यंस्त्रि-गुप्तस्त्रिदण्डविरतो निःशल्यः** - मायादिशल्यरहितः, **अगारवः**

१. क.ग.घ.च.छ.झ.ज.ठ.ढ.त - विगतिंगालं। ख.फ - वितिगालं। थ.ध.न.प - वितिंगालं।



- ऋद्ध्यादिगारववर्जितः, स्त्र्यादि**चतुर्**विध**विकथाविवर्जितः, पञ्चसमितः, पञ्चेन्द्रियसुसंवृतः, शरीरसन्धारणार्थं योग-सन्धारणार्थ**मित्यादि प्राग्वत् **(ऋषिभाषिते २५-३)**। नवरं **शस्त्रातीत**मिति शस्त्रेणाक्रान्तपूर्वम्, अत एव **शस्त्रपरिणतम्** शस्त्रप्रगतासूकम्। **पिण्डा**दि गवेषमाण **एषो**ऽहं संयमेन तपसा-ऽऽत्मानं **भावया**मीति यथातात्पर्यमध्याहार उह्यः। **इत्यद्दालकेना-र्हतर्षिणोदितम्**। क्रोधादिप्रतिघातोऽपि तद्विपाकालोचनयेत्याह -

**अण्णाणविप्पमूढप्पा पच्चुप्पण्णाभिधारए।**
**कोवं किच्चा महाबाणं अप्पा विंधइ अप्पकं।।**
**।।३५-२।।**

**अज्ञानेन विशेषण**-ज्ञानांशमात्रवर्जनरूपेण, **प्रकर्षेण** - तद्वशवर्त्तितया, **मूढः** - मोहविकारविकृतः, **आत्मा** यस्य सः- **अज्ञानविप्रमूढात्मा**। तमेव विशेषयति - **प्रत्युत्पन्नम्** - वर्तमान-यत्किञ्चिदाभिमानिकसुखसाधनम्, तमेवा**भि**मुख्येनोपादेयतया **धार**यति मन्यत इति **प्रत्युत्पन्नाभिधारकः**, स **आत्मा कोपम्** - क्रोधात्मकम्, **महाबाणम्**, भावप्राणापहारक्षमत्वेन बाह्यतीरा-तिशायिनं शिलीमुखम्, **कृत्वा** - प्रयुज्य, **आत्मान**मेव **विध्यति** - मनस्तापादिकटुविपाकरूपवेधव्यथाविषयीकुरुते । महत्तामेव प्रस्तु-तबाणस्य प्रस्तौति -

**मण्णे बाणेण विद्धे तु भवमेक्कं विणिज्जति।**
**कोधबाणेण विद्धे तु णिज्जती भवसंतति।।३५-३।।**

एतदहं **मन्ये** यद् - **बाणेन** - बाह्यकाण्डेन, **विद्धः** -

सम्यक् शरव्यीकृतस्तु, **एकं भवमेव विनीयते**, वार्तमानिकभवमात्रं समाप्येतरभवं नीयत इत्यर्थः, **क्रोधबाणेन विद्धस्तु** – कोपोदयकलुषितान्तःकरणस्तु, **भवसन्ततिम्** – यावदनन्तजन्मपरम्पराम्, **नीयते** – भ्राम्यते। एवम् –

**अण्णाणविप्पमूढप्पा पच्चुप्पणाभिधारए।**
**माणं किच्चा महाबाणं अप्पा विंधइ अप्पकं।।**
**।।३५–४।।**

**मण्णे बाणेण विद्धे तु भवमेक्कं विणिज्जति।**
**माणबाणेण विद्धे तु णिज्जती भवसंततिं।।**
**।।३५–५।।**

**अन्नाणविप्पमूढप्पा पच्चुप्पणाभिधारए।**
**मायं किच्चा महाबाणं अप्पा विंधइ अप्पकं।।**
**।।३५–६।।**

**मण्णे बाणेण विद्धे तु भवमेक्कं विणिज्जति।**
**मायाबाणेण विद्धे तु णिज्जती भवसंततिं।।३५–७।।**
**अन्नाणविप्पमूढप्पा पच्चुप्पण्णाभिधारए।**
**लोभं किच्चा महाबाणं अप्पा विंधइ अप्पकं।।**
**।।३५–८।।**

**मण्णे बाणेण विद्धे तु भवमेक्कं विणिज्जति।**
**लोभबाणेण विद्धे तु णिज्जती भवसंततिं।।३५–९।।**

पूर्ववत्। यत एवम् –



**तम्हा तेसिं विणासाय सम्ममागम्म संमतिं।**
**अप्पं परं च जाणित्ता चरे विसयगोयरं।।३५–१०।।**

**तस्मात्** – क्रोधादीनां दारुणविपाकवत्त्वात्, **तेषाम्** – कोपादीनाम्, **विनाशाय** – एकान्तिकात्यन्तिकक्षयोपपत्त्यै, **सम्यक्** – निश्चयसारम्, **सन्मतिम्**– कषायप्रक्षयप्रगुणां प्रज्ञाम्, **आगम्य**, सम्प्राप्य, **आत्मानं परं च ज्ञात्वा**, स्वपरसम्बन्धिकषायविपाकादि विदित्वेत्यर्थः, **विषयाः** – कषायनिग्रहनिबन्धनभूता अर्थविशेषाः, त एव **गोचरः** – अनुप्रेक्षाविषयो यथा स्यात्तथा–**विषयगोचरम्**, **चरेत्** – सर्वावस्थासु विहरेत्।

अयमभिप्रायः, परीषहाद्यवस्थास्वपि द्विधा मनःपरिणामसम्भवः कषायोदयानुगुणस्तन्निरोधप्रगुणश्च, तस्मादास्ववस्थासु तथा चरेद्यथा तन्निरोधालम्बनमेवार्थपदं मनोरमणं कुर्यादिति। एतदेव व्यतिरेकतो निरूपयति –

**जेसु जायंते कोधाती कम्मबंधा महाभया।**
**ते वत्थू सव्वभावेणं सव्वहा परिवज्जए।।३५–११।।**

**येषु** – निमित्तेषु सत्सु, **कर्मबन्धा महाभयाश्च**, तद्धेतुभावात्, **क्रोधादयो जायन्ते** – उदयद्वारेणाविर्भवन्ति, **तानि** कषायनिबन्धनभूतानि **वस्तूनि सर्वभावेण** – तत्परिहारपरिणतिसामग्र्येण, **सर्वथा** – त्रिविधत्रिविधेन, **परिवर्जयेत्** – यथा स्वप्नेऽपि तेषां योगो न स्यात्तथा त्यजेत्।

स्यादेतत्, कृतेऽपि निमित्तत्यागे यदि नैमित्तिकसमुन्मज्जनं तदैतदपि परिवर्जनं विफलमेवेति चेत् ? न, निमित्तत्यागस्यैव तत्त्वतो

नैमित्तिकपरिहाररूपत्वात्, केवलं परिवर्जने सद्यत्नो विधेयः। एतत्तु लोकेऽपि सिद्धमिति निदर्शयति –

**सत्थं सल्लं विसं जंतं मज्जं वालं[1] दुभासणं।**
**वज्जेंतो तण्णिमेतेणं दोसेणं ण वि [2]लुप्पति।।**
**।।३५–१२।।**

**शस्त्रम्** – मुद्गरादि, **शल्यम्** – कण्टकादि, **विषम्** – सर्पादिसत्कम्, **यन्त्रम्** – मत्स्याद्यपेक्षया गलयन्त्रादि, **मद्यम्** – द्राक्षादिनिष्पन्नम्, **व्यालम्** – गोनसादि विषधरम्, **दुर्भाषणम्** – परेषां जात्युद्घटनादिकृद् वचनम्, तदेतत् प्रत्येकं सर्वाणि वा **वर्जयन् तन्निमित्तेन** – तत्संयोगहेतुकेन **दोषेण** – शिरःकुट्टनाद्यपायेन, **नापि लुप्यति** – नैव विनाशमाप्नोति। एवं कषायनिमित्तवर्जनेऽपि विज्ञेयम्।

इतश्च कषायनिग्रहः सुकर इत्याह –

**आतं परं च जाणेज्जा सव्वभावेण सव्वधा।**
**आयट्ठं च परट्ठं च पियं जाणे तहेव य।।३५–१३।।**

**सर्वभावेन** – निःशेषनयाभिप्रायेण, **सर्वथा**–सुखदुःखाद्यशेषसंवित्तिप्रकारेण, **आत्मानम्**–प्रत्यक्षसिद्धमात्मस्वभावम्, **परं च** – चेष्टादिलिङ्गानुमितं च स्वव्यतिरिक्तजीवस्वभावम्, **जानीयात्** – अवगच्छेत्।

**तथैव च आत्मार्थं च परार्थं च प्रियं जानीयात्।**

१. ख.ठ.थ - बालं। २. क.घ.च.छ.झ.ढ.ण.त - लुप्पति। ख.ट.ठ.थ.ध.न.प.फ - लिप्पति। ग - ण विलप्पति।



अयमाशयः, यथा स्वात्मा सुखप्रियस्तथा परेषामपि, यथा च स्वात्मा दुःखद्विट्, तथा परेषामपि। यथा ममाक्रोशोऽप्रियः, केनचिदाक्रोशगोचरीक्रियमाणोऽहं दुःखमनुभवामि, तथा मयाऽपि कश्चित्तथाक्रियमाण इत्यलमाक्रोशेनेत्यादिचिन्तनेन कषायनिरोधः कर्तव्यः।

अथात्राऽपि कश्चिदेवं चिन्तयेत् – पर एवाक्रोशादिना क्रोधादि मा कुर्यात्, सर्वेऽपि परे दोषशोधनं कुर्वन्तु इति, तं प्रत्युपदेष्टि–

**सए गेहे पलित्तम्मि किं धावसि परातकं।**
**[1]सयं गेहं णिरित्ताणं ततो गच्छे परातकं।।३५–१४।।**

**स्वके** – आत्मीये, **गृहे** – मन्दिरे, **प्रदीप्ते** – जाज्वल्यमानज्वलनज्वालासहस्राकुले सति, **किमर्थं परेणात्मी**कृतम् – स्वीकृतम् – **परात्मकम्,** परकीयं गृहमित्यर्थः, तद् विध्यापयितुं **धावसि** ?, नैतत् प्रेक्षावल्लक्षणमिति भावः। अर्थापन्नमेवाह– **स्वकम्** – निजं **गृहं निरिच्य** – विध्यापनाद्युपायैर्निरग्निं कृत्वा, **ततः परात्मकम्** – परकीयं गृहं विध्यापनार्थं **गच्छेत्**। अन्यथा लोकोपहासपात्रता – धनविनाशाद्यपायानुषङ्गात्। एवं दृष्टान्तमभिधाय साम्प्रतं दार्ष्टान्तिकमाचष्टे –

**आतट्ठे जागरो होहि मा परट्ठाहिधारए।**
**आतट्ठो हायए तस्स जो परट्ठाहिधारए।।३५–१५।।**

१. क.ढ - सेतं। ख.द.ठ.ध.न.फ - सेत्तं। ग.घ.च.छ.झ.ड.त - सयं। ट - सत्तं। ण - सेत। थ - सए।

**आत्मार्थे** – दोषविशोधनादिलक्षण आत्मीयप्रयोजने, **जागरः** – प्रतिबुद्धः सावधान इति यावत्, **भव**, एतदेव व्यतिरेकेण नियमयति **परार्थ**मेव साधनीयतयाऽऽ**भि**मुख्येन **धार**यति – मन्यत इति **परार्थाभिधारकः**, तादृशो **मा** भूः।

अत्रैव हेतुमाह – यतो **यः परार्थाभिधारको** भवति, **तस्यात्मार्थो हीयते**, स निजप्रयोजनाद् भ्रश्यतीत्यर्थः।

नन्वेवमागमविरोधः, परत्थकरणमिति प्रार्थनासूत्रे प्रार्थनीयत्वेनाभिधानात्, न चान्यतरसम्भवगोचरं प्रस्तुताभिधानमिति वाच्यम्, तथात्वेऽपि विरोधध्रौव्यात्, यदुक्तमन्यत्र – उपकारो विनाशेन सहितोऽपि प्रशस्यते। विक्रीयापि निजात्मानं भव्योत्तम ! विधेहि तम् – इति (**कुरलकाव्ये**)। युक्तं चैतत्, निजप्रयोजनं गौणीकृत्य परार्थं प्राधान्येन पश्यत एव परमार्थतः परार्थकारित्वात्, अत एव परार्थमेव स्वार्थत्वेन मन्यमानः सज्जनतल्लजः, यदभिहितम् – क्षुद्राः सन्ति सहस्रशः स्वभरणव्यापारमात्रोद्यताः, स्वार्थो यस्य परार्थ एव स पुमानेकः सतामग्रणीः। दुष्पूरोदरपूरणाय पिबति, स्रोतःपतिं वाडवो, जीमूतस्तु निदाघसम्भृतजगत्सन्तापविच्छित्तये – इति (**भर्तृहरिकृतशतके**)। स्वार्थाय परार्थप्रतिघातस्तु प्रत्यक्षमेव राक्षसलक्षणम्, यदाह – एते सत्पुरुषाः परार्थघटकाः स्वार्थं परित्यज्य ये, सामान्यास्तु परार्थमुद्यमभृतः स्वार्थाविरोधेन ये। तेऽमी मानवराक्षसाः परहितं स्वार्थाय निघ्नन्ति ये, ये तु घ्नन्ति निरर्थकं परहितं ते के न जानीमहे– इति (**भर्तुहरिकृतशतके**)। न च परार्थप्रतिघातस्याप्रतिज्ञातत्वेनानभ्युपगतोपालम्भोऽयमिति वाच्यम्,



परार्थोपेक्षाया एव कथञ्चित्तत्त्वात् (परार्थप्रतिघातरूपत्वात्)। न चैवं परार्थोपेक्षयितुर्मुमुक्षुताऽपि सङ्गतिमङ्गति– निर्व्यपेक्षं परार्थेषु बद्धकक्षा मुमुक्षवः – इति तल्लक्षणायोगात् (**अनगार– धर्मामृते १–११–३५ उद्धरणम्**)। अत एव परार्थरसिकाः शास्त्रेषु स्तूयन्ते, यथा– अत्तुवगारमई वि हु जायइ जम्हा जयंमि विरलाणं ते उण विरलयर च्चिय परोवयारे मई जाणं– इति (**भवभावनायाम् ६**) इत्थं च सर्वथाऽप्युक्ताभिधानमनुपपन्नतयावस्थितमिति चेत् ?

न, अभिप्रायापरिज्ञानात्, य आत्मन्येव द्रव्यदयां परेष्वेव भावदयां विचिन्तयति, स्वशरीरं प्रतिपालयन् परदोषदर्शनमेव कुरुते, स्वात्मदोषोपेक्षां विधत्ते, तमुद्दिश्य प्रकृतोपदेशप्रवृत्तेः, यथोक्तम् – कार्यं च किं ते परदोषदृष्ट्या, कार्यं च किं ते परचिन्तया च। वृथा कथं खिद्यसि बालबुद्धे ! कुरु स्वकार्यं त्यज सर्वमन्यत् – इति (**हृदयप्रदीपे १२**)।

आत्मविक्रयेण परार्थोपदेशोऽपि तथाविधपात्रविशेषे दशाविशेषापेक्षयैव ज्ञेयः, सोऽपि यथाऽऽत्मार्थहानिर्न स्यात्तथैव, अन्यथा तु सोऽपि प्रतिक्रुष्टः, तदाह– अप्पहियं कायव्वं जइ सक्कइ परहियं च कायव्वं। अप्पहियपरहियादो अप्पहिदं सुट्ठु कादव्वं – इति (**भगवत्याराधनायाम् १५४–३५१ उद्धरणम्**)। अतः परार्थो गौणत्वेन, स्वार्थश्च प्रधानत्वेन सिद्धः। उक्तं च – तद् द्विधाऽथ च वात्सल्यं, भेदात् स्वपरगोचरात्। प्रधानं स्वात्मसम्बन्धि गुणो यावत् परात्मनि – इति (**पञ्चाध्याय्याम् ८०९**)।

नैतन्मात्रम्, दशाविशेषे तु परचिन्तामात्रमपि निषिद्धम्,

परगुणकीर्तनस्यापि प्रतिषेधात्, यदाह – यावत्परगुणदोषपरिकीर्तने व्यापृतं मनो भवति। तावद्वरं विशुद्धे, ध्याने व्यग्रं मनः कर्तुम् – इति **(प्रशमरतौ १८४)**। किञ्च, ज्ञानानन्दसमाधिसमुद्रनिमग्नस्य क्व परचिन्तावकाशोऽपीति विचारणीयम्, उक्तं च – लद्धूण विहि एक्को तस्स फलं अणुहवेइ सुजणत्ते। तह णाणी णाणविहिं, भुंजेइ चइत्तु परतत्तिं – इति **(नियमसारे १५७)**।

ननु मा भूत् परदोषदर्शनम्, परपापाचरणनिषेधस्तु कथं न करणीय इति चेत् ? अत्राह–

**जइ परो पडिसेवेज्ज पावियं पडिसेवणं।**
**तुज्झ मोणं करेंतस्स के अट्ठे परिहायति ?।।**
**।।३५–१६।।**

**यदि परः पापिकम्** – पापसम्बन्धि **प्रतिसेवनं प्रतिसेवेत,** तदा **तव मौनम्** – मुनिभावव्यवस्थितिम्, वचननिरोधं वा, **कुर्वतः, कोऽर्थः** – प्रयोजनं **परिहीयते** ? न कश्चिदित्याशयः, परकीयपापानामात्मार्थे हानिप्रयोजकत्वाभावात्। नन्वेवं पापप्रति–षेधोपदेशोऽकर्तव्यतामापद्यत इति चेत् ? आपद्यतां नाम दशाविशेषापेक्षया, अपरथा तु सोऽपि कर्तव्यतयैवाभ्युपगम्यत इत्याम्रेडितमेव। तदत्र निष्कर्षमाह –

**आतट्ठो णिज्जरायंतो परट्ठो कम्मबंधणं।**
**अत्ता समाहिकरणं अप्पणो य परस्स य।।**
**।।३५–१७।।**

**आत्मार्थः, निर्जरायन्** – निर्जराप्रयोजकः, **परार्थः** – अनधिकारिण आत्मार्थद्रोहकलङ्कितः परोपकारः, **कर्मबन्धनम्,** तद्धेतुभावात्।



अधिकारिणमुद्दिश्याऽऽह – **आत्मनश्च परस्य च समाधि–करणम्** – दोषापनोदो गुणप्रगुणताविधानं च, **आत्मा,** पदैकदेशे पदसमुदायोपचारेणात्मार्थ इत्यर्थः। अयमाशयः, अधिकारिणस्तु स्वपरयोरुभयोरप्युपकरणमात्मार्थ एव, परोपकारस्यापि निर्जरा–निबन्धनत्वादिति। अनधिकारिणस्तु परार्थाभियोग उभयभ्रंशः, आत्मार्थवञ्चितत्वात्, अत एव पारमार्थिकपरार्थायोगाच्चेति तं प्रत्युपदेष्टि –

**अण्णातयंम्मि अट्टालकम्मि किं जग्गिएण वीरस्स ?।**
**णियगम्मि जग्गियव्वं इमो हु बहुचोरतो गामो।।**
**।।३५–१८।।**

**अज्ञातके** – अपरिचिते, एतच्च परकीयत्वातिशयप्रदर्शनार्थं विशेषणम्, **अट्टालके**–क्षौमे, प्राकाराग्रस्थे रणगृह इत्यर्थः, **वीरस्य** – सुभटंमन्यस्य, **जागरितेन** – रक्षाबद्धकक्षतया निर्निमेषं निशानयनेन, **किम्** ? कोऽर्थोऽनेन सेत्स्यति ? निरर्थकमेत–दित्यभिप्रायः। निजग्रामे मुष्यमाणे सति परत्र जागरितस्य विफलत्वात्, कुफलत्वाच्चेति पर्यवसितमाह – **निजके** – आत्मीये, अट्टालके **जागृतव्यम्, तुः** – यतो**ऽयं** बहवश्चौरा यस्मिन् सः – **बहुचौरकः, ग्रामः** – आत्मीय आवसथः।

आत्मनि तु चौरस्थानीया बहवो दोषाः स्वप्रत्यक्षा एवेति तेभ्य आत्मा रक्षणीयः, आत्मन्येव संशयारूढे पररक्षाऽसम्भवात्। अत्र

किं जागरितेनेत्यंशमात्रग्रहान्मा भूत् कस्यचित् सुषुप्तावेवेष्टसाधनता प्रतीतिरित्याह–

**जग्गाहि, मा सुवाही, मा[1] हु ते धम्मचरणे पमत्तस्स।**
**काहिंति बहुं चोरा संजमजोगे हिट्ठाकम्मं[2]।।**
**।।३५–१९।।**

**जागृहि** – आत्मार्थविधौ जागृतो भव, मा प्रमत्तो भूरिति यावत्, अत्रैव नियमयति – **मा स्वपिहि** – मात्मार्थ उपेक्षां विधेहि। **मा ते धर्मचरणे प्रमत्तस्य बहवश्चौराः** – वक्ष्यमाणाः **संयमयोगेऽधःकर्म कारयिष्यन्ति,** संयमयोगेष्वतिचाराद्यापादनेन ततस्त्वां पातयिष्यन्तीत्यर्थः। क एते चौरा इत्याह –

**पंचिंदियाइं सण्णा दंडा[3] सल्लाइं गारवा तिण्णि।**
**बावीसं च परीसह चोरा[4] चत्तारि य कसाया।।**
**।।३५–२०।।**

**पञ्चेन्द्रियाणि** – अनिगृहीतानि श्रोत्रादीनि, **सञ्ज्ञाः** – आहारादयः, **दण्डाः** – दुष्प्रयुक्तमनःप्रभृतयः, **शल्यानि** – मायादीनि, **गौरवाणि** – ऋद्धिप्रमुखाणि, **त्रीणि,** एतच्च

१. क.ख.ग.द.ट.ठ.ढ.ण.थ.ध.न.प.फ - मा हु ते। घ.च.झ.त - मा ते।
२. ण - हिडाकम्म। क.ख.घ.च.छ.झ.त.ध.न.प.फ - हिडाकम्मं। ढ - हिडाकंमं। ग- चोरा संजमजोगेहिं डाकम्मं (०जोगे हिट्ठा)। द.थ - हिंडाकम्मं। ट - हिंडाकंम्मं। ठ - हिट्ठाकंमं। ३. क.ज.ट.ठ.ढ.ध.न.प.फ - दंडसल्लाइ। ख.थ - दंडसणाइ। झ - दंडा सल्लाइं। ग - दंड सल्लाइं। घ.छ.त - दण्डा सल्लाइं। च - दंडं सल्लाइ। ४. क.ग.घ.च.छ.झ.ढ.ण.त.न - चोरा। ख.द.ज.ट.ठ.थ - चारा। ध.प.फ - सहा चारा।



दण्डादीषु प्रत्येकमभिसम्बन्ध्यते। **द्वाविंशतिश्च परीषहाः** – क्षुधादयः, एते चाजिताश्**चौरा** विज्ञेयाः, न तु स्वरूपतः। **चत्वारि च कषायाः** – क्रोधादयः। एवं चौरान् परिज्ञाप्य पुनरपि ततः सम्भाव्यमानापायभयादप्रमत्तत्वमुपदेष्टि –

**जागरह णरा निच्चं, मा भे धम्मचरणे पमत्ताणं।**
**काहिंति बहू चोरा दोग्गतिगमणे हिट्ठाकम्मं[1]।।**
**।।३५–२१।।**

प्राग्वत् **(ऋषिभाषिते ३५–१९)**। नवरं **दुर्गतिगमने** प्रयोजक**मधःकर्म** – निन्दितकृत्यम्, **कारयिष्यन्ति** त्वया, यतो–ऽवश्यं तव नरकादिदुर्गतिर्भाविनीति। किञ्च –

**[2]अणायकम्मि अट्टालकम्मि जग्गंत सोयणिज्जो सि।**
**णाहिसि वणितो [3]संतो ओसहमुल्लं अविंदंतो।।**
**।।३५–२२।।**

**अनायके** – आत्मना नायकतयाऽनधिष्ठिते, परकीय इत्यर्थः, **अट्टालके जाग्रत्** – प्रतिजागरणं कुर्वन्, **शोचनीयोऽसि,** प्रेक्षावतां शोकविषयो भवसीत्यर्थः। शोकश्चात्रैतदाकारो ज्ञेयः– अस्थानाभियुक्तः स्थाने चावज्ञाताऽयं वराकोऽचिराद्विनश्यतीति।

एतदेव निदर्शनेनाह– **व्रणितः** सञ्जातक्षतः **सन्,** कश्चिद्

१. क.ढ - हिडाकंमं। ख.थ - हिट्ठाकमं। ग.घ.च.छ.झ.त - हिडाकम्मं। ज.ट.ठ.ध.न.प.फ - हिट्ठाकंमं। २. क.ख.ट.ठ.ढ.थ.ध.न.प.फ - अणायकंमि। घ.च.छ - अण्णायकंमि। ज - अणायंकंमि। ण - अणायकमि। त.झ - अण्णायकम्मि। ३. क.ग.च.ज.झ.ट.ठ.ढ.ध.प - संतो। ख.थ - सिंतो। घ.छ.त - सन्तो। ण.न.फ - संतो - विना।

**औषधम्** – व्रणचिकित्सार्थं भेषजम्, तत्क्रयणार्थं **मूल्यम्** – उचितं धनम् – औषधमूल्यम्, तद**विन्दन्** – निर्धनत्वेनाप्राप्नुवन्, यथा नश्यति, तथा त्वमपि **नङ्क्ष्यसी**ति। तस्मात् –

**जागरह णरा णिच्चं जागरमाणस्स जागरति सुत्तं।**
**जे सुवति न से सुहिते जागरमाणे सुही होति।।**
**।।३५–२३।।**

हे नरा ! यूयं **नित्यं जागृत** – आत्मार्थे सदाऽप्यप्रमत्ता भवत। अयमपरो जाग्रतो गुण इत्याह – **जाग्रतः सूत्रम्** – पूर्वाधीतं श्रुतम्, **जागर्ति** – स्वनामवत् सदापि स्मृतावुपस्थितं स्थिरपरिचितं च भवति, यदाह – सुअइ सुअंतस्स सुअं, संकियखलियं भवे पमत्तस्स। जागरमाणस्स सुअं थिरपरिचियमप्पमत्तस्स।। जागरह णरा णिच्चं जागरमाणस्स वड्ढए बुद्धी। जे सुअइ ण सो धण्णो, जो जग्गइ सो सया धण्णो।। नालस्सेण समं सोक्खं ण विज्जा सह निद्दया। ण वेरग्गं पमादेण, णारंभेण दयालुया।। सुवइ य अयगरभूओ, सुयं पि से णस्सती अमयभूयं। होही गोणतभूओ, णट्ठम्मि सुअ अमयभूए – इति **(आचाराङ्गे १–३–१)**।। यत एवं तस्मात् – **यः स्वपिति न स सुखितो** भवति, किन्तु **जाग्रन्** स **सुखी भवति**। न हि प्रमादपङ्कनिमग्नानां सुखलेशोऽपि सम्भाव्यते, अशेषदुःखसन्दोहस्य प्रमादमूलकत्वात्, तस्मादनिशम– प्रमत्तैर्भाव्यमिति भावः। जाग्रन् सुखी भवतीति यदुक्तम्, तत्रैव हेतुमाह –



**जागरंतं मुणिं वीरं दोसा वज्जेंति दूरओ।**
**जलंतं जाततेयं वा चक्खुसा दाहभीरुणो।।**
**।।३५–२४।।**

**जाग्रतम्** – अप्रमत्तम्, तमेव विशेषयति **मुनिम्** – भावमौनमालिनम्, तमेव विशेषयति – **वीरम्** – कर्मसङ्ग्रामशूरम्, **दोषाः** – रागादयः, रागो दोसो मोहो एए एत्थाऽऽयदूसणा दोसा – इति वचनात् **(योगशतके ५३)**। ते **दूरतः वर्जयन्ति**, अप्रमाद– भावादिलक्षणतत्प्रतिपक्षसद्भावात्, तेषां च परस्परपरिहारेणाव– स्थितत्वात्।

एतदेव दृष्टान्तत आचष्टे **यथा ज्वलन्तं जाततेजसम्** – वह्निम्, यथा **दाहभीरवः**– सञ्जातपरिप्लोषसाध्वसाः, **चक्षुषा** दृष्ट्वैव वर्जयन्ति, यद्वा यथाऽग्निर्दृष्टिविषयोऽपि न स्यात्तथा– ऽपसरन्तीत्यर्थः।

**एवं से सिद्ध बुद्धे विरते विपावे दंते दविए अलंताती णो पुणरवि इच्चत्थं हव्वमागच्छति।। त्ति बेमि।।**

**एवम्** – जागरणानुभावतोऽशेषदोषवर्जनेन, **सः** – जागृतो **मुनिः**, **सिद्ध** इत्यादि प्राग्वत्। इति पञ्चत्रिंशत्तमेऽद्दालकीयाध्ययन आर्षोपनिषद्।

## ।। अथ षट्त्रिंशत्तमोऽधयायः ।।

अनन्तराध्ययने कषायनिग्रहः प्रतिपादितः, तेषु चाग्रेसरः कोपः, इत्यत्र तद्दुर्विपाकादिनिरूपणेन तद्विजयायोत्साहयति–

**[१]उप्पतता उप्पतता उप्पयंतं पितेण वोच्छामि। किं संतं वोच्छामि, ण संतं वोच्छामि कुक्कुसयावित्तेण तारायणेण अरहता इसिणा बुइतं।।३६–१।।**

**उत्पततोत्पतता** – भृशमुदीर्यमाणेन, क्रोधेनेति गम्यते, **उत्पतन्तम्** – अत्यन्तमाध्मातम्, क्रोधनमनुष्यमिति गम्यते, **प्रियेण** – मनोज्ञेन, वचसेति ज्ञायते, **वक्ष्यामि**– कथयिष्यामि, क्रोधाध्मातं प्रियवचनेन निर्वापयिष्यामीति हृदयम्।

**किं श्रान्तम्** – प्रियेणापि क्षमाद्युपदेशेन निर्विण्णमहं **वक्ष्यामि** ? अयं भावः, खेदापन्नं चित्तं प्रियेऽप्यरतिज्वरार्त्तं भवतीत्यसौ प्रियभाषणस्याप्यकाल एवेति प्रश्नकारोऽन्येषामप्यौ–चित्यव्युत्पादनाय क्षमावचोऽवसरं प्रख्यापयति, **न श्रान्तं वक्ष्यामी**ति, तदोदीरितवचसो वैफल्यात्, प्रत्यपायावहत्वाच्च।

केनैवमुक्तमित्याह– **कुक्कुस** इति देश्यशब्दः पलालवाची, स्वार्थे कप्रत्ययः, दीर्घभावः प्राकृतत्वात्, रामापुत्त इति यथा। ततः **कुक्कुसकः** – पलालकल्पं निस्सारं चीवरादि, स एव **वित्तम्** – धर्मोपकरणत्वेन परिगृहीतम्, त्यक्ताशेषविभवनेनाऽपि स्वस्वामिक–तयाङ्गीकृतमिति यावत्, यस्य सः – **कुक्कुसकवित्तः**, तेन। एतेनास्याचेलकल्पाराधकत्वमुक्तम्, उपलक्षणं चैतत् स्वप्रायोग्य–

१. ग.द - ततो उप्पतता। ट - तता उप्पतता।



शेषकल्पानाम्। विशेषणमभिधाय विशिष्टमाह – **तारायणेनार्हत–र्षिणोदितमि**ति। योग्यावसरे तु यद्वक्ति तदाह–

**पत्तस्स मम य अन्नेसिं मुक्को [१]को(वो) दुहावहो।**
**तम्हा खलु उप्पतंतं सहसा कोवं णिगिण्हितव्वं।।**
**।।३६–२।।**

**पात्रस्य** – क्रोधाध्मातप्रकोपभाजनीभूतस्य, परुषवचन–विषयीभूतस्येत्यर्थः, **मम** – प्रवक्तुः प्रत्येकबुद्धस्य, **अन्येषां च** – मद्विधानां परुषभाषितनिशितशरशरव्यीकृतानाम्, **मुक्तः**– उत्सृष्टः, अस्माकं प्रति व्यक्तीकृत इत्यर्थः, **क्रोधः** – प्रबलक्रोधोदयेनोदी–रितमतिकटुकं वचनम्, फले हेतूपचारात्, **दुःखावहः**– दुःख–निबन्धनं भवति। यतः – रोहते सायकैर्विद्धं वनं परशुना हतम्। वाचा दुरुक्तं बीभत्सं न संरोहति वाक्क्षतम् – इति **(महाभारते)**। **तस्मात् खलु उत्पतन्** – उदयाभिमुखीभवन्, **सहसा** – सपदि, अविश्वसनीयत्वात् कषायाणाम्, उक्तं च – अल्पेऽपि साधुर्न कषायवह्ना – वह्नाय विश्वासमुपैति भीतः। प्रवर्धमानः स दहेद् गुणौघं साम्याम्बुपूरैर्यदि नापनीतः – इति **(अध्यात्मोपनिषदि ४–११)**। **कोपः** – मन्युः, **निगृहीतव्यः** – प्रवचनप्रतिपादितोपायेन निग्रहगोचरीकर्तव्यः। क्रोधस्य दुःखावहत्वमेवोपमाभिः स्फुटयति–

**कोवो अग्गी तमो मच्चू विसं वाधी अरी रयो।**
**जरा हाणी भयं सोगो मोहं सल्लं पराजयो।।३६–३।।**

१. क.ज.ट.ठ.ढ.ण.थ.न.फ - कोदुहा। ख - केदुहा। ग को (वो) दुहा। ध.प - क्कोदुहा। घ.च.छ.झ.त - कोवोदुहा।

**क्रोध एवाग्निः**, दाहकतासारूप्यात्, तदाह- क्रोधः परितापकरः - इति **(प्रशमरतौ २६)**। तथा क्रोध एव **तमः** - अज्ञानम्, तद्धेतुभावात्। अन्धकारो वा, सद्बोधान्तरायकारिता-साधर्म्यात्। **मृत्युः**, मरणपरम्पराबीजत्वात्, भावप्राणापहार-कत्वाच्च। **विषम्**, अत एव। **व्याधिः**, बलादिक्षयनिमित्तत्वात्। **अरिः**, एकान्ताहितत्वात्। **रजः**, आत्मस्वरूपोपरञ्जनात्। **जरा**, सर्वोद्वेगयोनितासादृश्यात्, उक्तं च - सर्वस्योद्वेगकारकः क्रोधः - इति **(प्रशमरतौ २६)**। तथा **हानिः** - नैकानर्थप्रयोजकत्वेन धनादिहानिबीजत्वात्, उक्तं च - अनर्थाः क्षिप्रमायान्ति वाग्दुष्टं क्रोधनं तथा - इति। एवं **भयम्** - ऐहिकादिभयकारणत्वात्। **शोकः**, अविचारितकार्यप्रयोजकत्वेन शोकपर्यवसायित्वात्। **मोहः** - मोहनीयप्रकृतिरूपत्वात्, मोहहेतुत्वाद्वा, कामस्यैव कुतश्चित् पराहतस्य क्रोधरूपेण परिणमनाद्वा, उक्तं च - कामात् क्रोधोऽभिजायते - इति **(भगवद्गीतायाम् २-६२)**। कामस्य मोहात्मकता तु प्रसिद्धैव। **शल्यम्** - वेधसविधव्यथावहत्वात्। **पराजयश्च** वैफल्यविधायित्वात्, क्रोधः कार्यविभङ्गाय - इत्युक्तेः।

किन्त्वेतदपि सर्वमुपमामात्रमेव, परमार्थतो महदन्तरत्वादित्य-ग्नितोऽस्यातिशयख्यापनेनातिदेष्टि-

**वण्हिणो णो बलं छित्तं कोहग्गिस्स परं बलं।**<br>
**अप्पा गती तु वण्हिस्स, कोवग्गिस्सऽमिता गती।।**<br>
**।।३६-४।।**



**वह्नेः** - अनलस्य, **बलम्** - अनर्थापादनसामर्थ्यम्, **क्षिप्तम्** - सङ्क्षिप्तम् - परिमितमिति यावत्, **न** - नास्ति, तत्कणस्यापि तृण्यां भस्मसात्कर्तुं समर्थत्वात्। तथापि **क्रोधाग्नेः** - कोप-लक्षणज्वलनस्य तु **परम्** - अत्युत्कृष्टम्, **बलम्** - प्रत्यपाय-जननसामर्थ्यं वर्तते।

यतो **वह्नेस्तु गतिरल्पा** विद्यते, दाह्यविनाशानुविनाश-शीलत्वात्तस्य, दृष्टमात्रापायफलत्वाच्च। **क्रोधाग्नेस्त्वमिता गतिरस्ति**, तज्जन्यापायानामनन्तेनापि कालेन निष्ठाविरहात्। इतश्च क्रोधस्याग्नेरतिशय इत्याह -

**सक्का वण्ही णिवारेतुं वारिणा जलितो बहि।**<br>
**सव्वोदहिजलेणावि कोवग्गी दुण्णिवारओ।।**<br>
**।।३६-५।।**

प्राग्वत् **(ऋषिभाषिते ३-११)**। किञ्च -

**एकं भवं दहे वण्ही दड्ढस्स वि सुहं भवे।**<br>
**इमं परं च कोवग्गी णिस्संकं दहते भवं।।३६-६।।**

**वह्निरेकमेव भवं दहति**, तस्य प्रेत्यानुगामिताविरहात्, **दग्धस्यापि** - सहसोत्थितानलोपद्रवेण परिप्लुष्टस्यापि भस्माव-शेषीभूतस्यापि **सुखम्** - व्यन्तरनिकायिकं सौख्यम्, **भवेत्** - सम्भाव्यते, तथाविधमरणेन मृतस्यात्मघातिनो वा तत्कालीन-शुभाध्यवसायानुभावेन व्यन्तरगतिभावात्, सुहभावा हुंति वंतरिया - इति वचनात् **(बृहत्सङ्ग्रहण्याम्)**।

**अयम्** - प्रकरणप्रस्तुतत्वेन बुद्धिप्रत्यक्षः, **कोपाग्निश्च** -

**निःशङ्कं परम्** - प्रकृष्टं यथा स्यात्तथा, **भवम्** - जन्मसामान्यावच्छिन्नम्, अनेकजन्मान्तराणि यावदिति भावः, **दहते** - स्वजन्यप्रत्यपायलक्षणदाहेन दुःखितं विधत्ते। अयमपरोऽप्यतिशय इत्याह-

**अग्गिणा तु इहं दड्ढा संतिमिच्छंति माणवा।**
**कोहग्गिणा तु दड्ढाणं दुक्खं [1]संति पुणो वि हि।।**
**।।३६-७।।**

**इहाग्निना दग्धाः** - भवितव्यतादियोगेन हस्ताद्यवच्छेदेन दाहवेदनां प्राप्ताः, **मानवास्तु शान्तिम्** - दाहदुःखोपशमनम्, **इच्छन्ति** - अत्यन्तमभिलषन्ति, अत एव सर्वप्रयत्नेन तत्प्रतिपक्षासेवनमग्निपरिहारं च विदधन्ति। **क्रोधाग्निना तु दग्धानाम्** - हृदयदाहाद्यपायकदर्थितानाम्, उक्तं च - हृदयदाहाङ्गकम्पाक्षिरागेन्द्रियापाटवादिनिमित्तजीवपरिणामः क्रोधः - इति **(धवलायाम् १२-४-२-८)**। **पुनरपि शान्तिः** - क्रोधविहितव्यथोपशमः, **दुःखं हि** - दुःखेनैव भवति, अत्यन्तं दुःखप्राप्यं क्रोधजनितप्रत्यपायप्रतिविधानमित्याशयः। न हि प्रतिपक्षहेतुसद्भावे प्रकृतकार्यजननं घटाकोटिमाटीकते, औष्ण्यहेतुसद्भावे शैत्यवत्। तस्मात् क्रोधनस्य क्रोधजनितदाहोपशमो नैव सुखसाध्यतामुपयाति। दाहोपशमलेपविलेपनेऽकृते, पुनः पुनश्च दाहविषयीकृते च शरीरभागे कुतस्तरो दाहोपशमावकाशोऽपीति।

१. क.ख.ज.ट.ठ.ड.थ.ध.न - संती। ग.झ - संति। घ.छ.त - सन्ति। च - संति पुणौ। ण - सती। ढ - संतीपुणोदहि। प.फ - संतीपुणोवहि।



नन्वनुभूततत्कटुफलानामपि कथं तत्परिहारो न सम्भवतीति चेत् ? अत्राह-

**सक्का तमो निवारेतुं मणिणा जोतिणा वि वा।**
**कोवतमो तु दुज्जेयो संसारे सव्वदेहिणं।।३६-८।।**

**मणिना** - भास्वररत्नविशेषेण, **ज्योतिषाऽपि वा** - सूर्यादिसम्बन्धिना दीपकादिना वा, **तमः**-अन्धकारः, **निवारयितुं शक्यः**, तन्निवारणेनैव ज्योतिरादिस्वरूपलाभात्, (नैतज्ज्योतिरेव यत्तमो न निवारयतीति)।

**कोपतमः** - क्रोधात्मकं सन्तमसम्, **तुः** - लौकिकतमोऽपेक्षया भिन्नपक्षद्योतकः, **दुर्जेयः** - अतिदुष्करनिवारणः, केषामित्याह - **संसारे सर्वदेहिनाम्** - संसारवर्तिनां प्रायः सर्वेषामप्यसुमताम्। ततश्च क्रोधाभिभूतानां या विडम्बना भवन्ति, ता आह-

**सत्तं बुद्धी मती मेधा गंभीरं सरलत्तणं।**
**कोहग्गहऽभिभूयस्स सव्वं भवति णिप्पभं।।३६-९।।**

**सत्त्वम्** - वीर्योल्लासः, **बुद्धिः** - तत्कालदर्शिनी प्रतिभा, **मतिः** - आगामिकी मनीषा, **मेधा** - कालत्रयात्मिका प्रेक्षा, **गम्भीरम्** - भावप्रधानत्वान्निर्देशस्य गाम्भीर्यम्, तच्च हर्षविषादादावनुपलभ्यमानचित्तवृत्तित्वम्, **सरलत्वम्** - मनोवाक्कायाविसंवादता, तदेतत् **सर्वम**पि, **क्रोध** एव **ग्रहः** - **क्रोधग्रहः**, विचेष्टितत्वादिप्रयोजकतासामान्यात्, तेना**भिभूतस्य** - पराभूतस्य, **निष्प्रभम्** - अपगतकान्ति, स्वानुभावमनुदर्शयितुमक्षममिति यावत्,

**भवति**। किञ्च –

**गंभीरमेरुसारे वि[1] पुमं होऊण संजमे।**

**कोवुग्गमरयोधूते[2]ऽतसारत्तमतिच्छति।।३६–१०।।**

**गम्भीरः** – अतुच्छः, यतो **मेरुवत् सारः** – निचितसजातीयत्वेन विजातीयांशेनाप्यकलङ्कितः, गम्भीरश्चासौ मेरुसारश्च – **गम्भीरमेरुसारः**, तस्मिन्न**पि** – आस्तां तुच्छादावित्यपिशब्दार्थः, **संयमे** – आश्रवविरत्यादिरूपे, **पुमान्** – नरः, **भूत्वा** – व्यवस्थितिं सम्बध्य, **कोपोद्गम** एव **रजः** – आत्मस्वरूपोपरञ्जनात्, तेन **धूतः** – उच्छलितः, अवगुण्डित आवृत इति यावत्, सो**ऽत्यसारत्वम्** – सर्वथा संयमसाररहितत्वम्, **अतिच्छति** – उपयाति, प्रतिपद्यत इत्यर्थः। यदागमः – जं अज्जियं चरित्तं देसूणाए वि पुव्वकोडीए। तं पि कसाइयमेत्तो नासेइ नरो मुहुत्तेण – इति **(निशीथभाष्ये २७९३)**। कषायातिशयस्य संयमप्रतिपक्षत्वात्, उक्तं च – कषायसहिओ न संजओ होइ – इति **(बृहत्कल्पभाष्ये २७१२)**।

निस्सारीभवनमेवोपमया स्पष्टयति –

१. क.फ.न - वि युमंहोऊण। ख.ज.ट.ठ.थ.ध.प - विपुमं। ग.घ.च.छ.झ.त - वि पुव्वं। ण - वियुम। २. क.ख.ज.ट.ठ.ढ.ण.थ.ध.न.च.फ - तसारत्तं। ग - त (अ)सारत्त। घ.च.छ.झ.त - असारत्त।



**महाविसे वऽही दित्ते [1]चरेऽदत्तंकुरोदये।**

**[2]चिट्ठे चिट्ठे स रूसंते [3]णिव्विसत्तमुपागते।।**

**।।३६–११।।**

**दृप्तः** – उदितानल्पदर्पः, **महाविषोऽप्यहिः** – सर्पः, न दत्तोऽङ्कुरस्याप्युदयो येन सः – **अदत्ताङ्कुरोदयः**, तथा सन् **चरेत्** – विहरेत्, चण्डकौशिकवदशेषवनस्पत्यादीन् भस्मसात् कुर्वन् भ्रमेदित्याशयः।

किं सर्वदाऽप्यसौ महाविषः ? नेत्याह– **स रुषन्** – दृष्टिविषयमात्रमापन्नेऽतीव क्रुध्यन्, तथाविधावस्थायामेव **तिष्ठेत् तिष्ठेत्** – भृशमवस्थितिं बध्नीयात्, एवं च सन्ततमप्युद्गीर्णहलाहलोऽसौ **निर्विषत्वमुपागतो** भवति। स्वशरीरे विषजननसामर्थ्यादप्यधिकमात्रतद्व्ययभावादित्यभिप्रायः। उपनयति –

**एवं तवोबलत्थे वि णिच्चं कोहपरायणे।**

**अचिरेण वि कालेणं तवोरित्तत्तमिच्छति।।३६–१२।।**

**एवं** तप एव बलम्, **तपोबलम्**, निकाचितकर्मणामपि निर्नाशनेऽचिन्त्यसामर्थ्यशालित्वात्, तस्मिंस्तिष्ठति – तादात्म्येन परिणमतीति – **तपोबलस्थः**, सो**ऽपि** यदि **नित्यं क्रोधपरायणो** भवति, तदा**ऽचिरेणापि कालेन तपोरिक्ततामृच्छति** – अभिगच्छति। यतः –

१. ख.ज.ठ - चरे दप्भं। ट - चरे दप्तं। थ - चरे दप्पं। ध. चरे दित्तं। २. ज.ठ.थ - चिट्ठे विद्धे। ढ - चिट्ठे विट्ठे। ण विट्ठे विद्धे। फ - विट्ठ विट्ठे। ३. क.घ.च.छ.झ.ढ.ण.त - णिव्विसत्त। ख.थ - णिव्वे सत्त। ज.ट.ध.न.प.फ - णिव्वसत्त। ठ - णिच्चसत्त।

**गंभीरो वि तवोरासी जीवाणं दुक्खसंचितो[१]।**
**दुक्खो वणं दवग्गी वा कोवग्गी दहते खणा।।**
**।।३६-१३।।**

**जीवानां दुःखेन** - अनशनादिकष्टसहनेन **सञ्चितः** - यावत्पूर्वकोटिप्रायःकालेन सन्ततमासेविततयोपचितः - **दुःख-सञ्चितः**, अत एव **गम्भीरः** - अतुच्छः, एतादृग**पि तपोराशि**र्यो भवति, तं **कोपाग्नि**स्तथा **क्षणाद्दहति** - तज्जनितामात्मशुद्धिं तथाऽपाकुरुते, **यथा दुःखः** - मूर्तिमान् दुःखमेव, तद्धेतुभावात्, **दवाग्निः** - दवानलः, क्षणादेव **वनं** दहति। किञ्च -

**कोहेण अप्पं डहती परं च**
**अत्थं च धम्मं च तहेव कामं।**
**तिव्वं च वेरं पि करेंति कोधा**
**अधरं गतिं वा वि उविंति कोहा ।।३६-१४।।**

जीवः **क्रोधेनात्मानं परं च दहति** - तज्जनितपरिता-पपात्रीकुरुते। **अर्थं च धर्मं च तथैव काम**मपि दहति, तत्रार्थदाहोऽनर्थयोगात्, अनर्थाः क्षिप्रमायान्ति वाग्दुष्टं क्रोधनं तथा - इत्युक्तेः **(महाभारते ३८-३५)**, धर्महानिः, क्रोधाभिभूतस्य तत्त्यागयोगात्, वक्ष्यते च - जेणाभिभूतो जहती तु धम्मं - इति **(ऋषिभाषिते-३६-१७)**, कामक्षतिश्च - कामव्याघातहेतु-

१. क.ख.ग.घ.ज.झ.ठ.त.थ - संचितो। च - संचिओ। ट - संचित्तो। ढ.ण.ध.न.प.फ - संवितो।



कश्चित्तवृत्तिविशेषः क्रोध इति तल्लक्षणेन स्पष्टा।

किञ्च **क्रोधाज्जीवास्तीव्रमपि वैरं कुर्वन्ति**, वैरानुष-ङ्गजनकः क्रोधः - इत्युक्तेः **(प्रशमरतौ २६)**, अग्निशर्मवत्। **यद्वाऽपि क्रोधादधराम्** - नीचाम्, **गतिम्** - सर्पादियोनिम्, **उपयन्ति** - तत्प्रत्ययिककर्मविपाकाधीनतया गच्छन्ति। अत्र **वा** - शब्दः कोपविपाकसमुच्चये द्रष्ट्व्यः, यद्वाऽनालोचिताप्रतिक्रान्तस्यैव कृतक्रोधस्याधोगतिरिति पाक्षिकोऽयं विपाक इत्येतत्प्रदर्शनार्थं वा - पदमित्यवगन्तव्यम्।

क्रोधतोऽर्थादिहानिरित्युक्तम्, तत्रैव प्रधानहेतुमभिधत्ते -

**कोहाविद्धा ण याणंति मातरं पितरं गुरुं।**
**अधिक्खवंति साधू य रायाणो देवयाणि य।।**
**।।३६-१५।।**

**क्रोध**रूपशूलेन **विद्धाः**, **क्रोधविद्धाः**, समुदितक्रोधातिशया इत्यर्थः, ते **मातरं पितरं गुरुँश्च** - कलाचार्यादीन्, **न जानन्ति**, न बहुमन्यन्ते, यद्वैते मम पूजनीयाः, सर्वथाऽप्यनधिक्षेप्या इति विस्मरन्ति। उक्तं च - क्रुद्धः पापं न कुर्यात् कः, क्रुद्धो हन्याद् गुरूनपि - इति **(वाल्मिकीरामायण - सुन्दरकाण्डे ५५-४)**।

तथा **साधून्, राज्ञश्च दैवतानि चाधिक्षिपन्ति** - आक्रोशगोचरीकुर्वन्ति। तदाह - क्रुद्धो हि सम्मूढः सन् गुरुमाक्रोशति - इति **(भगवद्गीता - शाङ्करभाष्ये २- ६३)**।

अन्यत्रापि - नाकार्यमस्ति क्रुद्धस्य नावाच्यं विद्यते क्वचित् - इति **(वाल्मिकीरामायणे ५-५५-५)**। एवं च नीत्यतिक्रमादनर्थ-

परम्परानिमन्त्रणमेव, नीतिश्चैवं व्यवस्थिता – अतिक्रुद्धोऽपि न मान्यमतिक्रामेदवमन्येत वा – इति **(नीतिवाक्यामृते २५–८०)**। किञ्च मात्राद्यवज्ञातो लक्ष्म्या अवज्ञा भवति, यदुक्तम् – मातापितृभ्यां मनसाप्यवमन्यमानेष्वभिमुखा अपि श्रियो विमुखीभवन्ति – इति **(नीतिवाक्यामृते २४–७७)**। इत्थं च–

**कोवमूलं णियच्छंति धणहाणिं बंधणाणि य।**
**पियविप्पओगे य बहू जम्माइं मरणाणि य।।**
**।।३६–१६।।**

**क्रोध** एव **मूलम्** – निबन्धनं यथा स्यात्तथा **क्रोधमूलम्, धनहानिं बन्धनानि च नियच्छन्ति** – क्रोधवशगाः प्राप्नुवन्ति, क्रोधो ह्यविवेकजनकः, स च परमापदां पदमिति। अपराण्याप्यनर्थानि प्राप्नुवन्तीत्याह– **बहून् प्रियविप्रयोगांश्च** क्रोधात् प्रीतिप्रनाशभावात्, यदार्षम् – कोहो पीइं पणासेइ – इति **(दशवैकालिके ८–३८)**। ततश्च ज्ञात्यादिवियोगः, तदुक्तम् – ञाति – मित्ता सुहज्जा च परिवज्जन्ति कोधनं – इति **(अङ्गुत्तरनिकाये ७–६–१२)**।

किञ्चान्यत्, **जन्मानि मरणानि च**, नियच्छन्तीति वर्तते, जन्ममरणात्मकसंसृतेः कषायमूलकत्वात्, तथा चोक्तम् – संसारस्स उ मूलं कम्मं तस्स वि हुंति य कसाया – इति **(आचाराङ्गनिर्युक्तौ १८९)**। अन्यत्रापि धिक् क्रोधं स्वपरापकारकरणं संसारसंवर्धनम् – इति **(हरिवंशपुराणे ६१–१०८)**। तदत्र निष्कर्षमाह –



**जेणाभिभूतो जहती तु धम्मं**
**विद्धंसती जेण कतं च पुण्णं।**
**स तिव्वजोती परमप्पमादो**
**कोधो महाराज ! ण[1] मुच्चियव्वो ।।३६–१७।।**

हे **महाराज** ! एतच्च सम्बोधनं प्रत्येकबुद्धमहर्षिणा पर्षदि प्रधानश्रोतृभूतं कञ्चिद् राजानमुद्दिश्याभिहितमिति सम्भाव्यते, भगवतो 'गोयमा' – इतिसम्बोधनवत्। यदभिहितं तदाह– **येनाभिभूतस्तु धर्मं जहाति**–लोक–लोकोत्तरमर्यादाया उल्लङ्घनं विधत्ते, **येन च** प्राक्काले **कृतं पुण्यं विध्वंसयति, स तीव्रज्योतिः** – ज्वालासहस्रसङ्कुलजाज्वल्यमानज्वलनादप्यतिशायितयात्युग्रदीप्तिः, **परमप्रमादः**, कथञ्चिदशेषप्रमादाधिकत्वात्, **क्रोधः** – कोपः, **न** – नैव, अविनाश्य **मोक्तव्यः**, उपेक्षितव्यः, यत् पारमर्षम् – अणथोवं वणथोवं अग्गीथोवं कसायथोवं च। ण हु भे वीससियव्वं थेवंपि हु तं बहुं होइ – इति **(आवश्यकनिर्युक्तौ १२०)**।

क्रोधनिग्रहानिग्रहफलोपदर्शनेनोपसंहरति –

**हट्ठं करेतीह[2] णिरुज्झमाणो**
**भासं करेतीह[2] विमुच्चमाणो।**
**हट्ठं च भासं च समिक्ख पण्णे**
**कोवं णिरुंभेज्ज सदा जितप्पा।।३६–१८।।**

१. क.द - णमुच्चियव्वो। ख.ज.ठ.ढ.ण.थ.ध.न.प.फ - णमुव्वियव्वो। ग.घ.च.छ.झ.त - णिरुज्झियव्वो। ट - णमुव्वियमो। २. क.ग.द.ज.ठ.ढ.ण.थ.ध.न.प.फ - करेंती। ख - कंरेंति। घ.च.झ.ट.त - करेति।

**इह निरुध्यमानः** – निगृह्यमानः, क्रोधः, पुरुषं **हृष्टम्** – आनन्दितं नीरोगं वा **करोति,** अन्यथा पश्चादनुशयादिना हर्षाद्यनापत्तेः, क्रोधेन धातुक्षोभादिना रोगसमुन्मज्जनाच्च। एतदेवाह– **इह विमुच्यमानः**– उपेक्ष्यमाणत्वेनानिगृहीतः क्रोधः **भस्म करोति,** प्रागुक्तहृदयदाहाद्यपायपात्रीकुरुत इत्यर्थः।

तस्मात् **प्राज्ञः** – परिणतप्रकृताध्ययन – तात्पर्यार्थः, **हृष्टं च भस्म च समीक्ष्य** – द्वयोरपि विपाकं पर्यालोच्य, **जितात्मा** – वशीकृतात्मा, **सदा कोपं निरुन्ध्यात्।** क्रोधनिरोधस्यानन्तर– फलतया हर्ष उदितः। साम्प्रतं परम्परफलमाह–

**एवं से सिद्धे बुद्धे विरते विपावे दंते दविए अलंताती णो पुणरवि इच्चत्थं हव्वमागच्छति।। त्ति बेमि।।**

**एवम्** – क्रोधनिरोधेन, **सः** – जितात्मा, **सिद्ध** इत्यादि प्राग्वत्। इति षट्त्रिंशत्तमे तारायणीयाध्ययन आर्षोपनिषद्।

**।। अथ सप्तत्रिंशत्तमोऽध्यायः।।**

अनन्तराध्ययने क्रोधनिरोधः कर्तव्यतया प्रतिपादितः, तत्र यतमानस्यापि कुतीर्थिकसंस्तवादिना विचिकित्सा सम्भवति, ततश्च सम्यक्त्वदूषणेन कषायनिरोधोऽपि कदाचिद् विफलतामुपयायादिति कुतीर्थिकविशेषमतं मिथ्यातयोपपाद्य सम्यक्त्वे स्थिरीकर्तुं प्रथमं तन्मतमुपन्यस्यति –

**'सव्वमिणं पुरा उदगमासि' त्ति सिरिगिरिणा माहणपरिव्वायगेण अरहता इसिणा बुइयं।।३७–१।।**

**सर्वमिदम्** – दृश्यमानं जगत्, **पुरा** – प्राक्काले, **उदकम्** –



जलस्वरूपम्, **आसीत्।** **इति** पूर्वपक्षानुवादेन **श्रीगिरिणा** पूर्वावस्थापेक्षया **ब्राह्मणपरिव्राजकेनार्हतर्षिणोदितम्।**

स चायं पूर्वपक्षः– आसीदिदं तमोभूतमप्रज्ञातमलक्षणम्। अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः।। तस्मिन्नेकार्णवीभूते नष्टस्थावरजङ्गमे। नष्टामरनरे चैव, प्रनष्टोरगराक्षसे।। केवलं गह्वरीभूते, महाभूतविवर्जिते। अचिन्त्यात्मा विभुस्तत्र, शयानस्तप्यते तपः – इत्यादि। ततः –

**एत्थं अंडे संतत्ते, एत्थं लोए संभूते, एत्थं [1]सासेसे, इयं णे वरुणविहाणा, उभयोकालं उभयोसंझं खीरं णवणीयं मधु समिधासमाहारं खारं संखं च पिंडेत्ता अग्गिहोत्तकुंडं पडिजागरमाणे विहरिस्सामीति, तम्हा एयं सव्वं ति बेमि, ण वि माया, ण कदाति णासि, न कदाति न भवति, न कदाति न भविस्सति य।।३७–२।।**

**अत्राण्डं सन्ततम्** – विस्तीर्णम्, उक्तं च–माहणा समणा एगे आह अंडकडे जगे – इति **(सूत्रकृताङ्गे १–१–३)।** यदोद– कमन्तरेण न किञ्चिदपि वस्त्वासीत्, पदार्थमात्रशून्योऽयं संसारो– ऽभूत्, तदा ब्रह्माऽप्स्वण्डमसृजत्, तच्च क्रमेण विस्तृतभाव– मुपयातम्। तद् द्विधा कृत्वा भगवान् दिवं भूमिं च निर्ममे, तदाह – नारायणपराऽव्यक्ता– दण्डमव्यक्तसम्भवम्। अण्डस्यान्तस्त्वमी

---

१. क.ज.ट.ठ.ढ.ण.ध.न.प.फ - सासेसे। ख.थ. सासेइयं। ग.घ.च.छ.झ.त - सासासे।

भेदाः, सप्त द्वीपा च मेदिनी।। गर्भोदकं समुद्राश्च जरायुश्चापि पर्वताः। तस्मिन्नण्डे त्वमी लोकाः, सप्त सप्त प्रतिष्ठिताः।। तत्रेहाद्यः स भगवान्, उषित्वा परिवत्सरम्। स्वयमेवात्मना ध्यात्वा तदण्डमकरोद् द्विधा। ताभ्यां स शकलाभ्यां तु दिवं भूमिं च निर्ममे – इति **(लोकतत्त्वनिर्णये २५–२७)**। एतदेवाह – **अत्र** – उक्ताण्डे, **लोकः** – द्यावापृथिव्यादिलक्षणं भुवनम्, **सम्भूतः** – उत्पन्नः। **अत्र** लोके, **सासेसे** – इति सासएसे – सासदेसे – **शस्यदेशः**। धान्यादिसम्पन्नो भूमिभागोऽपि सम्भूत इत्याशयः। एवं जीवनानुकूलेऽस्मिन् लोके सर्वा प्रकृतयोऽभूवन्, एवं पृथिव्यप्ते-जोवाय्वाकाशसमुद्रसरित्पर्वतमकराकरनिवेशादिसंस्थितिरप्यभूत्।

तदेषां सर्वेषामप्यादिकारणं जलमेवेति मत्वा तदधिष्ठातारं वरुणदेवं प्रतितर्पयन्तस्ते यत्प्रोचुस्तदाह– **इदम्** – अनुष्ठानम्, **नः** – अस्माकम्, **वरुणविधानात्**, – वरुणदेवतोद्देशेन शास्त्र-निर्दिष्टात् पवित्रविधानात्, प्रवृत्तमस्तीति गम्यते। एतद्विधातृ-प्रतिज्ञामेवाह – **उभयतः कालम्** – प्रातःकाले सायंकाले च, एतदेवाह– **उभयतः सन्ध्यम्, क्षीरं नवनीतं मधु समितः** – होमार्हकाष्ठानि, तासां **समाहारः** सम्यगाहरणम् – **समित्समाहारः**, तम्, **क्षारम्** – अग्निहोत्र उपयुज्यमानं भस्म, **शङ्खं च पिण्डयित्वाग्निहोत्रकुण्डम्** – यज्ञकुण्डम्, **प्रतिजागरत्**– पर्युपासन्, **विहरिष्यामीति**।

अत्र प्रतिविधीयते – जगतो ह्युत्पत्तिः सतः स्यादसतो वा, नाद्यः, अनुत्पन्ने जगति कस्यचिदपि सतोऽसम्भवात्, नाप्यसतः,



खरविषाणादेरपि भावोद्भवप्रसङ्गात्। किञ्च जगदपि सज्जाय-तेऽसद्वा ? न प्रथमः, कालत्रयेऽपि सत उत्पत्त्ययोगात्, अन-वस्थानप्रसङ्गाच्च, नाप्यसतः, खरशृङ्गस्योद्भवादर्शनात्।

किञ्च येभ्यः संसारोत्पत्तिरिष्टा, तेषामवस्थानं कुत्राऽऽसीत् ? प्रलये च धराजलादि किंरूपं भवति ? न हि मूर्त्तं कदाप्यमूर्त्ततां प्रतिपद्यते मूर्त्तं व्यक्तमेवेति नैतदव्यक्तं भवितुमर्हति।

यदि च सर्वथाऽप्यव्यक्तमनिर्देश्यमेव रूपं संहृतस्य जगत इष्यते, तत्तु वन्ध्यापुत्रस्यैव युज्यते। एवं च यथा खपुष्पात् कूर्मरोमप्रसूतिर्नास्ति, तथाऽभूतेभ्यो भूतानामप्युद्भवो न सम्भवति।

किञ्च भूतगणविरहे ब्रह्मादेः शरीरस्यैवासम्भव इति कुतस्तन्निःसृताण्डाज्जगत्प्रसूतिवार्ताऽपीति विचारणीयम्, देहाभावे च बुद्ध्यादेरप्यसम्भवाद् वाङ्मात्रं ततः जगज्जन्म।

किञ्च सोऽपि ब्रह्मादिः केन कृतः ? अकृत एवैष सनातन इति चेत् ? तथैव लोकोऽपि शाश्वत एवाभ्युपगम्यतामित्यानीतोऽसि मार्गे। एतदाशयेनैवाह– **तस्मादेतदे**व वक्ष्यमाणं **सर्वं** सम्य**गिति ब्रवीमि**, यन् **नापि माया** – न मायामात्रमिदं जगत्, यतः साऽपि सत्यसती वेति दुरुत्तरः पर्यनुयोगः। **न कदाचि**दपि लोको **नाऽऽसीत्**, अपि त्वासीदेव, **न कदाचि**दपि **न भवति**, अपि तु भवत्येव, **न कदाचिन्न भविष्यति च** अपि तु भविष्यत्येव। तस्मात् – सर्वाः पृथिव्यश्च समुद्रशैलाः, सस्वर्गसिद्धालयमन्तरिक्षम्। अकृत्रिमः शाश्वत एष लोकः, अतो बहिर्यत्तदलौकिकं तु – इति प्रतिपत्तव्यम् **(लोकतत्त्वनिर्णये ३–३४)**। तस्मात् –

**पडुप्पण्णमिणं सोच्चा सूरसहगतो गच्छे, जत्थेव सूरिये अत्थमेज्जा खेत्तंसि वा णिण्णंसि वा तत्थेव णं पादुप्पभायाए रयणीये जाव तेयसा जलंते, एवं खु मे कप्पति पातीणं वा पडिणं[1] वा दाहिणं वा उदीणं वा पुरतो जुगमेत्तं पेहमाणे अहारीयमेव रीतित्तए।।३७-३।।**

**इदम्** - अनन्तरोक्तम्, **प्रत्युत्पन्नम्** - युक्तिसहत्वेन वर्तमानं जैनमतम्, **श्रुत्वा** - निशम्य, तदाराधको भूयात्। तदाराधना च कृत्स्ना सर्वविरतावेवेति तदाचारविशेषमभिदधन्नाह - **सूरसहगतो गच्छेत्**, सूर्येऽनस्तगत एवाहारविहारादिक्रियाः कुर्यात्, अन्यथा प्राणिव्यापादनादिदोषप्रसक्तेः। एतदेव व्यतिरेकेणाह - **यत्रैव सूर्योऽस्तमियात्, क्षेत्रे वा निम्ने वा** - कथञ्चिदधोव्यवस्थिते भूभागे, वाशब्देनान्यस्यापि तथाविधप्रासुकस्थानस्य ग्रहणं द्रष्टव्यम्। **तत्रैव** वासं कल्पयेत्, कियत्कालं यावदित्याह - **प्रादुः** - प्राकाश्ये, ततः **प्रकाशप्रभातायां रजन्याम्**, अत्र **यावत्**करणादिदं द्रष्टव्यम् - फुलुप्पलकमलकोमलुम्मिलितंमि अह पंडुरे पहाए रत्तासोगप्पगासकिंसुअसुअमुहगुंजद्धरागसरिसे कमलागरसंडबोहए उट्ठियम्मि सूरे सहस्सरस्सिंमि दिनयरे तेयसा जलंते - इति।

अत्र व्याख्या - फुल्लं-विकसितं च तदुत्पलं - पद्मं च - फुल्लोत्पलं तच्च कमलश्च - हरिणविशेषः, तयोः कोमलम्-

१. क.ख.ग.ज.ढ.थ.ध.न.प.फ - पडिणं। घ.च.छ.झ.त - पडीणं। ट.ठ - पेडिणं। ण - पडिण।



अकठोरम्, उन्मीलितम् - दलानां नयनयोश्चोन्मीलनं यस्मिंस्तत्तथा, अथ रजनीप्रभातानन्तरं पाण्डुरे - शुक्ले, प्रभाते-उषसि, रक्ताशोकस्य - तरुविशेषस्य, प्रकाशः - प्रभा, स च किंशुकं च - पलाशकुसुमम्, शुकमुखं च प्रतीतम्, गुञ्जा - रक्तकृष्णः फलविशेषः, तदर्द्धं चेति द्वन्द्वः, एषां यो रागो रक्तत्वम्, तेन सदृशः - समो यः स तथा, तथा कमलाकराः - पद्मोत्पत्तिस्थानभूता ह्रदादयस्तेषु यानि षण्डानि - नलिनवनानि, तेषां बोधकः-विकाशको यः स तथा, तत्र, उत्थिते - उद्गते, सूरे- रवौ, किम्भूते ? सहस्रं रश्मीनाम् - किरणानां यस्येति सहस्ररश्मिः, तस्मिन्, दिनं करोतीति दिनकरः, तत्र, **तेजसा** - दीप्त्या, ज्वलन्निव **ज्वलन्**। सूर्योदयं यावत्तु तत्रैव तिष्ठेदित्याशयः। ततः किं कुर्यादित्याह - **एवं खलु मे** - सर्वविरतस्य मम, आत्मव्यपदेशेनै-तदुपलक्षणमशेषसर्वविरतानाम्, उत्सर्गतो रात्रिविहारादेर्निषिद्धत्वात्, **प्राचीनं वा** - पूर्वदिग्भवं देशम्, ग्रामादि वा, एवं **प्रतीचीनं वा** - पश्चिमदिग्भवम्, **दाक्षिणं वा उदीचीनं वा** - उत्तरदिग्भवम्, **पुरतः** - अग्रतः, **युगमात्रम्** - शरीरप्रमाणम्, शकटोर्द्धिसं-स्थितमिति यावत्, भूभागं **प्रेक्षमाणः** - प्राणिपीडापरिहारार्थं निभालयन्, **यथेर्यामेव एतुं कल्पते** - कर्तव्यतया युज्यते। यथेर्यासमितिः प्रवचने प्रतिपादिता तथैवानुपालयतो ममावश्यक-कार्याय गमनमर्हतीत्याशयः। इत्थं च प्रवचनपक्षपातितया यत्फलमाप्नोति तदाह -

**एवं से सिद्धे बुद्धे विरए विपावे दंते दविए अलंताती णो**

**पुणरवि इच्चत्थं हव्वमागच्छति।। त्ति बेमि।।**

**एवम्** - ईर्यासमित्यादेर्यथार्थाराधनेन, **सः** - आराधकः, **सिद्ध** इत्यादि प्राग्वत्, इति सप्तत्रिंशत्तमे श्रीगिरिनामाध्ययन आर्षोपनिषद्।

## ।। अथाष्टत्रिंशत्तममध्ययनम्।।

अनन्तराध्ययन ईर्यासमित्याद्युपदेशोऽभिहितः, स च सुखाभिलाषिणां दुरनुष्ठेय इति दुःखानुबन्धिसुखनिर्वेदोत्पादनायाह-

**जं सुहेण सुहं लद्धं अच्चंतसुखमेव तं।**
**जं सुखेण दुहं लद्धं मा मे तेण समागमो।।३८-१।।**

**यत्सुखेन** - पुण्यानुबन्धिपुण्योदयप्राप्तेन सौख्येन, **सुखं लब्धम्, अत्यन्तसुखमेव तत्**, तदेव पारमार्थिकं सुखम्, परिणामरम्यस्यैव तत्त्वतो रम्यत्वात्। एवकारव्यवच्छेद्यमाह - **यत्सुखेन** - पापानुबन्धिपुण्यविपाकप्राप्तेन सौख्येन, यत्सौख्यानुभवेनेति भावः, **दुःखं लब्धम्, मा मे तेन** - दुःखावहसुखेन सह **समागमो** भूत्, उक्तं च - सतोऽसत्ता स्थिता मूर्ध्नि, रम्याणां मूर्ध्न्यरम्यता। सुखानां मूर्ध्नि दुःखानि किमेकं संश्रयाम्यहम् ? - इति **(महोपनिषदि ६-२४)**, हेयमेव दुःखावहं सौख्यमित्यभिप्रायः।

केनैवमुक्तमित्याह- **सातिपुत्तेण बुद्धेण अरहता इसिणा बुइतं - सातिपुत्रेण बुद्धेनार्हतर्षिणोदितम्**। ननु यदि सुखस्य हेयत्वं प्रतिज्ञायते, तदैतद्विरुध्यते -



**मणुण्णं भोयणं भोच्चा मणुण्णं सयणासणं।**
**मणुण्णंसि अगारंसि झाति भिक्खू समाहिए।।**
**।।३८-२।।**

**मनोज्ञम्** - सुन्दरम्, **भोजनं भुक्त्वा, मनोज्ञं शयनासन**मुपभोगविषयीकृत्य, **मनोज्ञेऽगारे** - विहारालये, **समाहितः** - सुखसाधनसम्पादितसमाधानशाली, **भिक्षुः**, **ध्यायति**, सुखेन ध्याननिर्मग्नो भवतीत्याशयः। एतदेव व्यतेरेकेणाभिधत्ते -

**अमणुण्णं भोयणं भोच्चा अमणुण्णं सयणासणं।**
**अमणुण्णंसि गेहंसि दुक्खं भिक्खू झियायति।।**
**।।३८-३।।**

**अमनोज्ञमि**त्यादि सुगमम्। नवरमिष्टवियोगानिष्टयोगकदर्थितोऽसावार्त्तध्यानमुपयाति, अतः सुखेन सद्ध्यानं कर्तुं न शक्नोतीत्याशयः।

यदि सुखसमागम नेष्यते, तदा सद्ध्यानमपि कथं भविष्यतीति चेत् ? न, अभिप्रायापरिज्ञानात्, मनोज्ञमिति यज्ज्ञानिनां मनोभिः परिणामसुन्दरतया ज्ञायते तत्। ततो नात्र स्निग्धत्वादिविशिष्टमेव भोजनादि विवक्षितम्, अपि तु संयमाविरोधि, तत एव ध्यानस्य सुध्येयतासम्भवात्। किञ्च संयमिनां सुन्दरमप्येतदेव यत् संयमोपष्टम्भकम्, उक्तं च-तित्तगं व कडुअं व कसायं अंबिलं व महुरं लवणं वा। एअलद्धमन्नत्थ पउत्तं, महुघयं व भुंजिज्ज संजए - इति**(दशवैकालिके ५-१-९७)**। यदि तु मनोज्ञाभ्यवहरणमेव प्रतिज्ञायते, तदेदं विरुध्यते - दुगंधं वा सुगंधं वा, सव्वं भुंजे न

छड्डुए – इति **(दशवैकालिके ५–२–१)**। एवं शयनादावपि ज्ञेयम्, न चैतन्महार्घं भिक्षूणां कल्पतेऽपि। प्रतिश्रयस्तु सुन्दरः प्रवचने प्रतिक्रुष्टः, यदुक्तम् – मणोहरं चित्तघरं, मल्लधूवेण वासियं। सकवाडं पंडुरुल्लोयं, मणसा वि न पत्थए।। इंदियाणि उ भिक्खुस्स, तारिसम्मि उवस्सए। दुक्कराइं निवारेउं, कामराग–विवड्ढणे।। सुसाणे सुन्नगारे वा, रुक्खमूले व एगगो। पइरिक्के परकडे वा, वासं तत्थऽभिरोयए – इति **(उत्तराध्ययने ३५/४–६)**।

अतो यथाभिहिता व्याख्यैवाऽत्रानुसन्धेयाः, सत्त्वानु–ग्रहार्थमुपदेशे प्रवृत्तानां कारुणिकानां तदहितहेतुवचनोच्चारणा–सम्भवात्। किञ्च वैषयिकसुखाशंसैवासद्ध्यानमिति क्व तन्मार्ग–णपराणां शुभध्यानगन्धोऽपीत्यलं प्रपञ्चेनेत्याशयेनाह –

**[1]एवं अणेगवण्णागं तं परिच्चज्ज पंडिते।**
**णऽण्णत्थ लुब्भई पण्णे एयं बुद्धाण सासणं।।**
**।।३८–४।।**

**एवम्** – उक्तरीत्या, **अनेकवर्णकम्** – प्रभूतप्रकारम् कुयुक्तिपटलं लोके विद्यते, **तत् पण्डितः** – परमार्थवेत्ता, **परित्यज्य**, स **प्राज्ञः** – आत्महितोपायज्ञाता जिनप्रवचनादन्**यत्र न** – नैव **लुभ्यति**, इयमेवास्य प्राज्ञता यदन्यत्रास्यास्पृहता, परमात्म–प्रवचनपीयूषपानसतृष्णता चेति। **तदेतत्** – अनन्तरोक्तम्, **बुद्धानाम्** – केवलज्ञानात्मकपरमबोधसम्पन्नानाम्, **शासनम्** – निर्देशः।

१. क.ख.ज.ट.ठ.ढ.ण.थ.न.फ - रूवं। ग.घ.च.छ.झ.त.ध.प - एवं।



यद्वा **एवम्** – मनोज्ञं भोजनमित्यादौ सद्व्याख्यादरेण, **अनेकवर्णकम्** – वर्णवैचित्र्योपेततया सुन्दरम्, रसाद्युपलक्षणमेतत्, **तत् परित्यज्य पण्डितः प्राज्ञ**श्चात्महिताद**न्यत्र न लुभ्य**तीत्यर्थः। तदेतत् शक्यपरित्यागविषयाऽनुशास्तिः, इतरगोचरां त्वाह –

**णाणावण्णेसु सद्देसु सोयपत्तेसु बुद्धिमं।**
**गेहिं वायपदोसं वा सम्मं वज्जेज्ज पंडिए।।३८–५।।**

**नानावर्णेषु** – प्रभूतप्रकारेषु, **शब्देषु**–ध्वनिषु, **श्रोत्रप्राप्तेषु** – श्रवणेन्द्रियविषयीभूतेषु, **बुद्धिमान्** – जे गुणे से आवट्टे, जे आवट्टे से गुणे – **(आचाराङ्गे १–१–५/४०)** इतिप्रवचनपरिकर्मितमतिः, **गृद्धिम्** – मूर्च्छातिशयम्, **वाक्प्रद्वेषं वा** – अहोऽत्यसुन्दरा एत इत्यादिवचसा व्यक्तीभवन्तीं मनसोऽप्रीतिम्, **पण्डितः** – रागो य दोसो वि य कम्मबीयं – इतितत्त्वपरिणतिमान्, **सम्यक्** – अनुबन्धशुद्ध्या, **वर्जयेत्** – परित्यजेत्।

**एवं रूवेसु गंधेसु रसेसु फासेसु [1]अप्पप्पणाऽभिलावेणं।**

**एवम्** – शब्दालापकानुसारेण, रूपादीष्वात्मीयात्मीयाभिलापेन भावना कार्येत्यतिदेशः। रागादिनिग्रहस्योपादेयतामेव समर्थयति –

**पंच जागरओ सुत्ता [2]दुक्खस्स कारणा।**
**तस्सेव तु विणासाय[3] (पण्णे वट्टिज्ज संतयं)।।**
**।।३८–६।।**

**जाग्रतः** – रागादिनिग्रहेऽप्रमत्तस्य, **पञ्चेन्द्रियविषयाः**

१. क.घ.ज.झ.ठ.ढ.ण.त.न.फ - अप्पप्पणा। ख.ग.ट.थ.ध.प - अप्पणा। २. मुद्रितेषु - अप्पदुक्खस्स। ३. हस्तादर्शेषु तुर्यपादो नोपलभ्यते।

शब्दादयः, **सुप्ता** इव सुप्ताः, कर्मबन्धं प्रति प्रतिहतशक्तयो भवन्ति, अन्यथा तु त एव विषया **दुःखस्य** – नारकादियातनायाः **कारणानि** भवन्ति। यद्वा **दुःखस्य कारणानी**ति शब्दादीनां स्वरूपविशेषणम्, प्राय एषां तद्धेतुभावात्। तस्मात् **तस्यैव** – दुःखस्यैव, **तुः** विशेषणाय, स च सर्वस्यापि दुःखघातायैव प्रवृत्ततयाऽत्रैवाभियोगः श्रेयानिति विशेषयति, **विनाशाय** – एकान्तिकात्यन्तिकक्षयाय, **प्राज्ञः** – दुःखक्षयसदुपायविचक्षणः, **सन्ततम्** – अनिशम्, महत्फलस्य प्रायोऽल्पायाससाध्यत्वा-सम्भवात्, **वर्तेत** – प्रयतेत। ननु तथापि दुष्करमिदमिति चेत् ? अत्राह –

**वाहिक्खया[1] व दुक्खं वा सुहं वा णाणदेसियं।**
**मोहक्खयाय एमेव[2] दुहं वा जइ वा सुहं।।३८–७।।**

**यथा व्याधिक्षयाय** – रोगनाशाय, **ज्ञानदेशितम्** – चरक – सुश्रुतादिश्रुतनिर्दिष्टम्, **दुःखम्** – शिरावेधक्षारपातादिकष्टम्, **सुखम्** – तथाविधज्वरादौ स्वादु शर्करोन्मिश्रं भोज्यम्, **वा**-शब्दावुभयत्र साम्यप्रदर्शकौ, एतदुभयमपि रोगनिर्विण्णानां समतयैवाभिमतं भवतीति भावः।

**एवमेव मोहक्षयाय दुःखं वा यदि वा सुखम्,** प्रति-कूलानुकूलपरीषहा इत्यर्थः, उभयत्रापि समभाव एव भवति। तस्मान्न

१. क.ढ.ण - खयादुःखं। ख.ज.ट.ठ.ध.न.प.फ - खयावदुखं। ग - क्खया व दुक्खं। घ.च.झ.त - क्खयाय दुक्खं। २. क.घ.च.छ.झ.ढ.ण.त - व दु। ख.ग.ज.ट.ठ.थ.ध.न.प.फ - वा दु।



किञ्चिद् दुष्करत्वमिन्द्रियनिग्रहे मोहसंहारबद्धकक्षाणामिति हृदयम्। किञ्च –

**ण दुक्खं ण सुहं वा वि जहा हेतु तिगिच्छति।**
**तिगिच्छिए[1] सुजुत्तस्स दुक्खं वा जति वा सुहं।।**
**।।३८–८।।**

**यथा** कुशले वैद्ये **चिकित्सति** सति **न दुःखं** निर्वेदस्य **हेतुर्भवति, न वाऽपि सुखं** हेतुर्भवति। रोगक्षयैकप्रयोजनतया प्रवृत्तत्वेन तस्य दुःखाद्युपयोगविरहेण दुःखादेररतिजनकत्वा-सम्भवात्। इत्थं च यथा **चिकित्सिते सुयुक्तस्य**–सम्यगनुस्यूतस्य, **दुःखं वा यदि वा सुखं** सममेव भवति, तथा –

**मोहक्खए उ जुत्तस्स दुक्खं वा जइ वा सुहं।**
**मोहक्खए जहा हेऊ न दुक्खं न वि वा सुहं।।**
**।।३८–९।।**

**मोहक्षये तु** – मोहसंहार एव, **युक्तस्य** सर्वात्मना सम्प्रवृत्तस्य, **दुःखमि**त्यादि प्रागनुसारेण सुगमम्। उक्तं च – भूमितलशयनं वा प्रान्तभैक्षाशनं वा, सहजपरिभवो वा, नीचदुर्भाषितं वा। महति फलविशेषे नित्यमभ्युद्यतानां, न मनसि न शरीरे दुःखमुत्पादयन्ति – इति **(मालिनीवृत्तम्)**।

एवं मोहक्षयायाभ्युद्यतानां सुखादौ समचित्तवृत्तिभावेऽपि पुरुषविशेषमधिकृत्य देशनादिविशेष आवश्यकः, इत्थमेव सम्प्रति-पत्त्यादिसम्भवादित्याह–

१. ख.च.ज.ट.ठ.थ - च्छए। शेषेषु - च्छिए।

**तुच्छे जणम्मि संवेगो, निव्वेदो उत्तमे जणे।**
**अत्थित्तादीण भावाणं विसेसो [1]उवसे(दे?)सणं।।**
**।।३८-१०।।**

**तुच्छे** - अनतिभाविते, **जने** - श्रोतृलोके, **संवेग** उपदेश्य इति गम्यते। संवेजनी कथा कर्तव्येत्यभिप्रायः, अत्रायं सम्प्रदायः - संवेगणी चतुव्विहा, तं जहा - आतसरीरसंवेदणी परसरीरसंवेदणी इहलोगसंवेदणी परलोगसंवेदणी। आतसरीरसंवेदणी - जं एतं अम्हं तुब्भं वा सरीरयं एयं सुक्क-सोणित-वसा-मेदसंघात-निप्फणं मुत्तपुरीसभायणत्तणएण य असुतित्ति कहेमाणो सोतारस्स संवेगमुप्पादयति। परसरीरसंवेदणीए वि परसरीरमेवमेवासुतिं, अहवा परतो मततो तस्स सरीरं वण्णेमाणो संवेगमुप्पाएति। इहलोकसंवेदणी जहा सव्वमेव माणुस्समणिच्चं कदलीथंभनिस्सारं एवं संवेगमुप्पाएति। परलोक संवेदणी जहा - इस्साविसायमयकोहलोहदोसेहिं एवमादीहिं। देवा वि समभिभूया तेसु वि कत्तो सुहं अत्थि ? जति देवेसु वि एरिसाणि दुक्खाणि, णरगतिरिएसु को विम्हतो ? अहवा सुभाणं कम्माणं विपाककहणेणं संवेगमुप्पाएति - जहा इहलोए चेव इमाओ लद्धीओ सुभकम्माणं भवंति - इति **(दशवैकालिकचूर्णौ ३-९९)**।

**तथोत्तमे जने** किञ्चिद्व्युत्पन्ने श्रोतरि, **निर्वेदः** कथनीयः, निर्वेजनी कथा कार्येत्याशयः, सा चेयमभिहिता - निव्वेदणीकहा

१. क.ग.ज.ट.ठ.ड.ढ.ण.ध.न.प.फ - उवसेसणं। ख - उवासणं। घ.च.छ.झ.त - उवदेसणं। थ - उवसेणं।



चउव्विहा, तं जहा - इहलोए दुच्चिण्णा कम्मा इहलोग - दुहविवागसंजुत्ता भवंति चउभंगो। पढमे भंगे चोरपारदारियाणं पढमा निव्वेदणी। बितिया निव्वेदणी - इहलोए दुच्चिण्णा कम्मा परलोए दुहविवागसंजुत्ता भवंति, जहा नेरतियाणं इह मणुस्सभवे कतं कम्मं निरयभवे फलति। ततिया निव्वेगणी - परलोए दुच्चिण्णा कम्मा इहलोगदुहविवागसंजुत्ता भवंति, जहा बालत्तणे चेव दरिद्दकुलसंभूता खय-कुट्ठ-जलोयराभिभूता। चतुत्थी निव्वेगणी - परलोए दुच्चिण्णा कम्मा परलोए चेव दुहविवागसंजुत्ता भवंति, जहा पुव्विं दुक्कएहिं कम्मेहिं चंडालादिदुगुंछितजातीजाता एकंतणिद्धंधसा णिरयसंवत्तणीयं पुरेऊण णिरयभवे वेदंति - इति **(दशवैकालिकचूर्णौ ३-१००)**।

एवं यथायोगं संवेगाद्युत्पाद्य **अस्तित्वादीनां** जीवसम्बन्धिनां **भावानाम्** - सद्भूतपदार्थानां यो **विशेषः**, **तस्योपदेशनम्** - प्ररूपणं कर्तव्यम्। पुरुषादिभेदेन प्ररूपणाभेदोऽप्यावश्यकः, अस्थानदेशनाया उन्मार्गनयनरूपत्वेन महापापत्वात्, शासनमालिन्यादिप्रयोजकतया बोधिदुर्लभत्वाद्यनर्थकृत्त्वाच्चेत्याह-

**सामण्णे गीतणीमाणा विसेसे मम्मवेधिणी।**
**सव्वण्णुभासिया वाणी णाणावत्थोदयंतरे।।**
**।।३८-११।।**

**नानावस्थाः** - आदिधार्मिकाद्यनेकप्रकारा दशाविशेषाः, तेषा**मुदयाः** - तत्तज्जीवेषु प्रादुर्भावाः, तेषा**मन्तरे** - तत्कालीनान्तराले, **सर्वज्ञः** - केवलज्ञानालोकालोकितलोकालोकः, तेन

**भाषिता** – समुदिता, **वाणी** – सरस्वती, **सामान्ये** निरूपणे कृते सति **गीतम्** – अविगीतम् – अनिन्द्यम् – प्रशस्तमिति यावत्, **निर्माणम्** – स्वनिर्मितं गुणप्रतिपत्तिलक्षणं फलं यस्याः सा – **गीतनिर्माणा** भवति। अयमाशयः, यदा प्रथममेवारब्धस्थूल – धर्माचारा श्रोतारः, तदा तेऽत्यन्तमुग्धतया कञ्चन देवताविशेषमजानाना न विशेषप्रवृत्तेरद्यापि योग्याः, किन्तु सामान्यरूपाया एवेत्येषु तादृश्येव देशना युज्यते, यथा–अविशेषेण सर्वेषामधिमुक्तिवशेन वा। गृहिणां माननीया यत्, सर्वे देवा महात्मनाम्।। सर्वान् देवान् नमस्यन्ति, नैकं देवं समाश्रिताः। जितेन्द्रिया जितक्रोधा, दुर्गाण्यतितरन्ति ते – इति **(योगबिन्दौ ११७–११८)**। अन्यथा तु प्रशस्तफलप्रसूत्यसम्भवः, अनिष्ट–फलोत्पत्तेरित्याह – **विशेषे** – विशेषनिरुपणे कृते सति, **मर्मवेधिनी** – अरून्तुदा देशना भवति,

अयमभिप्रायः – अनन्तरोक्तानामादिकर्मणां जीवानां यदि–जिनेश्वर एव निर्दोषो देवः, सर्वेऽपीतरे रागादिदूषिता मिथ्यात्विनो हरिहरहिरण्यगर्भादयः – इति कथ्यते, तदैषां मर्मवेध एव सञ्जायते, अद्यापि तादृशदेशनायोग्यतापरिपाकविरहात्।

ननु कथमेकैव जिनवाणी स्वरूपसुन्दरापि विचित्रफला सम्पद्यत इति चेत् ? यथा वर्षाजलमेकमपि शुक्ति – सर्प–गवादौ विचित्रपरिणामं प्रतिपद्यते तथेति गृहाण। अयमत्र तात्पर्यम्–यथा कश्चिदौषधमपि वायुप्रकोपजनितव्याधौ हितकरमपि कफजनितरोगे तदेवाहितं भवति, एवमत्रापि जिनवचनस्य स्वरूपसुन्दरत्वेऽपि



बालाद्यपेक्षयोदितस्यैव सत्परिणतिर्द्रष्टव्या, उक्तं च – हितमपि वायोरौषधमहितं तच्छ्लेष्मणो यथात्यन्तम्। सद्धर्मदेशनौषधमेवं बालाद्यपेक्षमिति – इति **(षोडशके १–१५)**। तदत्र प्रसङ्गतस्त–त्तत्पर्षद्योग्यं नानाविधमुपदेशमाह –

**सव्वसत्तदयोवेतो[1] णारंभो ण परिग्गहो।**
**सत्तं तवं दयं चेव भासंति जिणसत्तमा।।३८–१२।।**

**आरम्भः** – पृथिव्याद्युपमर्दः, **परिग्रहः** – धनादिमूर्च्छा, तदेतदुभयमपि **सर्वसत्त्वेषु** या **दया** तयो**पेतः** सहितः **न**, नकारद्वयं निषेधावधारणार्थम्, नैव सम्भवतीति, जलानलवदनयोर्विरोधात्। तस्मात्, **जिनाः** – अवधिजिनादयः, तेषु **सत्तमाः** – श्रेष्ठाः – **जिनसत्तमाः**, केवलिन इत्यर्थः। ते **सत्त्वम्** – आरम्भादि–वर्जनात्मकसंयमविधावपूर्वापूर्ववीर्योल्लासम्, **तपः** – अनश–नाद्यनुष्ठानम्, एतदपि सर्वजीवकरुणाहेतुः, पाणिदयातवहेउं – इत्युक्तेः **(उत्तराध्ययने २६–३४)**, **दया** – शिष्टमशेषं समित्या–द्यनुष्ठानम्, हेतौ फलोपचारात्, ता**मेव भाषन्ते** – कर्तव्यतया प्ररूपयन्ति।

वस्तुतस्त्वेकस्यापि जीवस्य जिनशासनप्रवेशे चतुर्दशरज्ज्वा–त्मकलोकेऽमारिपटहवादनमिति – जिनधर्मस्य यत्किञ्चिदप्यङ्गं सर्वसत्त्वदयोपेतमेवेति भावनीयम्। उपदेशान्तरमाह–

१. ख - योवेता। ज.ठ. - योवेतो। ट - यावेतो। शेषेषु - योवेसो।

**दंतिंदियस्स वीरस्स किं रण्णेणऽस्समेण वा ?।**
**जत्थ जत्थेव [1]मोदेज्जा तं रण्णं सो य अस्समो।।**
**।।३८-१३।।**

**दान्तेन्द्रियस्य** - निगृहीतविषयप्रचारपरिणतकरणस्य, **वीरस्य** - लोकसञ्ज्ञाविदारणविचक्षणस्या**रण्येन किम्** ? न किञ्चित्, नास्य वनवास उद्वेगोत्पादनायालमिति भावः। **आश्रमेणा**पि **किम्** ? न किञ्चिदेव, मनोहरस्यापि प्रतिश्रयस्य तस्मिन् रागविकारजननेऽसमर्थत्वात्। नास्य मोक्षानुष्ठानपरायण-स्यारण्यादिक्षेत्रप्रयुक्ता काचिद्बाधोपजायत इति हृदयम्। एतदेव स्फुटयति - **यत्र यत्रैव** अरण्यादौ, स **मोदेत** - परमात्म-प्रवचनाराधनाजनितपरमानन्दपीयूषपाथोधौ निमज्जेत्, **तदेव** तस्**यारण्यम्,** आश्रमेऽपि दुष्करवनवासादिसाध्यफलावाप्तेर-स्याश्रमोऽप्यरण्यमेवेत्यर्थः। **स चाश्रमः**, अनुकूलोपाश्रयापेक्षित-चित्तसमाधानलक्षणसुखासिकाया अरण्येऽप्यवाप्तत्वेनारण्यमप्यस्या-श्रम एवेत्याशयः। एतदेव निदर्शनेनाह-

**किमु दंतस्स रण्णेणं ? दंतस्स व किमस्[2]समे ?।**
**णातिक्कंतस्स भेसज्जं ण वा सत्थस्सऽभेज्जता।।**
**।।३८-१४।।**

---

१. क - सांदंतो। ढ.ण - सोदंतो। ग - मोहंते। ध - मोहेज्जो। न - मोदेंज्जे। घ.छ.झ.त - मोदेज्जा। ड - मोदंतो। प - जत्थेवामादेयो। च - मोडेज्जा। ज.ट.ठ - मोदेंतो। २. घ.झ.त - ऽभेज्जता। च.छ - भेज्जता। शेषेषु - भेज्जती।



**किम्वि**त्यादि प्राग्वत्। यथाऽ**तिक्रान्तस्य**-व्यतिव्रजितरोगस्य, **भैषज्यम्** - अगदङ्गकारम्, **न** दातव्यं भवति, प्रयोजनविरहात्, **शस्त्रस्य** - निशितप्रहरणस्य, तद्विषयभूते वस्तुनि **यथाऽभेद्यता** - अशक्यभिदात्वमपि **न** विद्यते, तथा दान्तस्यारण्यादिक्षेत्रविशेष-प्रतिबन्धोऽपि न भवतीति भावः। तस्मात् -

**सुभावभावितप्पाणो सुण्णं रण्णं वणं पि वा।**
**सव्वमेतं हि झाणाय सल्लचि[1]त्ते व सल्लिणो।।**
**।।३८-१५।।**

**सुभावः** - प्रशस्तपरिणामः, प्रवचनोक्तसद्भूतपदार्थो वा, तेन **भावितः** - चन्दनगन्धवदेकरसीभूतः, **आत्मा** यस्य सः - **सुभावभावितात्मा**, तस्य, **शून्यम्** - अपगतजनसञ्चारम्, **अरण्यम्** - अटवी, वनति सम्भजति जनानिति **वनम्**, किञ्चि-ज्जनसञ्चारविषयं कान्तारम्, तद**पि वा,** उपलक्षणात् प्रतिश्रयादि वा, **सर्वमप्येतद् ध्यानाय हि** - धर्मशुक्ललक्षणशुभध्यानायैव, भवति।

अत्र दृष्टान्तमाह - **यथा** कस्यचित् **शल्यिनः** पादाद्य-वच्छेदेनान्तर्गतकण्टकवतः, यत्र तत्रापि तिष्ठतः, **शल्य**प्रयुक्त-वेदनोपयुक्तं **चित्तम् - शल्यचित्तम्,** आर्त्तध्यानमित्यर्थः, तदेव भवति, तथा प्रवचनपीयूषपरिणतिपरिपूतात्मनां यत्र तत्राप्यवस्थानं प्रशस्तध्यानस्यैव निबन्धनं भवति। इतरस्य तु तदेवेतरफलमिति स्पष्टयति -

---

१. क.ख.ट.ण.प - वित्ते य। ग.घ.च.छ.झ.त - चित्ते व। शेषेषु - चित्ते य।

**दुहरूवा दुरंतस्स णाणावत्था वसुंधरा।**
**कम्मादाणाय सव्वं पि कामचित्ते व कामिणो।।**
**।।३८-१६।।**

**दुष्टः** - नारकयातनाद्यपायाकुलः, **अन्तः** - पर्यवसानम्, यस्य स **दुरन्तः**, अदान्तात्मेत्याशयः, तस्य, अरण्याश्रमाद्यनेकावस्था यस्याः सा - **नानावस्था,** तामेव विशेषयति - **दुःखरूपा,** तद्धेतुभावात्, केयमित्याह - **वसुन्धरा** - अरण्यादिभूमिः, तस्याः **सर्वमपि** स्थानं **कर्मादानाय** - पापकर्म - बन्धाय भवति।

अत्रोदाहरणमाह - **यथा कामिनः** - इच्छामदनकामकलङ्कितस्य, यत्र तत्रापि तिष्ठतः, **काम**सञ्ज्ञोपयुक्तं **चित्तम्** - **कामचित्तम्,** तदेव भवति, तथाऽदान्तेन्द्रियस्य यत्र तत्रापि बद्धस्थितेर्दुर्ध्यानानुभावेनाशुभकर्मबन्ध एवेति।

ननु प्रतिपद्यामो वयं दमम्, किन्तु योऽदान्तदशायां कर्मबन्धः कृतः, तद्विपाकः किं वेदनीय एव ? किमुतास्त्यपि कथञ्चिन्मोक्ष इत्यत्राह -

**सम्मत्तं च दयं चेव णिण्णिदाणो य जो दमो।**
[1]**ततो जोगो य सव्वो वि सव्वकम्मक्खयंकरो।।**
**।।३८-१७।।**

**सम्यक्त्वं च** - सद्दर्शनम्, एतेन सम्यग्ज्ञानग्रहः, सहभावित्वात्, **दया चैव** - षट्कायसंयमश्च, विभक्तिव्यत्यासः

१. घ.च.छ.झ.त - तवो जो। ड - तव्वो। न - तेतोजो। शेषेषु - ततो जो।



प्राकृतत्वात्, **यश्च निर्निदानो दमः,** इतरस्य दुरनुबन्धित्वाद्विशिष्ट - ग्रहणम्, मोक्षाभिलाषितयेन्द्रियकषायनिग्रह इति तदर्थः, एतेन सच्चारित्रग्रहः। **ततश्च** - अनन्तरोक्तात् त्रितयात् प्रवर्तमानः **सर्वोऽपि योगः** - मनोवाक्कायप्रवृत्तिः, सर्वकर्मक्षयं करोतीति **सर्वकर्मक्षयङ्करः,** अनन्तरोक्तयोगस्य कृत्स्नकर्मेन्धनपरिप्लोषहेतुशुक्लध्यानानलोत्पत्तावरणिस्थानीयत्वात्।

निरनुबन्धितया निरर्थको दुरनुबन्धित्वेन चानर्थको योगोऽनुपादेयस्स्यादिति तद्विवेचनविषयमुपदेष्टि -

**सत्थकं वा वि आरंभं जाणेज्जा य णिरत्थकं।**
**पाडिहत्थिं स जोएंतो तडं घातेति वारणो।।**
**।।३८-१८।।**

**सार्थकम्** - परम्परयाऽपि मोक्षलक्षणार्थसाधकम्, **तद्वापि निरर्थकम्** - तदसाधकं **च, आरम्भम्** - यत्किञ्चिदनुष्ठानम्, **जानीयात्** - बहुश्रुतोपासनयाऽवगच्छेत्, अन्यथान्धक्रियासङ्काशादनुष्ठानात्प्रत्युत प्रत्यपायसम्भवात्।

एतदेवोदाहरति - यथा **स वारणः** - मदोन्मत्तो दन्ती, स्वप्रतिबिम्बमेव **प्रतिहस्तिन**मालोकयामीति मत्वा **पश्यन्,** तस्मिन् सञ्जातक्रोधः सन् **तटम्** - कासारादौ विषमशिलाघटितं तलम्, **घातयति** - दन्तादिप्रहारगोचरीकुरुते, ततश्च स्वरुधिररञ्जिताशेषजलोऽयं स्वयमेव विनिघातमापद्यत इत्यनुष्ठानेषु सार्थकतादिविवेकः करणीयः। एनमेव व्युत्पादयति -

**जस्स कज्जस्स जो जोगो[1] साहेतुं जे ण पच्चलो।**
**कज्जं वज्जेति तं सव्वं कामी वा णग्गमुंडणं।।**
**।।३८-१९।।**

**यो यो योगो यस्य कार्यस्य** निष्पत्तिं **साधयितुं प्रत्यलः** समर्थो **न** भवति, **तं सर्वं कार्यम्** - अनन्तरोक्तयोगम्, **वर्जयति**।

अत्र निदर्शनमाह - **कामी** - कामेन सप्रयोजनः पुरुषः, स **यथा नग्नः** - भावप्रधानत्वेन निर्देशस्य नाग्न्यम्, **मुण्डनं** च - शिरःकेशापनयनम्, नाग्न्येन सहितं मुण्डनम् - **नाग्न्यमुण्डनम्** तद् वर्जयति। कामी ह्युज्ज्वलवेशालङ्कारकेशादिविभूषित एव स्वप्रयोजनसाधनसमर्थो भवति, न तु नाग्न्यादिना, अतः स तत् स्वप्रयोजनसिद्धिविधावप्रत्यलं मत्वा वर्जयति, एवं मुमक्षुणाऽपि यन्मुक्तिसाधनं न भवति तद्वर्जनं कर्तव्यम्। असमर्थस्यापि वर्जनं तत्त्वज्ञानेन विना दुर्घटमिति तदेव परिवेषयति -

**जाणेज्जा सरणं धीरो ण कोडिं [2]देति दुग्गतो।**
**ण सीहं दप्पियं छेयं णेभं भोज्जा हि जंबुओ।।**
**।।३८-२०।।**

**धीरः** - दृष्टिवादोपदेशिक्या **धिया** विराजितः, **शरणम्** - स्वप्रयोजनसिद्ध्यनुगुणमाश्रयम्, **जानीयात्** - विवेकप्रज्ञागोचरी-विदध्यात्। न ह्यनीदृशात्साधनात्सिद्धिगन्धोऽपीति। अत्र निदर्शनमाह

१. क.ढ - गोसादे। ख.थ - गासा। ट - गो साहेयं जेण। ण - गोसादेतुं। शेषेषु - जोगोसाहे। २. क.ग.ढ.ण.ध.न.प - देति। ठ - दिंति। ख.ज.ट.थ - दिति। ड - देइ। घ.छ.झ - एति। फ - देंति।



- **दुर्गतः** - रोरः, **कोटिम्** - कोटिमितं धनम्, **न ददाति**, नैव दातुं शक्नोति, काकिण्या अपि तत्पार्श्वेऽभावादिति।

ननु मा भूत् तदानीं तत्पार्श्वे कोटिद्रव्यम्, पश्चादर्जयित्वा दास्यतीति चेत् ? न, भिक्षावृत्तौ तदर्जनस्याप्यसम्भवात्, रोरत्व-हेतुकदुष्कर्मोदयेऽवस्थान्तरोदयायोगाच्च। ततोऽसौ कोटिदानेऽसमर्थ एव विज्ञेयः, अत्रापि दृष्टान्तमुपदर्शयति- **जम्बूकः** - शृगालः, **न दृप्तं सिंहं छेकम्** - निपुणं च **इभम्** - गजम्, **न हि भुञ्ज्यात्** - तद्वधं कृत्वा कवलीकर्तुं नैव शक्नोति। अत्र सिंहादेर्विशिष्टत्वे-नोपादानाद् 'ग्लान्यादिना तत्पराभवः सम्भवे'दिति चोद्यमपि निराकृतम्।

तस्मात् सार्थक एवारम्भे यत्नः श्रेयानिति स्थितम्। तत्र यततोऽपि पिशाचा इव रागाद्या छलमवाप्य बाधयेयुरिति तच्छलनिमित्तस्यैव वारणमुपदिशति -

**[1]वेसपच्छाणसंबुद्धं [2]सव्वद्धं वारए सदा।**
**णाणाअरतिपायोग्गं णालं धारेतु[3] बुद्धिमं।।**
**।।३८-२१।।**

**व्येष्यम्** - अत्यन्तमभिलषणीयम्, मनोरममिति यावत्, **पच्छाण**मिति **प्रच्छादनम्** - कम्बलप्रभृतिः, व्येष्यप्रच्छादनत्वेन सम्बुद्धम् - **व्येष्यप्रच्छादनसम्बुद्धम्,** यदपि कम्बलादि ममा-

१. क.च.ज.झ.ढ.ण.ध.न.प.फ - पच्छा। ख.ट.ठ.थ - सच्छा। घ.छ.त - पच्चा। २. क.ढ.ण. - बुध्दं सव्व। झ - बध्देऽसंब। ज.थ - बध्देसब। घ.छ.त.च - बध्देसंब। ध.प - बध्दंसव्व। न.फ - वध्दं सव्व। ३. घ.छ.झ.त - धारेतु। ध - धीरेति। शेषेषु - धारेति।

भीष्टमिदमिति व्येष्यत्वेन विज्ञातं स्यादित्यर्थः, तत् **सदा सर्वाद्धम्** – सर्वकालं च **वारयेत्** – परिहारगोचरीकुर्यात्, अन्यथा पञ्चम–व्रतक्षतेः, ननु सदा–इत्यनेनैव सर्वाद्धमिति गतार्थमिति चेत् ? न, यत्किञ्चित्कालावच्छेदेनैव नित्यताप्रतीतिप्रसङ्गनिवारणेन तस्य सार्थक्यात्, दृश्यते च लोकेऽपीदृशो व्यवहारः, यथा–वत्सरं यावदसौ सदाऽप्याययाविति।

अभीष्टनिवारणं च तद्रत्या संयमारतिर्न स्यादेतदर्थमिति स्फुटयन्नाह– **नाना** – अनेकप्रकाराः, **अरतयः** – संयमानुष्ठान–निर्विण्णताः, ताश्चाध्यवसायभेदादनेकप्रकारा भवन्तीति नानात्व–मुक्तम्। ता उत्पादयितुं **प्रकर्षेणाभिविधिना योग्यम्** – शक्तम् – **प्रायोग्यम्**, तदेवातिप्रियकम्बलादि, तद् **धारयितुं** – स्वोपयोगे व्यापारयितुम्, स्वाधीनतया न्यासीकर्तुं वा, **बुद्धिमान्** – रागाद्य–नर्थहेतुजनक एव मत्परमशत्रुरितिमतिसम्पन्नः, **नालम्** – न समर्थो भवति, अकार्येऽनर्थहेतौ वाऽसामर्थ्यस्यैव प्रेक्षावत्तालिङ्गत्वात्। अत एव –

**बंभचारी जति कुद्धो वज्जेज्ज मोहुदीवणं।**
**ण मूढस्स तु बाहस्स मिगो अप्पेति सायकं।।**
**।।३८–२२।।**

**ब्रह्मचारी यदि क्रुद्धो**ऽपि कुतश्चित् कारणात् स्यात्, तदाप्यसौ **मोहोद्दीपनम्** – स्वपरमोहोदीरणहेतुवचनं तादृशचेष्टां च, **वर्जयेत्** – परित्यजेत्, न चैवमक्रुद्धावस्थायां मोहोद्दीपनानु–मतिप्रसङ्ग इति वाच्यम्, सर्वदा सर्वथा च तन्निषेध एव



तात्पर्यप्रतीतेः, यदि कोपाकुलत्वेऽपि तन्निषेधः, तदान्यथा तु किं वाच्यमित्याशयः।

देशकालाद्यनवच्छिन्ननिषेधमेव प्रतिवस्तूपमया समर्थयति – **मृगः** – हरिणः, **मूढस्य व्याधस्य** – कथञ्चिदिषुविषयम् – "कुत्र मया काण्डं न्यस्तम् ? – इत्याद्याकारकं मोहमापन्नस्य, **सायकम्** – बाणम्, **न तु** – नैव, **अर्पयति**, तथाकृते स्वात्मविघातध्रौव्यात्।

अत्रैवमुपनयः, ब्रह्मचर्यमित्यनादिकालीनव्याधसङ्काशस्य मोहस्य मौढ्यम्, ब्रह्मचर्यभावे तस्य स्वानुभावमनुदर्शयितुमसम–र्थत्वात्, लोकेऽपि समर्थस्य चेतनाविकृतेः कथञ्चिदापन्नेऽसामर्थ्ये मूढोऽयमभूदिति व्यपदिश्यते। एवं ब्रह्मचर्यप्रभावान्मोहस्य मौग्ध्ये सञ्जातेऽपि यदि ब्रह्मचरः स्वयमेव क्रोधादिवशगो मोहोद्दीपनं कुर्यात्, तदा मोहस्यासामर्थ्यमपाक्रियते, एवं च स्वयमेव परि–पूरितप्रतिपक्षस्थामाऽसौ ब्रह्मपरिणतात्मपर्यायविलोपमेव कुरुत इत्यत्राजाकृपाणीयन्यायापातः।

तस्माद्यथाऽज्ञकल्पोऽपि मृगो मूढस्य व्याधस्य सायकं नार्पयत्येव, तथा ब्रह्मचार्यपि सर्वावस्थास्वपि मोहोद्दीपनपरिहारमेव विदध्यात्। मोहोदयपरिहार एवोपायमाह–

**पच्छाणं चेव रूवं च णिच्छयम्मि विभावए।**
**किमत्थं गायते वाहो तुण्हिक्को वा वि पक्खिदा।।**
**।।३८–२३।।**

प्रच्छाद्यतेऽनेन वस्तुन आन्तरस्वरूपमिति **प्रच्छादनम्** – बाह्याकारादि, **तच्च रूपं च** – आन्तरिकसंतत्त्वम्[१], **निश्चये** –

१. सतत्त्वम् = स्वरूपम्, सह तद्भावेन वर्तते - इति (व्युत्पत्तिरत्नाकरे - १३७६)।

परमार्थविधौ, **विभावयेत्,** न केवलं बाह्याकारं विलोक्यैव मुह्येदपि तु सर्वत्र स्वरूपचिन्तां कुर्यादिति भावः, मोहस्या-तत्त्वदर्शनहेतुकत्वात्। उक्तं च – बाह्यदृष्टेः सुधासारघटिता भाति सुन्दरी। तत्त्वदृष्टेस्तु सा साक्षाद्विण्मूत्रपिठरोदरी – इति **(ज्ञानसारे १९-४)**।

लोकेऽपि बाह्याभ्यन्तररूपविपर्यासे सत्यपि तदनाकलय्य यो मुह्यति स विनश्यति, यस्तु सतत्त्वचिन्तां करोति, स महापायाद्विमुच्यते, यथा – **किमर्थ**मयं **व्याधः** – लुब्धकः, तमेव विशेषयति – **पक्षिणो** गृहीत्वा भोज्यार्थं **दार**यतीति – **पक्षिदा, गायति** – मधुरगीतोद्गीरणपरायणो दृश्यते ? नूनमस्य गीतप्रिय-पक्षिहिंसाभिप्रायो लक्ष्यत इति। **यद्वाप्यसौ तूष्णीकः** – मूकः, तदाप्यस्य तथाविधावस्थस्य विहङ्गमस्य ग्रहणार्थमेव शान्तिमयो बाह्याकारः सम्भाव्यत इति।

यस्त्वेवं सतत्त्वचिन्तां न कुरुते, स तु व्याधस्थानीयमोह-प्रयुक्तवधादिवेदनां विषहत इति सर्वत्र तत्त्वचिन्तनेन मोहोदयं पराकृत्य तत्परिहार विधेयः। किञ्चित्तु परिहाराविषयमपि भवतीति विवेचयति –

**कज्जणिव्वत्तिपाओग्गं आदेयं कज्जकारणं।**
**मोक्खनिव्वत्तिपाओग्गं विण्णेयं तं विसेसओ।।**
**।।३८-२४।।**

**कार्यम्** – सिषाधयिषितं कृत्यम्, तस्य **निर्वृतिः** – उपायेन साधनम्, तस्मिन् **प्रायोग्यम्** – प्रत्यलम्, किमुक्तं भवति – **कार्यकारणम्** – साध्यनिष्पादनसमर्थहेतुः, तदा**देयम्** – अपरि-हार्यतया ग्रहणयोग्यं भवति।



एवं सामान्येनोक्त्वा प्रकृते योजयति – **मोक्षः** – मुक्तिलक्षणं साध्यम्, तस्य **निर्वृत्तिः** – आत्मनि तत्पर्यायपरिणतिः, तस्मिन् **प्रायोग्यम्** – समर्थकरणम्, **तद् विशेषतः** – सर्वयत्नेन **विज्ञेयम्,** एतद्विज्ञानेनैव परमार्थतो विज्ञतायोगात्। एतद्विज्ञानमपि सद्गुरु-समायोगात्, तत्परिज्ञानं च न वेशादिमात्रतः, अनेकान्तोप-लब्धेरित्याह–

**परिवारे चेव वेसे य भावितं तु विभावए।**
**परिवारे वि गंभीरे ण राया णीलजंबुओ।।३८-२५।।**

**परिवारे च वेषे चा**पि सति **भावितं तु** – भावितमेव **विभावयेत्** – सद्गुरुत्वेन निश्चिनुयात्। अयं भावः – न भक्तादिपरिकरदर्शनमात्रेण शिष्यसमुदायदर्शनमात्रेण वाऽयं महान् इति सम्प्रधार्यम्, नाऽपि वेषादिलिङ्गनिभालनत एवायमेव सद्गुरु इत्याग्रहिणा भाव्यम्, किन्तु पारमर्षपरिणतिसम्पन्न एव संविज्ञगीतार्थे सद्गुरुरयमिति विभावना कर्तव्या, इत्थमेव पाण्डित्योपपत्तेः, उक्तं च – बालः पश्यति लिङ्गं मध्यमबुद्धिर्विचारयति वृत्तम्। आगम-तत्त्वं तु बुधः परीक्षते सर्वयत्नेन – इति **(षोडशके १-२)**।

ननु निर्गुणस्य परिवार एवासम्भवतीति स एवास्माकं तत्परिज्ञानबीजमिति चेत् ? अत्राह– **परिवारे गम्भीरेऽपि** – अतुच्छेऽपि – महत्यपि, आस्तां लघावित्यपिशब्दार्थः, **नील-जम्बूकः** – हरित्वर्णः शृगालः, नीलनामा वा कथाविशेषप्रसिद्धः

वा शृगालः, **न राजा** भवति, मृगराजसङ्काशस्थामाद्यभावात्। एवं प्रकृतेऽपि सिद्धान्तपरिणतिवञ्चितस्य परिवारादि सद्गुरुताप्रयोजकं न सम्भवतीति ध्येयम्, किञ्चासौ प्रवचनप्रत्यनीक इति साधुताऽप्यस्य दूरापास्ता, यदुक्तम् – जह जह बहुस्सुओ सम्मओ अ सीसगणसंपरिवुडो अ। अविणिच्छिओ अ समए, तह तह सिद्धंतपडिणीओ – इति **(उपदेशमालायाम् ३२३, सन्मतौ ३–६६)**।

ननु प्रियवचनश्रवणेन यद्गुरावस्माकं पक्षपातः स दुर्मोक्ष इति चेत् ? अत्राह –

**अत्थादाइं जणं जाणे णाणाचित्ताणुभासकं।**
**अत्थादाईण वीसंगो दाए तत्थस्स संतती।।३८–२६।।**

**नाना** – अनेकप्रकाराणि, **चित्तानि** – जनमनांसि, तान्यनुसृत्य भाषत इति **नानाचित्तानुभाषकः**, सिद्धान्तमनपेक्ष्य जनरञ्जन – प्रयोजनेन तदभिप्रायानुगुणमेवोचान इत्यर्थः, एतादृशं **जनमर्थादायिनम्** – स्वार्थलुब्धम्, **जानीयात्** – तत्त्वतोऽवगच्छेत्। तादृशाना**मर्थादायिनां** विगतः **सङ्गो** यत्र सः – **विसङ्गः** सत्सङ्ग इत्यर्थः, स **तथ्यस्य** – तत्त्वकदम्बकस्य, **सन्ततिः** – परम्परां **दद्यात्**, जनरञ्जनपराङ्मुखतया सूत्रप्ररूपणैकतत्परस्य सान्निध्यसेवैव मुक्तिसाधनसज्ज्ञानयोनिरिति हृदयम्।

ननु चान्येषामत्याह्लाददायिनी सरस्वती कथं गुणव्यभिचारिणी स्यादिति चेत् ? अत्राह –

**डंभकप्पं कत्तिसमं णिच्छयम्मि विभावए।**
**णिखिलामोस कारित्तु उवचारम्मि परिच्छतो।।**
**।।३८–२७।।**



नानाचित्तानुभाषकस्यानन्तरोक्तस्य सर्वमप्येतादृग् वचनं **दम्भकल्पम्**, मायाप्रायम्, मलिनाशयप्रयुक्तत्वेनानुरूपाभिप्रायविरहात्, अत एव पेशलमपि तद्वचो **निश्चये** – परमार्थविधौ, **कृत्तिसमम्** – त्वक्सदृशम् – निस्सारमिति यावत्, इति **विभावयेत्** – पर्यालोचयेत्।

अत्रैव निदर्शनमाह – यथा **निखिलामोषम्** – सर्वस्वकुण्टनम्, **कृत्वा** कश्चिच्चौरोऽज्ञातवृत्त्या तत्स्वामिसकाशे विनयं कुर्यात्, त**स्योपचारे** – अनुवादितादिलक्षणे विनयकर्मणि, यथा कश्चित् **परीक्षकः** – प्राज्ञः पर्यालोचको विभावयेत्, यथास्य वचनं दम्भमात्रमसारं चेति। तस्मात् –

**सब्भावे दुब्बलं जाणे णाणावण्णाणुभासकं।**
**पुप्फादाणे सुणंदा वा [1]पदकारघरं गता।।३८–२८।।**

**नानावर्णानुभाषकम्** – अनेकप्रकारं विचित्रं परचित्तमनुसृत्य भाषणशीलम्, **सद्भावे** – तत्त्वतः, **दुर्लबम्** – स्वपरनिस्तारणविधावसमर्थम्, यद्वा विचित्रवचनरचनाभिरात्मना प्रतिज्ञातमेव साधयितुमनलम्, **जानीयात्** – परिज्ञागोचरीकुर्यात्।

अत्र दृष्टान्तमाह – **यथा सुनन्दा पुष्पादाने पदकारगृहं गता**, भावार्थस्तु सम्प्रदायाभावात्, भावेऽपि वा तज्ज्ञानाभावान्नोच्यते। इत्थं च –

१. क.ग.ट.ठ.ढ.ध.प.फ - पदकारघरं। ख.ज - पदाकारघरं। घ.च.छ.झ.त - पवकारघरं। ण - पदकारघर। न - पदकरेघंरं।

**दव्वे खेत्ते य काले य सव्वभावे य सव्वधा।**
**सव्वेसिं लिंगजीवाणं भावणं तु विहावए।।**
**।।३८–२९।।**

**द्रव्ये क्षेत्रे च काले च सर्वभावे च सर्वथा** – अनन्तरोक्ताशेषप्रकारप्रकरणे, **सर्वेषां** लिङ्गविशिष्टजीवानाम् – **लिङ्गजीवानाम्, भावनां तु** – पर्यालोचनामेव, **विभावयेत्** – कुर्यात्। यन्न लिङ्गमात्रं शुभगुरुत्वप्रयोजकम्, नापि बाह्याचारमात्रम्, अपि त्वागमतत्त्वविभूषितं तदिति। इदृशविभावनाया अनन्तरफलं शुभगुरुसंयोगः, परम्परफलं तु तदाज्ञाराधनेन यद्भवति तदाह –

**एवं से सिद्धे[1] बुद्धे विरते विपावे दंते दवीए अलंताई णो पुणरवि इच्चत्थं हव्वमागच्छति त्ति बेमि।।**

**एवम्** – शुभगुरुवचनासेवनेन, **सः** – संसारसारसमासेवकः, **सिद्ध** इत्यादि प्राग्वत्। इत्यष्टत्रिंशत्तमे सातिपुत्रीयनामाध्ययन आर्षोपनिषद्।

**।। अथैकोनचत्वारिंशत्तमोऽध्यायः।।**

अनन्तराध्ययन आगमतत्त्वपरिणत्या सद्गुरुपरिज्ञानमुक्तम्, तत्परिणतिपरिज्ञापि पापत्यागादिबाह्याचारतः सम्भवतीत्याह–

**जे इमं पावकं कम्मं णेव कुज्जा ण कारवे।**
**देवा वि तं णमंसंति धितिमं दित्ततेजसं।।३९–१।।**

१. क.ख.ग.ज.ट.ठ.ढ.ण.ध.न.प.फ - सिद्धे।।३८।। घ-सिद्धे बुद्धे... णो पुणरवि०। च - सिद्धे बुद्धे०।



**यः** – महात्मा, **इदम्** – प्रत्यक्षमीक्ष्यमाणं पृथिवीकायादिसमारम्भलक्षणम्, **पापकं कर्म** – सावद्यमनुष्ठानम्, **नैव कुर्यात् नापि कारयेत्, तं धृतिमन्तम्** – इह संतिगया दविया णावकंखंति जीविउं इत्यागमोदितसंयमपरिणतिविशेषभूतधृतिविभूषितम् (इहैव जैने प्रवचने ये संयमिनः, त एवोन्मूलितातितुङ्गरागद्वेषद्रुमाः परभूतोपमर्दनिष्पन्नसुखजीविकानिरभिलाषाः साधवः – इति **प्रथमाङ्गे १–१–७/५७ वृत्तौ**), तमेव विशेषयति **दीप्तम्** – हुताशन इव कर्मवनदाहकत्वेन ज्वलत्तेजस्कम्, **तेजः** – तपोलक्षणा कान्तिर्यस्य सः – **दीप्ततेजाः**, तम्, **देवा अपि**, आस्तां राजप्रभृतिरित्यपिशब्दार्थः, **नमस्यन्ति** – अयमेवैको धन्यः, धिगस्मान् पापपरायणानित्यादिरूपकुशलचित्तोल्लसितबहुमानेन वन्दन्ते। यतस्ते जानन्ति यत् –

**जे णरे कुव्वती पावं अंधकारं महं करे।**
**अणवज्जं पंडिते किच्चा आदिच्चे व पभासती।।**
**।।३९–२।।**

**ये नराः पापं कुर्वन्ति** ते **महान्तमन्धकारं कुर्वन्ति** – महादुःखा[1]न्धतमसदुःखितमात्मानं विदधन्ति, **पण्डितस्त्वनवद्यम्** – निरवद्यानुष्ठानम्, **कृत्वा** – समासेव्य, **आदित्य इव प्रभासते**, अनन्तरवृत्तोदितदीप्ततेजा भवति। यद्वा निरवद्याचारानुभावेन महर्द्धिर्महाद्युतिः सुरः सञ्जायत इत्यर्थः। तस्मात् –

१. अन्धतमसम् = अन्धकारम्।

**सिया[1] पावं सइं कुज्जा तं ण कुज्जा पुणो पुणो।**
**[2]णाणि [3]कम्मं च णं कुज्जा साधुकम्मं वियाणिया।।**
**।।३९-३।।**

कदाचिदेतत् **स्यात्**, यत् **स्वयं सकृद्वा पापं कुर्यात्**, प्रमादादिवशीभूय, तत**स्तत्** - पापम्, **पुनः पुनर्न कुर्यात्**, अनुबन्धदोषभयात्, उक्तं च - से जाणमजाणं वा कट्टु आहम्मिअं पयं। संवरे खिप्पमप्पाणं, बीअं तं न समायरे - इति (**दशवैकालिके ८-३१**)। इत्थमेव प्रायश्चित्तमप्यात्मलाभं भजते, यदुक्तम् - पुणरवि काउं णेच्छदि तं दोसं जइ वि जाइ सयखंडं। एवं णिच्छयसहिदो पायच्छित्तं तवो होदि - इति (**कार्तिकेयानुप्रेक्षायाम् - ४५४**)।

तस्मा**ज्ज्ञानी** - अनन्तरोक्तागमसद्भाववेत्ता, इदं **साधुकर्म** - निरवद्यानुष्ठानम्, इति **विज्ञाय** - आगमादेव प्रतिपद्य, तत् **कर्म कुर्यात्** - स्वाचरणगोचरीविदध्यात्। एवं च -

**सिया (पुण्णं सइं कुज्जा) कुज्जा तं तु पुणो पुणो[4]।**
**[5]सन्निकायं [6]च णं[7] कुज्जा, साहु भोज्जो वि जायति।।**
**।।३९-४।।**

१. क.ख.ज.ट.ठ.ढ.ध.प.फ - सिवा पावं। ग.घ.च.छ.झ.त - सिया पावं। ण - सिवा पाव। न - सिवाणवं। २. फ - णोणि। ३. क.ख.ज.ट.ठ.ढ.ण.ध.न.प - कामं। ग.घ.च.छ.झ.त - कम्मं। ४. क.ढ.ण.ध - पुणा। ५. क.ख.ट.ठ.ण.थ - संनिकायं। ग.घ.त - से निकायं। च - णिकायं। ज - सेंनिकायं। झ - सन्निकायं। ढ.ध - संनिकाय। द - संति कायं। न फ - संतिकायं। ६. क.ग.घ.च.ज.झ.ठ.ण.त.थ - च। ख.ट.ढ.ध.न.फ - व। ७. क.ख.घ.च.ज.झ.ट.ठ.ण.त.थ.न.फ - णं। ग.ढ.ध - ण।



कदाचिदेतत् **स्यात्**, यत् **स्वयं सकृद्वा पुण्यम्** - निरवद्यानुष्ठानम्, **तम्** - पुण्यम्, **पुनः पुनः कुर्यात्तु** - विदध्यादेव, दुष्प्रापावाप्तित्वात्तस्य, तथा च पारमर्षम् - अत्तहिअं खु दुहेण लब्भइ - इति (**सूत्रकृताङ्गे २-२-३२**)। तथा **सम्यक् नितरां चीयत** इति **सन्निकायः** - सदनुष्ठानस्यैवानिशमभ्यस्तत्वेन प्राप्तपुष्टिः पर्यायः, तं **च कुर्यात्**, येन **भूयोऽपि साधु** - सदनुष्ठानं **जायते** - स्वकर्तृकतयोत्पद्यते - स्वयं तत्करोतीत्यर्थः, सानुबन्धस्य भवान्तरेऽप्यनुगामितायोगात्। (अत्र 'पुण्णं सइं कुज्जा' - इति कोष्ठकान्तर्गतः पाठो मत्परिकल्पितः, हस्तादर्शेषु न्यूनतादर्शनात्।) तस्मात्सावद्यं कर्म परिहृत्य निरवद्यकर्म समासेवेत्। तदासेवमानस्यापि यत् पूर्वकृतं पापकर्म तत्क्षयाय कर्तव्यशेषमाह-

**रहस्से खलु भो ! पावं कम्मं समज्जिणित्ता**
**दव्वओ खेत्तओ कालओ भावओ कम्मओ**
**[1]अज्झवसउ समं[2] [3]अपलिउंचमाणे जहत्थं आलो-**
**एज्जा। संजएणं अरहता इसिणा बुइतं।।३९-५।।**

**रहस्ये** - एकान्ते, **खलु भोः ! पापं कर्म समर्ज्य, द्रव्यतः, क्षेत्रतः कालतो भावतः कर्मतः** - अनुष्ठानतः, **अध्यवसतः** - पापविषयं चिन्तयतो मनसः, **समम्** - सार्धमेव, **अपरिकुञ्चन्** - मायामविदधन् - अनिगूहन्निति यावत्, **यथार्थमालोचयेत्** -

१. ख.ज.ट.ढ.ण.थ - अज्झवसउ। ग.घ.च.छ.झ.त - अज्झवसायओ। ठ - अज्झवसओ। द.न - अज्झववउ। ध.प - अज्जवउ। २. हस्तादर्शेषु - समं। मुद्रितेषु - सम्मं। ३. क.घ.छ.झ.ढ.त - अपलिउंच.। ख - अपलियंव.। ग.च.ज.ट.ठ.थ.द.ध.न.प - अपलियंच.। ण - अपलिउंव.।

गीतार्थगुरोः पुरतस्तत्प्रकाशनं कुर्यात्।

अयमाशयः, यद्यद्द्रव्यादिसम्बन्धिसावद्यमासेवितं तत्तद्वि-शिष्टतया तदालोचनं कर्तव्यम्, अन्यथा तत्तदंशतो निगूहनप्रसक्तेः शुद्धिसामग्र्यासम्भवात्।

नन्वत्र रहस्य इत्यभिधानतः प्रकटमासेवितस्यानालोचनमुदित-मिति चेत् ? न, अभिप्रायापरिज्ञानात्, यदि राहस्यिकमप्या-लोचनीयं तदेतरस्य का वार्त्तेति विवक्षितत्वात्। किञ्चैतेन आकं-पइत्ता अणुमाणइत्ता जं दिट्ठं - इत्यत्रत्यदृष्टदोषः प्रतिक्रुष्टः, (यो हि गुरुदृष्टमेव स्खलितमालोचयति, न तु शेषम्, तमधिकृत्यैष दोषोऽभिहित आगमे।) एतदपि शेषदोषापोहोपलक्षणमिति ध्येयम्।

किमुपज्ञमिदमध्ययनमित्यत्राह - **संयतेनार्हतर्षिणोदित-मिति**।

तदेवं पापकर्माऽऽलोच्य पुनस्तत्करणेऽस्वरसं विदध्यादित्य-न्योपदेशेन व्यनक्ति -

**ण वि अत्थि रसेहिं भद्दएहिं संवासेण य भद्दएण य।**
**जत्थ मिए काणणोसिते उवणामेति वहाए संजए।।**
**।।३९-६।।**

**नापि भद्रकैः** - सुन्दरै **रसैर्मे**ऽर्थो**ऽस्ति**, नापि **भद्रकेन संवासेन**, **च**कारौ समुच्चये, कस्मान्नास्तीत्यत्राह - **यत्र काननोषितान्** कृतवननिवासान् **मृगान्** - हरिणान् **सञ्जयः** - काम्पिल्यपुरराजा य उत्तराध्ययनेषूक्तः सोऽयं सम्भाव्यते, **वधायो - पनामयति** - प्रतिघातयति।



अत्र यत्रेति - भद्रकरसादिप्रयोजनभावे सतीत्यर्थः। नानुपहत्य भूतानि भोगः सम्भवतीति रसमूर्च्छितः सञ्जयो मृगान् घातयति, उक्तं च - कंपिल्ले नयरे राया, उदिन्नबलवाहणे।

नामेणं संजए नाम, मिगव्वं उवणिग्गए।।
हयाणीए गयाणीए, रहाणीए तहेव य।
पायत्ताणीए महया, सव्वओ परिवारिए।।
मिए छिवेत्ता हयगए, कंपिलुज्जाणकेसरे।
भीए संते मिए तत्थ, वहेइ रसमुच्छिए - इति

**(उत्तराध्ययने १८/१-३)**।

न चायमेवाध्ययनप्रवक्तेति सम्प्रधार्यम्, बुद्धबोधितत्वेनास्य प्रत्येकबुद्धताऽयोगात्।

एवं च यः कोऽपि भोगः, स सर्वोऽपि प्राण्युपमर्दनान्तरीयक इति पापविपाकभीरुणा त्याज्यैव भोगाशेति भावः, ततश्च तृष्णाप्रक्षयेण यत्पर्यवसति, तदाह -

**एवं से सिद्धे बुद्धे विरते विपावे दंते दवीए अलंताई णो पुणरवि इच्चत्थं हव्वमागच्छइ त्ति बेमि।।**

**एव**मित्यादि प्राग्वत्। इत्येकोनचत्वारिंशत्तमे संयतीयाध्ययन आर्षोपनिषद्।

## ।। अथ चत्वारिंशत्तमोऽध्यायः।।

अनन्तराध्ययने भोगतृष्णापरिहारोऽभिहितः, स चेच्छाजय-मन्तरेण दुष्कर इत्याह-

**'इच्छमणिच्छं पुरा करेज्जा' दीवायणेण**

**अरहता इसिणा बुइतं।।४०-१।।**

भोगतृष्णापरिजिहीर्षुः **पुरा** - प्रथमम्, **इच्छाम्** - अप्रशस्तवाञ्छात्मकं चित्तपर्यायम्, **अनिच्छाम्** - सन्तोषपर्यायेण परिणतं **कुर्यात्**, इति **द्वीपायनेनार्हतर्षिणोदितम्**। ननु किमेव-मिच्छानिकार उपदिश्यत इत्यत्राह -

**इच्छा बहुविधा लोए जाए बद्धो किलिस्सति।**
**तम्हा इच्छमणिच्छाए जिणित्ता सुहमेधती।।४०-२।।**

**लोके बहुविधा** धनाद्याकाङ्क्षाभेदेनानेकप्रकारा, **इच्छा** भवति, सा च शृङ्खलासङ्काशा, **यया बद्धो** जीवः **क्लिश्यते** - तत्तदिच्छाविषयाधिगमप्रयोजनेनाटनधावनादिदुःखभाग् भवति, उक्तं च - आशा नाम मनुष्याणां, काचिदाश्चर्यशृङ्खला। यया बद्धाः प्रधावन्ति, मुक्तस्तिष्ठति पङ्गुवत् - इति। अत एवोक्तमन्यत्र - समारम्भा भग्ना कति न कतिवारांस्तव पशो ! पिपासोस्तुच्छेऽस्मिन् द्रविणमृगतृष्णार्णवजले। तथापि प्रत्याशा विरमति न तेऽद्यापि शतधा न दीर्णं यच्चेतो नियतम-शनिग्रावघटितम् - इति **(भर्तृहरिसन्दृब्धशतके)**।

दृश्यते चाशाग्रहगृहीतानां विडम्बनाः प्रत्यक्षा एव, उक्तं च - सेवाध्वजोऽञ्जलिर्मूर्ध्नि हृदि दैन्यं मुखे स्तुतिः। आशाग्रहगृहीतानां कियतीयं विडम्बना? इति **(सेव्यसेवकोपदेशे १२)**। तस्मादेकस्या इच्छाया दासोऽशेषजगता दासीक्रियते, विपरीते च विपर्यय इत्याह - आशायाः खलु ये दासास्ते दासाः सर्वदेहिनाम्। आशा दासीकृता येन तस्य दासायते जगत् - इति **(कवितामृतकूपे २६)**।



नन्वाशापूर्त्तौ सुखसम्भवात्साऽप्यस्माकमिष्टैवेति चेत् ? सेयं पामामुत्पाद्य कण्डूयनसुखानुभवनिभा ग्रहिलता, उक्तविडम्बना-दुःखादर्शनात्, अन्वाह च - पुरःफलायामाशायां जनः कामं विडम्ब्यते - इति **(विदग्धमाधवे ४-१८)**।

न च कदाचिद्दुःखसम्भवविलोकनादाशामात्रे हेयतोपपादन-मयुक्तमिति वाच्यम्, इच्छाया सद्यो दुःखावहत्वात्, अनुभव एवात्र साक्षीति निमील्य नेत्रे पर्यालोचनीयम्। अत एवाहुः परेऽपि- आशाभिभूताः पुरुषा दुःखमश्नुवते क्षणात् - इति **(स्कन्दपुराणे २०-१६-१७)**। ननु तथाप्यन्ते सुखं भविष्यतीति नैकान्तहेयैवेच्छेति चेत् ? कस्यान्त इति प्राग् वक्तव्यम्, इच्छाया इति चेत् ?, मुग्धोऽसि, तदभावात्, इच्छा हु आगाससमा अणंतया - इति पारमर्षात् **(उत्तराध्ययने ९-४८)**, अत एवोक्तमन्यत्रापि - धिगिच्छामन्तवर्जिताम् - इति **(पद्मपुराणे ५-३०७)**।

तदिदमखिलं पर्यालोच्य हृदयमुपयाति निष्कर्षं यदिच्छैव दुःखम्, साक्षी चात्र सिद्धान्तः - अविक्खा अणाणंदे - इति **(पञ्चसूत्रे ५)**, अन्वाहुश्च - परस्पृहा महादुःखं निःस्पृहत्वं महासुखम् - इति **(ज्ञानसारे १२-८)**। अन्यत्रापि - आशा हि परमं दुःखं, नैराश्यं परमं सुखम् - इति **(भागवते ११-८-४४)**।

यत एवं **तस्मादिच्छामनिच्छया** - सन्तोषेण **जित्वा सुखमेधते** - प्राप्नोति, यदार्षम्-लोभं संतोसओ जिणे - इति **(दशवैकालिके ८-३८)**, अतोऽवश्यमत्र यतितव्यं सुखार्थिभिः, उक्तं च - आशापिशाचिका नित्यं देहस्था दुःखदायिनी। सन्तोषवर-

मन्त्रेण स सुखी येन नाशिता - इति **(धर्मरत्नकरण्डके १३०)**, अन्यत्रापि - तस्मादाशां जयेत् प्राज्ञो यदीच्छेच्छाश्वतं सुखम् - इति **(बृहन्नारदीयपुराणे ३३-३४)**।

ननु कथं सन्तोषमात्रेणेदृक् सुखं सम्भवतीति चेत् ? दुःखहेतुविहानादिति गृहाण, अत एवार्षे स एव सुख-सारतयोदितः, तदाह - सुहाइं संतोससाराइं - इति। नन्वेतदपि कथमिति चेत् ? अत्रैनं क्रममभिदधन्ति योगविदः - नैरपेक्ष्याद-नौत्सुक्यमनौत्सुक्याच्च सुस्थता। सुस्थता च परानन्दस्तदपेक्षां क्षयेन्मुनिः - इति **(योगसारे ५-१४)**। अत एवाहुः परेऽपि-सन्तुष्टस्य निरीहस्य स्वात्मारामस्य यत् सुखम्। कुतस्तत्कामलोभेन, धावतोऽर्थेहया दिशः? इति **(भागवते ७-११५-१६)**।

पुनरपीच्छानिर्वर्तितानर्थान् प्रदर्शयति-

**इच्छाभिभूया न जाणंति मातरं पितरं गुरुं।**
**अधिक्खिवंति साधू य रायाणो देवयाणि य।।**
**।।४०-३।।**

**इच्छामूलं नियच्छंति धणहाणिं बंधणाणि य।**
**पियविप्पओगे य बहू जम्माइं मरणाणि य।।४०-४।।**

प्राग्वत् **(ऋषिभाषिते ३६/१५-१६)**। न च तत्र क्रोधाधि-काराद्विसदृशतेति वाच्यम्। क्रोधस्यापीच्छामूलकतया कथञ्चि-त्तदभिन्नत्वात्। अन्यथा त्वत्रोक्ताधिक्षेपोऽपि न सङ्गतिमङ्गतीति विचारणीयम्।

अथ केयं वराकीच्छाऽस्मत्पुरत इति चेत् ? न,



सङ्कल्पमात्रत्वेऽपि दुर्विपाकत्वात्, दुर्मोक्षत्वाच्च, एतच्च प्रागभिहितमेव, लेशतस्तु पुनः प्रकारान्तरेणाह -

**इच्छंतेणिच्छते इच्छा अणिच्छंतं पि इच्छति।**
**तम्हा इच्छं अणिच्छाए जिणित्ता सुहमेहती।।**
**।।४०-५।।**

**इच्छता** - इच्छां कुर्वता, प्रथमं मनुष्ये**णेच्छेष्यते** - प्रियतया प्रतिभासविषयीक्रियते, ततः कथञ्चिद्विज्ञाततत्स्वरूपः संस्तस्याः किञ्चिद्विरक्तोऽसौ ततः प्रतिनिवर्तनाय प्रयतते, तदाऽ**निच्छन्तमपि** तामिच्छा स्वय**मिच्छति** - न तां शीघ्रमेव मुञ्चति, नैषा सुखेन हातुं शक्यत इत्याशयः। **तस्मात्** प्रथमत एवे**च्छा**मित्यादि पूर्ववत् **(ऋषिभाषिते ४०-२)**। उपदेशसर्वस्वमाह-

**दव्वओ खेत्तओ कालओ भावओ जहाथामं जहाबलं जधाविरियं अणिगूहंतो आलोएज्जासि त्ति।।४०-६।।**

**द्रव्यतः क्षेत्रतः कालतो भावतः** - द्रव्याद्यनुसारेणेत्यर्थः, तन्निरपेक्षत्वस्य प्रायोऽसम्भवात्, प्रतिभग्नतादिप्रयोजकत्वाच्च। **यथास्थाम** - शारीरशक्तिमनतिक्रम्य, तदनुसारेणेत्यर्थः, एतेन शक्तितो हीनमाराधनमपि प्रत्युक्तम्, अतिक्रमणस्य कथञ्चिद् द्विविधत्वाच्च। अत एवागम हीनव्युत्सर्गाद्यपि प्रतिक्रुष्टम्, यथा जो खलु तीसइवरिसो सत्तरिवरिसेण पारणाइसमो। विसमे व कूडवाही निव्विन्नाणे हु से जड्डे।। समभूमे वि अइभरो उज्जाणे किमुअ कूडवाहिस्स ?। अइभरेण भज्जइ तुत्तयघाएहि अ मरालो।। एमेव

बलसमग्गो न कुणइ मायाइ सम्ममुस्सग्गं। मायावडिअकम्मं पावइ उस्सग्गकेसं च।। मायाए उस्सग्गं सेसं च तवं अकुव्वओ सहुणो। को अन्नो अणुहोही सकम्मसेसं अणिज्जरियं।। निक्कूडं सविसेसं वयाणुरूवं बलाणुरूवं च। खाणुव्व उद्धदेहो काउस्सग्गं तु ठाइज्जा – इति **(आवश्यकनिर्युक्तौ भा.२३५-२३६, प्रक्षेपः १, १५४०-१५४१)**।

तथा **यथाबलम्**, धृतिशक्तिमनतिक्रम्य, **यथावीर्यम्**, शक्योत्थानपराक्रमाद्यनतिक्रम्य, किमुक्तं भवति – शारीरादिवीर्य**मनिगूहन्** – अनिह्नुवन् **आलोचयेः** – शाश्वतसुखसञ्चरं क्षोदयन् तदवलोकनं कुर्या**दिति**। उक्तसञ्चरसञ्चरणफलमेवाह–

**एवं से सिद्धे बुद्धे विरते विपावे दंते दवीए अलंताई णो पुणरवि इच्चत्थं हव्वमागच्छइ त्ति बेमि।।**

**एवमि**त्यादि प्राग्वत्। इति चत्वारिंशत्तमे द्वीपायननामाध्ययन आर्षोपनिषद्।

**।।अथैकचत्वारिंशत्तमोऽध्यायः।।**

अनन्तराध्ययन इच्छाजयेन यथाबलमाराधनं, सिद्धिलक्षणं तत्फलं चोक्तम्, अत्र तु तद्विपर्यये यो विपर्ययो भवति, तं वर्णयन्नाह–

**जेसिं आजीवतो अप्पा णराणं [1]छलदंसणं।**
**तवं ते आमिसं किच्चा जणा संणिचते जणं।।**
**।।४१-१।।**

१. क.ख.ग.ध.च.छ.झ.ढ.ण.त - बलदंसणं। ट.ठ.थ.द.ध.न.प.फ - छलदंसणं।



**येषामाजीवात्** – संयमजीवितावाप्तेरारभ्य, **नराणाम्**, मुग्धजनानाम्, **छलदर्शनम्** – मायया 'तपऋद्धिरेषा ममे'त्यादि प्रदर्शनम्, तदे**वात्मा** भवति, क्रियातद्वतः कथञ्चिदभेदात्, सदैव छलदर्शनप्रवृत्त एवात्मा भवतीत्याशयः।

यद्वा **येषामात्माऽऽजीवकः**, लिङ्गोपजीवी भवति, अत एव ते **नराणां छलदर्शनं** कारयन्ति– स्वकीयकूटवचनजालादिभिः स्वस्मिन्नसद्भूतं महर्षिस्वरूपं दर्शयन्ति।

**ते जनाः** – साध्वाभासाः, **तपः** – स्वाचरितं यत्किञ्चिदप्यनशनाद्यनुष्ठानम्, **आमिषं कृत्वा** – मत्स्यादिप्रलोभनाय यथा मांसशकलं क्षिप्यते, तत्स्थानीयं विधाय, **जनम्** – मुग्धलोकम्, **सन्निचयन्ते** – मेलयन्ति। किं चात इत्याह–

**विकीतं तेसि सुकडं तु तं च णिस्साए जीवियं।**
**कम्मचेट्ठा अजाता वा जाणिज्जा ममका सढा।।**
**।।४१-२।।**

**तेषां सुकृतम्** – आजीवनार्जितं यत्किञ्चिदपि पुण्यम्, **विक्रीतं तु** – ऐहिकसत्कारादिमात्रकृते हारितमेव, **तच्च निश्रया जीवितम्** – यदेषां चेष्टितं तन्न शास्त्रोदितमुधाजीवित्वसंवादि, अपि तु दानमानाद्याशंसया लोकावर्जनहेतोर्जनरञ्जनादिकरणेनेति वाणिज्यादिवदेतदपि निश्राजीवितमेवेति भावः। इत्थं च स्फुट एव सुकृतविक्रयः, तथा चाभिहितम् – दानमाननुतिवन्दनापरैर्मोदसे निकृतिरञ्जितैर्जनैः। न त्ववैषि सुकृतस्य चेल्लवः, कोऽपि सोऽपि तव लुण्ट्यते हि तैः – इति

**(अध्यात्मकल्पद्रुमे १३–२१)**।

तदैते **कर्मचेष्टाः** – कर्मोदयप्रयुक्तक्रियाकारिणः, नैषामनुष्ठानानि क्षयोपशमजनितानि वीर्यस्फोरणकृततपःपराक्रमस्थानीयानि, अपि तु केवलमौदयिकभावहेतुकानीति। यद्वैते**ऽजाताः** – संयमजीवितं प्रतीत्यालब्धजन्मानः, साध्वाभासमात्रत्वात्तेषाम्। अनभिजाता वा, तादृशचेष्टितस्य कुलीनेऽसम्भवात्, सम्भवे वा कथञ्चित्तत्र परमार्थतः सत्कुलत्वस्यैवाभाव इति भावनीयम्। तथा ते **ममकाः** – ममकारैकपरायणाः, उपध्यादौ सञ्जातगाद्‌र्ध्यातिशया इत्यर्थः, तथा **शठाः** – छलदर्शनादिमायाचारपरा इति **जानीयात्**।

इत्थं च न केवलमेषां सुकृतविक्रयः, अपि तु नारकयातनाहेतुदुष्कृतक्रयोऽपीत्यर्थादावेदितम्, तथा चोक्तम्–वेषेण माद्यसि यतेश्चरणं विनात्मन् ! पूजां च वाञ्छसि जनाद् बहुधोपधिं च। मुग्धप्रतारणभवे नरकेऽसि गन्ता, न्यायं बिभर्षि तदजागलकर्त्तरीयम् – इति **(अध्यात्मकल्पद्रुमे १३–५)**। इतश्चैषा शठसङ्काशता, मुनिभावाभावे मुनिलिङ्गधारणात्, उक्तं च – गुणांस्तवाश्रित्य नमन्त्यमी जनाः, ददत्युपध्यालयभैक्ष्यशिष्यकान्। विना गुणान् वेषमृषेर्बिभर्षि चेत्, ततष्ठकानां तव भाविनी गतिः – इति **(अध्यात्मकल्पद्रुमे १३–८)**। गतिमेवैषामभिदधन्नाह–

**गलुच्छिंत्ता[1] क[2](झ)सा चेव[3] [4]पच्छा पावंति वेयणं।**

१. क.ख.ज.ट.ठ.द.ध.न.प.फ - छित्ता। ग.ढ.थ - च्छित्ता। मुद्रितेषु - च्छिन्ना। २. ३. ख.ज - असा वेव। ग- असातेव। घ.च.झ.त - असोते वा। ट.ठ - असा चेव। ढ.ध - कसा चेव। घ.प - आसा चेव। न.फ - आसा वेव। ४. क.ख.ग.ज.ट.ठ.ध.प - पच्छा। घ.च.झ.त - मच्छा। ढ.थ - पछा। न - वच्छा।



**अणागतमपस्संता पच्छा सोयंति दुम्मती।**
**मच्छा व झीणपाणीया कंकाणं घासमागता।।**

**।।४१–३।।**

**गलः** – मत्स्यग्रहणयन्त्रम्, तेनो**त्क्षिप्ताः** – तालुवेधद्वारेण पानीयान्निष्काशिताः, **झषाः चेव** मत्स्या इव, ते साध्वाभासाः **पश्चात्** – दुष्कृतविपाककाले **वेदनाम्** – नारकादियातनाम्, **प्राप्नुवन्ति** – विवशतयाऽनुभवन्ति। इत्थं च ते **दुर्मतयः** – आत्मविघातानुगुणतया कुत्सितधियः, प्राक्काले**ऽनागतम्** – अद्याप्यनुदितं पापविपाकम्, **अपश्यन्तः** – सद्गुरुवचनेनाप्यनाकलयन्तः, तं प्रति गजनिमीलिकामवलम्बमाना वा, **पश्चात्** – विपाककाले, **शोचन्ते** – हहा ! किमित्यतिदुःसहदुःखमिदमस्माकमकस्मादुपस्थितमित्यादिना परिदेवन्ते।

अत्रैव निदर्शनमाह – **यथा क्षीणपानीयाः** सूर्यकरसम्पर्कात् प्रहीणस्वाधारभूतजलाः, **मत्स्याः** – मीनाः, एतदुक्तं भवति–वेलावृद्धिकाले जलेन सागरतट आच्छादिते केचन मत्स्यास्तत्रागच्छन्ति, तेषु य आहाराद्यासक्त्या काले न निवर्तन्ते ते वेलाहानौ सत्यां निम्नादिभागेऽत्यल्पपानीये कृच्छ्रान्निवसन्ति, तदपि जलं सूर्यकरानुभावेनात्यन्तं क्षयमुपयाति, ततश्च दशमीदशां प्राप्ता यावत्ते मीना भवन्ति, तावत् **कङ्कानां** कर्कटाभिधपक्षिणाम्, **ग्रासमागताः** – कवलतां प्राप्ताः – तैर्जीवन्त एव खादिता भवन्तीत्यर्थः। इत्थं च –

**पच्चुप्पण्णरसे गिद्धा मोहमल्लपणोल्लिया।**
**दित्तं पावंति [1]उक्कंठं वारिमज्झे व वारणा।।**
**।।४१-४।।**

प्राग्वत् **(ऋषिभाषिते १५-१६)**। किञ्च -

**आहारमेत्तसंबद्धा कज्जाकज्जणिमिल्लिता।**
**[2]पक्खिणो घतकुंभे वा अवसा पावेंति संखयं।**
**मधु [3]पास्यति [4]दुर्बुद्धी पवातं से ण पस्सति।।**
**।।४१-५।।**

आहारमात्रे सम्बद्धाः - कृतप्रतिबन्धाः, **आहारमात्रसम्बद्धाः** ग्रासमात्रगृद्धय इत्यर्थः, अत एव **कार्याकार्ययोः** - हितानुबन्धितया करणीये विपरीततयाऽकरणीये च, **निमीलिताः** - निमीलितमतिचक्षुषः, अकृत्येऽपि कृताभियोगा इति भावः, ते **घृतकुम्भे पक्षिण इवावशाः**, आत्मानं घृतनिमज्जनस्थानीयविपद्भ्यो मोचयितुमसमर्थाः, **सङ्क्षयं प्राप्नुवन्ति**।

तदत्र **मधु पास्यति दुर्बुद्धिः प्रपातं** तु **तस्य न पश्यती**ति न्यायापातः। प्रसिद्धं चैतन्मधुबिन्दुनिदर्शनम्। प्रपातमेव प्रकृते योजयति -

---

१. क.ख.ग.ज.ट.ठ.थ.द.ध.न.फ- उक्कट्टुं। च.झ - उक्कंठं। घ.छ.त - उक्कण्ठं। ढ.ण. - उक्कद्धं। प - ओक्कट्टुं। २. क - पणिखिणो। ख.ग.ज.ठ.ढ.ण.थ.द.ध.न.प.फ - णिक्खिणो। घ.च.छ.झ.त - पक्खिणो। ट - णिरिवणो। ३. क.ख.घ.छ.ज.झ.ट.ठ.ढ.ण.त.थ.ध.न.प.फ - पास्यति। ग.च - पावेति। द - पावयंति, पावेति। ४. क.ग.घ.च.छ.ज.झ.ट.ठ.ढ.ण.त.ध.प - दुर्बुद्धी। ख - दुर्ब्बुद्धी। थ - दुर्ब्बद्धी। न.फ - दुर्वुद्धी।



**आमिसत्थी झसो चेव मग्गते अप्पणा गलं।**
**आमिसत्थी चरित्तं तु जीवे हिंसति दुम्मती।।४१-६।।**

यथाऽऽमि**षार्थी झषः**, **आत्मना** - स्वय**मेव गलम्** - स्वविघातनिबन्धनं यन्त्रम्, **मार्गयति** - मदिष्टसाधनमिदमिति मत्वा तदन्वेषणं विधत्ते, तथा **दुर्मतिर्जीव आमिषार्थी** - लोकपूजोपधिभक्तपानादिप्रयोजनः सन्, **चारित्रं तु** - सर्वार्थसिद्धिविधाववन्ध्यसाधनभूतं चरणमेव, **हिनस्ति** - विराधयति, तद्विराधना च दुर्गतिं प्रति धावनमिति व्यक्तैवास्य दुर्मतिता, तथा च पारमर्षम् - संधावइ नरगतिरिक्खजोणिं मोणं विराहेत्तु असाहुरूवे - इति **(उत्तराध्ययने २०-४६)**। पुनरप्यस्य दुर्मतितामेवोपमया स्पष्टयति -

**अणग्घेयं मणिं [1]मोत्तुं सुत्तमत्ताभिनंदती।**
**सव्वण्णुसासणं [2]मोत्तुं मोहादीएहिं हिंसती।**
**[3]सो अमतेण विसं [4]गेज्झं जाणं तत्थेव जुंजती।।**
**।।४१-७।।**

यथा कश्चित्, **अनर्घ्यम्** - अमूल्यम्, अमेयमूल्यमिति यावत्, **मणिम्** - रत्नम्, **मुक्त्वा** - परित्यज्य, **सूत्रमात्रे** - दवरकमात्रे, **अभिनन्दति** - अहो महामूल्यमिदं मयावाप्तमि-

---

१. क.ट.ढ.ण.ध - सोतु सुत्तमत्थाभिनिंदती। ख.ज.ठ.थ - सोतुसुत्थमत्थाभिनिंदती। ग.घ.च.छ.झ.त - मोत्तुं सुत्तमत्ताभिनंदती। ट - सोतु सुत्तमत्थाभिनिंदती। न.प - सोतु सुत्तमयाभिनिंदती। फ - सोतु सत्तमत्थाभिनिंदती। २. क.ख.ज.ट.ठ.ढ.ण.थ.न.प.फ - जोतु। मुद्रितेषु - मोत्तुं। ३. क.ज.ठ.ढ.ण.ध.न.प.फ - सो अमतेण। ख.थ - मो अमतेण। मुद्रितेषु- सोअमत्तेण। ट - सोअतेण्ण। ४. ख.थ.- गेणं।

त्यादिवचोऽभिव्यज्यमानमानन्दमनुभवति।

तथाऽयं **सर्वज्ञशासनम्** – जिनाज्ञाम्, **मुक्त्वा** – तिरस्कृत्य, **मोहादिकैः** – अज्ञानादिदोषैः, चारित्रं **हिनस्ति** – विराधयति। **जो तु** – इति पाठे **यस्तु सर्वज्ञशासनं मोहादिभिर्हिनस्ति** – विराधयतीत्यर्थः, इत्थं च **सः** – दुर्मतिः, **अमृतेन विषं ग्राह्यम्** – विषस्य मूल्यतयाऽमृतं दत्त्वापि विषं क्रेतव्यमिति **ज्ञात्वा तत्रैव युज्यते** – विषक्रयणव्यापृतो भवति, अत्रोपनयो भावित एव, तथापि प्रकारान्तरेण भावयति –

**आजीवत्थं तवो जो तु तप्पते विविहं बहुं।**
**तवणिस्साए जीवंतो तवाजीवं तु जीवती।।४१–८।।**

**यस्त्वाजीवार्थम्** – जीविकाहेतोः, **विविधम्** – अनेकप्रकारम्, **बहु** – प्रमाणेन प्रभूतम्, **तपः** – मासक्षपणादि, **तपते** – करोति, एवं च **तपोनिश्रया जीवन् तपआजीवं तु** – तपोविहितजीविकामेव **जीवति**, न तु मुधाजीविकामिति, एवं चासौ तुच्छजीविकार्थं तपोविक्रयणं विदधन् कोट्या काकिणीं क्रीणातीति भावः। एवं ज्ञानाद्युपजीवनगोचरमप्याह–

**णाणमेवोवजीवंतो चरित्तं करणं तहा।**
**लिंगं च जीवणट्ठाए अविसुद्धं तु जीवती।।४१–९।।**

यश्च **ज्ञानमेवोपजीवन्नास्ते**, एवं **चारित्रम्** – चरणम् – व्रतश्रमणधर्मादिलक्षणम्, तथा **करणम्** – पिण्डविशुद्ध्यादिरूपमाचारम्, उपजीवति, **तथा लिङ्गं च** – मुनिवेषरजोहरणादिरूपम्, **जीवनार्थम्** – प्राणधारणप्रयोजकाहाराद्यधिगमार्थम्,



व्यापारयति, सो**ऽविशुद्धं तु** – अशुद्धमेव **जीवति**।

ननु कथं पिण्डविशुद्ध्यादेर्गुणात्मकस्य जीविकासाधनत्वमशुद्धजीवनहेतुत्वं च सङ्गतिमङ्गतीति चेत् ? न, जनावर्जनप्रयोजनेन मिथ्याचारं प्रदर्शयतस्तदुपपत्तेः, पिण्डविशुद्ध्यादेरपि मलिनाशयानुवेधेनाविशुद्ध्यनतिक्रमादिति सूक्ष्ममीक्षणीयम्, प्रमाणं चात्र पारमर्षम् – परिणामियं पमाणं – इति **(ओघनिर्युक्तौ – ५६०)**। अन्यान्यप्यशुद्धजीवननिबन्धनान्याह–

**विज्जामंतोपदेसेहिं दूतीसंपेसणेहि वा।**
**[1]भावीभवोवदेसेहिं अविसुद्धं तु जीवति।।४१–१०।।**

**विद्यामन्त्रोपदेशैः दूतीसम्प्रेषणैर्वा** – दूतीकर्मणा पिण्डनिर्युक्तिप्रसिद्धेन द्वितीयेन भिक्षादोषेण, यद्वा कामिनीमेलनेनेत्यर्थः, कथमेतत् साधोः सम्भवतीति चेत् ? न, क्लिष्टसत्त्वानामकृत्यविरहात्, अत एव जिनभवनाशातनासु मैथुनमपि पठितमित्यलं प्रसङ्गेन। तथा भाविनि काले भवन्तीति – **भाविभवाः** – अनागतकालसम्बन्धिवार्ताः, तेषा**मुपदेशैः** – प्रतिपादनैर्यः साध्वाभासो जीवति सो**ऽविशुद्धं तु** – अविशुद्धमेव **जीवति**, कर्बूरशीलं धारयतीत्यर्थः, भावीतवोवदेसेहि – इति पाठेऽमुकममुकं तपोऽहं करिष्यामीति जनावर्जनहेतुकाभिधानैरित्यर्थः। तथा –

१. क.ग.च.ज.ट.ठ.ढ.ण.द.ध.न.प.फ - भावीतवोवदेसे। ख - भावातदीसहिं। घ.छ.झ.त - भावीभवोवदेसेहिं। थ - भावीदेसेहिं।

**मूलकोउयकम्मेहिं [1]भासाए णइएहि वा।**
**अक्खाइओवदेसेहिं अविसुद्धं तु जीवति।।**
**।।४१-११।।**

**मूलकौतुककर्मभिः**, अत्र **मूलकर्म**-वशीकरणम्, सहदेवी-मूलिकाकल्पादि, तत्तच्छास्त्रविहितं मूलकर्म वा, **कौतुककर्म** - अपत्याद्यर्थं स्नपनादि **भाषया** - जनमनोरञ्जनार्थमुदितया विचित्रया वाण्या, **नयिकैर्वा** - गूढाभिप्रायैर्वचनैः, तथाऽऽ-**ख्यायिकोपदेशैः** - कथाविशेषप्रतिपादनैः, **अविशुद्धं तु जीवति**, जीविकार्थमेषां प्रयोगस्य प्रतिक्रुष्टत्वात्।

केनैवमभिहितमित्याह- **इंदनागेण अरहता इसिणा बुइतं। इन्द्रनागेनार्हतर्षिणोदितमिति।** ननु दृश्यन्ते लोके मूलकर्मादि कुर्वाणा अपि दुष्करतपःप्रभृतिमाचरन्त इति कथमेषामद्भुतवृत्तानामविशुद्धं जीवनं सम्भवतीति चेत् ? अत्राह-

**मासे मासे य जो बालो कुसग्गेण आहारए।**
**ण से सुक्खायधम्मस्स अग्घती सतिमं कलं।।**
**।।४१-१२।।**

**मासे मासे** - इति वीप्सायां द्विर्वचनम्, **चः** - अवधारणार्थः, ततश्च मासे मास एव, न त्वेकस्मिन्नेव मासेऽर्धमासादौ वेत्यर्थः, **यः** कश्चित्, **बालः** - अविवेकः, **कुशाग्रेणाहारयति**, तृणविशेषप्रान्तेन भुङ्क्ते, एतदुक्तं भवति -

१. क.ख.ज.ठ.ढ.ण.थ.द.ध.न.प.फ - भासाएणइएहि या। ग.घ.छ.झ.त - भासापणइएहिं। च - भासापणाइएहिं। ट - प्रतौ - भासाएइणरहिवा इति द्वितीयपादः।



यावत् कुशाग्रेऽवतिष्ठते तावदेवाभ्यवहरति, नातोऽधिकम्, यद्वा कुशाग्रेणेति जातावेकवचनम्, तृतीया तु 'ओदनेनासौ भुङ्क्ते' इत्यादिवत् साधकतमत्वेनाभ्यवह्रियमाणत्वेऽपि विवक्षितत्वात्, **न** इति निषेधे, **स** इति यः कुशाग्रैर्भुङ्क्ते स एवंविधकष्टानुष्ठाय्यपि, **सुष्ठु** - शोभनः, सर्वसावद्यविरतिरूपत्वात्, **आङिति**-अभिव्याप्त्या, **ख्यातः** - तीर्थकरादिभिः कथितः **स्वाख्यातः**, तथाविधो **धर्मो** यस्य सोऽयं **स्वाख्यातधर्मा**, तस्य सच्चारित्रिण इत्यर्थः, **शतिमाम्** - शततमाम्, **कलाम्** - भागम्, अपि **अर्घति** - अर्हति। तत्तपः शुद्धजीवनानुष्ठानस्य शतांशसमोऽपि न भवतीति हृदयम्। कथं तादृशानुष्ठानमनुष्ठेयमिति चेत् ? मुधाजीवितयेति गृहाण, साऽपि कथमिति चेत् ? अत्राह -

**मा ममं जाणऊ कोयी माहं जाणामि [1]किंचि वि।**
**अण्णातेण तु अण्णातं चरेज्जा समुदाणियं।।**
**।।४१-१३।।**

**कोऽपि मां** स्वज्ञात्यादित्वेन विशिष्टजातिकुलतपः-श्रुतादिसम्पन्नतया वा **मा जानातु**, **अहमपि किञ्चिदपि** वस्तु मदिष्टानिष्टसाधनतया **मा जानामि** - न जानीयाम्, न तज्ज्ञाने मत्स्वरस इत्याशयः। इत्थम**ज्ञातेना**त्मना**ऽज्ञातं तु समुदानिकम्** - उच्चावचकुलेषु भिक्षाग्रहणम्, **चरेत्** - स्वानुष्ठानविषयीविदध्यात्। अत एवोक्तं परैरपि - ज्ञातचरदेशं चण्डालवाटिकामिव त्यजेत् -

१. क.ट.ठ.ढ.ण.थ.ध - किंचि वी। ख.ग.घ.छ.त - किंचि वि। च.झ - कंचि वि। ज.न.प - किंवि वी।

इति (**नारदपरिव्राजकोपनिषदि ७-१**)। इत्थमेवास्य भावोञ्छयोगोऽपि सङ्गच्छते, तथा च तल्लक्षणम् - जमण्णायमण्णाएण उप्पतिज्जति तं भावुंछं भण्णाति - इति (**दशवैकालिक - चूर्णौ** ११-१६)। एवं च -

**पंचवणीमगसुद्धं जो भिक्खं एसणाए एसेज्जा।**
**तस्स सुलद्धा लाभा हणणादीविप्पमुक्कदोसस्स।।**
**।।४१-१४।।**

**जधा कवोता य कविंजला य गावो चरंती इह पातडाओ।**
**एवं मुणी गोयरियं चरेज्जा णो वीलवे णो वि य संजलेज्जा।।**
**।।४१-१५।।**

प्राग्वत् (**ऋषिभाषिते १२/३-२**)। उपलक्षणमेतदन्येषामपि सच्चारित्रिचरितानाम्। एवम्भूतशुद्धजीवनजीविनो यद्भवति तदाह-

**एवं से सिद्धे बुद्धे विरए विपावे दंते दवीए अलंताई णो पुणरवि इच्चत्थं हव्वमागच्छइ।। त्ति बेमि।।**

**एवमि**त्यादि प्राग्वत्। इत्येकचत्वारिंशत्तम इन्द्रनागीयाध्ययन आर्षोपनिषद्।

### ।। अथ द्विचत्वारिंशत्तमोऽध्यायः।।

अनन्तराध्ययने शुद्धभिक्षावृत्तिरभिहिता, सा किमसंस्तरणेऽप्याचरणीया, उतास्ति कश्चिद्विशेष इत्यत्राह-

**'अप्पेण बहुमेसेज्जा जेट्ठ मज्झिम कण्णसं।**
**णिरवज्जे ठितस्स तु णो कप्पति पुणरवि सावज्जं सेवित्तए।' सोमेण अरहता इसिणा बुइतं।।४२-१।।**



**अल्पेन** - अशक्यपरिहारतया प्रवचनप्रतिपादितविधिनाऽपवादपदेन प्रतिसेवितेनाणुदोषेण, **बहुम्** - प्रवचनाव्युच्छित्तिप्रभृति प्रभूतलाभम्, स बहुलाभोऽपि कथञ्चित् ज्येष्ठादिभेदभिन्नो भवतीत्याह- **ज्येष्ठं मध्यमं कनीयसमिति, एषयेत्** - इच्छेत्, अशठः श्रमण इति शेषः।

उक्तं च - उस्सग्गेण निसिद्धं, अववायपयम्मि सेवए असढो। अप्पेण बहूं इच्छइ विसुद्धमालंबणओ समणो।। सालंबणो पडंतो अप्पाणं दुग्गमे वि धारेइ। इय सालंबणसेवी धारेई जई असढभावं।। काहं अच्छित्तिं अहवा अहीहं, तवोविहाणेण य उज्जमिस्सं। गच्छं च नीई इअ सारइस्सं, सालंबसेवी समुवेइ मुक्खं - इति (**पुष्पमालायाम् २३७-२३९**)। तदेतद्विशेषविषये वक्तव्यम्, सामान्यविचारे तु **निरवद्ये** - संयमे **स्थितस्य पुनरपि सावद्यम्** - स्वरूपहिंसाद्यनुष्ठानमपि, **सेवितुम् न तु** - नैव **कल्पते**। इति **सोमेनार्हतर्षिणोदितम्**। एवं प्रवचनमुद्रानतिक्रमेण यत्पर्यवस्यति तदाह-

**एवं से सिद्धे बुद्धे विरए विपावे दंते दवीए अलंताई णो पुणरवि इच्चत्थं हव्वमागच्छइ त्ति बेमि।।**

**एवमि**त्यादि प्राग्वत्। इति द्विचत्वारिंशत्तमे सोमीयाध्ययन आर्षोपनिषद्।

### ।।अथ त्रिचत्वारिंशत्तमोऽध्यायः।।

अनन्तराध्ययने निरवद्यवृत्तिरुपदिष्टा, सा च निश्चयनयेन साम्य एव पर्यवस्यतीत्यत्र तदेवाह-

**लाभम्मि जे ण सुमणो अलाभे णेव दुम्मणो।**
**से हु सेट्ठे मणुस्साणं देवाणं व सयक्कऊ।।४३-१।।**
**जमेणं अरहता इसिणा बुइतं।**

**यो लाभे** - इष्टाहारादेः सम्प्राप्तौ सत्याम्, **सुमना न** भवति, **अलाभे** च तस्यैव **दुर्मना** अपि **नैव** भवति। लाभालाभे हर्षशोकौ परिहृत्य समचित्तवृत्तिरत एव समाधिसिद्ध आस्त इति हृदयम्, तदाह- लाभेऽप्यलाभे च सुखे च दुःखे, ये जीवितव्ये मरणे च तुल्याः। रत्याप्यरत्यापि निरस्तभावाः, समाधिसिद्धा मुनयस्त एव - इति **(समाधिसाम्यद्वात्रिंशिकायाम् १०)**, **स तु** - स एव, **मनुष्याणां श्रेष्ठः, यथा देवानां शतक्रतुः** - इन्द्रः। इति **यमेनार्हतर्षिणोदितम्**।

**एवं से सिद्धे बुद्धे विरए विपावे दंते दवीए अलंताई णो पुणरवि इच्चत्थं हव्वमागच्छइ त्ति बेमि।**

**एवम्** - साम्यामृतपरिपानात्, **स** - नरोत्तमः, **सिद्ध** इत्यादि प्राग्वत्। इति त्रिचत्वारिंशत्तमे यमीयाध्ययन आर्षोपनिषद्।

**।।अथ चतुश्चत्वारिंशत्तमोऽध्यायः।।**

अनन्तराध्ययने समता प्रतिपादिता, सा च रागादिनिकार-मन्तरेणानुपपन्नेत्याह-

**''दोहिं अंगेहिं उप्पीलंतेहिं आता जस्स ण उप्पीलति।**
**रागंगे य व दोसे य, से[1] हु सम्मं[2] णियच्छती।''**
**वरुणेणं अरहता इसिणा बुइतं।।४४-१।।**

१. ख.थ - मुहु। २. क.ज.ट.ठ.ढ.ण.ध.प - संमं। न.फ - संम। ग.घ.च.छ.झ.त - सम्मं।



**यस्यात्मा द्वाभ्यामङ्गाभ्याम्** - वक्ष्यमाणाभ्याम्, **उत्पीडयद्भ्याम्** - स्वजन्यविकारवेदनामुत्पादयद्भ्याम् **नोत्पीड्यते** - धैर्यानुभावेन न विक्रियते, अङ्गद्वयमेवाह - **रागाङ्गम्** - रागनिमित्तं स्त्र्यादि, **द्वेषश्च**, पदैकदेशे पदसमुदायोपचारात् - द्वेषाङ्गम् - द्वेषनिमित्तं कण्टकादि, द्वयोरप्येतयोर्विकारयोरविषयः **सः**- धीरपुरुषः, उक्तं च- विकारहेतौ सति विक्रियन्ते, येषां न चित्तानि त एव धीराः - इति, **सम्यग् नियच्छति** - समीचीन-तयात्मानमनुशासति, याथातथ्येन वा निरुद्धभावमुपयातीत्यर्थः।

अध्ययनमेत**द्वरुणेनार्हतर्षिणोदितम्**। किमस्य सन्निरोधस्य फलमित्यत्राह -

**एवं से सिद्धे बुद्धे विरए विपावे दंते दवीए अलंताई णो पुणरवि इच्चत्थं हव्वमागच्छइ त्ति बेमि।।**

**एवमि**त्यादि पूर्ववत्। इति चतुश्चत्वारिंशत्तमे वरुणीयाध्ययन आर्षोपनिषद्।

**।। अथ पञ्चचत्वारिंशत्तमोऽध्यायः।।**

अनन्तराध्ययने रागादिविकारनिकारोऽभिहितः, सोऽपि कामादिदुर्विपाकविज्ञानत एव शक्य इत्याह-

**अप्पं च आउं इह माणवाणं सुचिरं च कालं णरएसु वासो।**
**सव्वे य कामा णिरयाण मूलं को णाम कामेसु बुहो रमेज्जा?**
**।।४५-१।।**

**इह** - मनुष्यलोके- **मानवानाम्** - मनुष्याणा**मायुरल्पम्**, उत्कृष्टतोऽपि त्रिपल्योपममितत्वाद्युगलिककाले, वर्तमाकाले तु

प्रायः संवत्सरशतमात्रत्वात्, **च**कारोऽनन्तरापेक्षया समुच्चये। **नरकेषु च वासः**- स्वकर्मवशतया निवसनम्, **सुचिरं कालम्,** जघन्यतोऽप्ययुतवत्सरम्, उत्कृष्टतश्च त्रयस्त्रिंशत्सागरोपमान् यावत्तत्रत्यायुर्भावात्।

**सर्वे च कामा निरयाणाम्** - नरकाणाम्, **मूलम्** - प्रधानकारणम्, तदर्थं नरकहेतुरौद्रध्यानादियोगात्। तत्**को बुधः**, न ह्यल्पकालीनकामोपभोगेनातिदीर्घकालीननारकयातनाभ्युपगम उचित इति सद्बोधसम्पन्नः, **कामेषु रमेत** - रतिं बध्नीयात्, **नाम** अवधारणगर्भितसम्भ्रमे, नैव कश्चिद् बुधः सम्भवति यः कामरतिं कुर्यादित्याशयः, एतच्च कामशब्दत एव स्पष्टम्, तथा च तद्व्युत्पत्तिः - विसयसुहेसु पसत्तं, अबुहजणं कामराग-पडिबद्धं। ओकामयंति जीवं, धम्माओ तेण ते कामा - इति **(धर्मसङ्ग्रहे - द्वितीयाधिकारे)**। इदमपि बुधवृत्तमित्याह-

**पावं ण कुज्जा, ण हणेज्ज पाणे, अतीरमाणो व रमे कदायी।**
**उच्चावएहिं सयणासणेहिं वायु व्व जालं समतिक्कमेज्जा।।**
**।।४५-२।।**

**वेसमणेणं अरहता इसिणा बुइतं।**

**पापम्** - किमप्यकुशलानुष्ठानम्, **न** - नैव, **कुर्यात्** - विदध्यात्, दुःखं पापादित्युक्तेः **(शास्त्रवार्तासमुच्चये)** तथा **प्राणान्** - जीवान्, **न हन्यात्** - नैव हिंस्यात्, वक्ष्यते च - पाणी य पाणिघातं च पाणीणं च पिया दया। सव्वमेतं विजाणित्ता पाणिघातं विवज्जए - इति **(ऋषिभाषिते ४५-१९)**।



ननु किमयमेकान्तः ? नेत्याशयेनाह- **अशक्नुवन्** - ग्लानभावादिना सर्वथा हिंसापरिहारेऽसमर्थः, **वा**शब्द उत्सर्ग-भिन्नपक्षद्योतकः, तदा **कदाचित्** प्रवचनप्रतिपादितपञ्चकवृद्ध्या किञ्चित् प्रतिसेवेतापीति प्राग्वदनुसन्धेयम् **(ऋषिभाषिते ४२-१)**। किन्तु तदापि प्राणहननवर्जन एव **रमेत,** अहिवदेकान्तदृष्टितयोत्सर्गं प्रति दृढपक्षपातः स्यादित्याशयः। तथो**च्चावचैः** - एषणामुद्रानति-क्रमेणोपलब्धैर्मनोज्ञामनोज्ञैः, यथाकृतैरित्यर्थः, तथा **शयनानि** - शय्या वसतय इति यावत्, **आसनानि** - पीठिकादीनि, तैः प्राप्तै-ररक्तदुष्टतया तत्परिभोगं कृत्वा **जालम्** - रागादिग्रन्थग्रथितं पाशम्, **वायुरिव** - समीरणवदप्रतिबद्धतया **समतिक्रामेत्** - सम्यक्तयात्यन्तिकत्वेन चोल्लङ्घयेत्, यथा कदापि तादृशग्रन्थ-जालगोचरो न स्यात्, तथा विदध्यादिति हृदयम्। इति **वैश्रमणेनार्हतर्षिणोदितम्**।

साम्प्रतमुक्तप्रतिपक्षमबुधजनं व्याचष्टे-

**जे पुमं कुरुते पावं ण तस्सऽप्पा धुवं पिओ।**
**अप्पणा हि कडं कम्मं अप्पणा चेव भुज्जती।।**
**।।४५-३।।**

**यः पुमान् पापं कुरुते, तस्यात्मा न प्रिय** इति **ध्रुवम्** - निश्चितम्। ननु कथमेतत् घटाकोटिमाटीकते यदात्मैवात्मनो-ऽप्रियस्स्यादित्यत्राह - **हि** - यतः, **आत्मना कृतं कर्मात्मनैव भुज्यते,** उक्तं च - न कोऽपि कर्मदायादः स्वयं स्वं कर्म भुज्यते - इति **(त्रिषष्टिचरित्रे)**। अतः पापकरणमेव तत्त्वतः स्वात्मनो

दुःखोत्पादनम्, यश्च यस्य दुःखमुत्पादयति, स तस्य प्रियो न भवतीति सूक्तम् - ण तस्सऽप्पा धुवं पिओ - इति। इदं पुनः शोच्यतरमित्याह-

**पावं परस्स कुव्वंतो हसते मोहमोहितो।**
**मच्छो गलं गसंतो वा [1]विणिपायं ण पस्सति।।**
**।।४५-४।।**

**पच्चुप्पण्णरसे गिद्धो मोहमल्लपणोल्लितो।**
**दित्तं पावति उक्कंठं वारिमज्झे व वारणो।।**
**।।४५-५।।**

**परोवघाततल्लिच्छो दप्पमोहबलुद्धुरो।**
**सीहो जरो दुपाणे वा गुणदोसं ण विंदती।।४५-६।।**
**सवसो पावं पुरा किच्चा दुक्खं वेदेति दुम्मती।**
**आसत्तकंठपासो वा मुक्कधारो [2]दुहट्टिओ।।**
**।।४५-७।।**

**पावं जे उ पकुव्वंति जीवा सोताणुगामिणो।**
**वड्ढते पावकं तेसिं अणग्गाहिस्स वा अणं।।४५-८।।**

---

१. क.ज.ट.ठ.ण.ण.द.ध.न.प.फ - विणिपायं। ख.थ - विणिपाय। ग - विणिरायं। घ.च.छ.झ.त - विणिघायं। २. क.ज.ट.ठ.ढ.ण.द.ध.प - दुहट्ठिओ। ख.थ.न.फ - दुहट्ठिउ। ग.घ.च.छ.झ.त - दुहट्टिओ।



**अणुबद्धमपस्संता पच्चुप्पण्णगवेसका।**
**ते पच्छा दुक्खमच्छंति [1]गलुच्छित्ता जधा झसा।।**
**।।४५-९।।**

**आता कडाण कम्माणं आता भुंजति जं फलं।**
**तम्हा आयस्स अट्ठाए मा[2](पा)वमादाय वज्जए।।**
**।।४५-१०।।**

प्राग्वत् **(ऋषिभाषिते १५/१५-२१)**। एतच्च पापवर्जन आलम्बनमित्याह -

**जं हुतासं विवज्जेति जं विसं वा ण भुंजति।**
**जं ण गेण्हति [3]वा वालं, णूणमत्थि ततो भयं।।**
**।।४५-११।।**

**यत्** प्राज्ञजनः **हुताशम्** - जाज्वल्यमानं ज्वलनम्, **विवर्जयति** - सर्वयत्नेन परिहरति, **यद्वा विषं न भुङ्क्ते, यद्वा व्यालम्** - विषधरं **न गृह्णाति,** सर्वमप्येतत् किं सम्प्रधार्यासौ वर्जयतीत्याह **- नूनम्** - अवश्यम्, **ततः** - हुताशादेः, **भयम्** - दाहाद्यपायः, **अस्ति** - सम्भवति। किञ्च-

---

१. क - गलुत्थित्ता। ख - गलात्थित्ता। ग.घ.च.छ.झ.ण.त.ध.न.प.फ - गलुच्छित्ता। ज.ट - गलछिता। ढ - गलुछिता। २. ख.ज.ठ.थ.न - मोवमादाय। ग - मोघमादाय। च - अट्ठा एपावमादाय। घ.झ.त - पावमादाय। ट - मोवामादाय। फ.ढ.ध.प - मावमादाय। ३. क.घ.च.छ.ढ.ण.त.ध.न.फ - वा वालं। ख.ज.ट.ठ.थ - वा बालं। ग.झ - वाचालं।

**धावंतं सरिसं [1]तारं सच्छं दाढिं (? च) सिंगिणं।**
**दोसभीरू विवज्जेंती पावमेवं विवज्जए।।४५-१२।।**

**धावन्तम्** - शीघ्रगतिपरिणतं वृषभादिम्, **सरिसं** ति प्राकृतत्वात् सरीसृपम् - उरगादिकम्, **तारम्** - वानरविशेषम्, **सच्छं** ति प्राकृतत्वात् स्वच्छन्दमुच्छृंखलमिति यावत्, कं स्वच्छन्दमित्याह- **दंष्ट्रिणम्** - तथाविधकुक्कुरादेरारभ्य आ सिंहं तीक्ष्णदंष्ट्रारूपायुधवन्तम्, **शृङ्गिणं** च - तीक्ष्णशृङ्गप्रहरणं मेषादिकम्, **दोषभीरवः**- पतनपीडाप्रभृतिप्रत्यपायसम्भावना-सञ्जातसाध्वसाः, **विवर्जयन्ति** - दूरत एव परिहरन्ति, **एवम्** - नारकादियातनात्मकदोषभीत्या, **पापम्** - तद्धेतुभूतमशुभानुष्ठानम्, **विवर्जयेत्** - मनसोऽपि न स्पृशेत्। पापं हि शुभमात्रादात्मवञ्चना, पाति रक्षत्यात्मानं शुभादिति पापम् - इति तन्निरुक्तेः **(सर्वार्थसिद्धौ ६-३)**।, तत्प्रत्ययिककर्मोदयतश्चानेकदुःसहदुःखानि, उक्तं च - असुहोदयेण आदा कुणरो तिरियो भवीय णेरइयो। दुक्खसहस्सेहिं सदा अभिंधुदो भमदि अच्चंता- इति **(प्रवचनसारे १२)**।, एतदेवाभिधत्ते -

**पावकम्मोदयं [2]पप्पा दुक्खतो दुक्खभायणं।**
**दोसा दोसोदई चेव [3]पावे कुच्छा पसूयति।।**
**।।४५-१३।।**

१. ख.ग.ज.ट.ठ.ध.न.प.फ - तारं। घ.च.छ.झ.त - नीरं। २. क.ख.ज.ट.ठ.ढ.ण. थ.द.ध.न.प.फ - पप्पा। ग.घ.च.छ.झ.त - पप्प। ३. ख.ण.थ.ध.न.प.फ - पावे कुच्छा। ग.द - पावे कुज्जा। घ.झ.त.- पावकज्जा। च - पापकज्जा। ट - पादेकुत्था। ठ - पादेकुच्छा।



**पापकर्मोदयं प्राप्य दुःखतः** - सम्प्राप्तदुःखादेव तद्धा-नोत्सुको जीवोऽपराणि पापानि कृत्वा **दुःखभाजनं** सञ्जायते। इत्थं च **दोषादेव दोषोदयी** - दोषोदयपात्रम्, मूढजीवो भवति, अभिहितं च - दुक्खितो दुक्खघाताय दुक्खावेत्ता सरीरिणो। पडियारेण दुक्खस्स दुक्खमण्णं णिबंधई - इति **(ऋषिभाषिते १५-१२)**।

तदेतद्दारुणं विषचक्रं दृष्ट्वा विवेकिनां **पापे कुत्सा प्रसूयते**, धिक्, अत्यन्तं हेयमेव पापमिति संवेदनं सञ्जायत इत्यर्थः। सा च कुत्सैतच्चिन्तनेनोपचीयत इत्याह-

**उव्विवारा जलोहंता तेतणीए [1]मतोट्ठिता।**
**जीवितं वा वि जीवाणं जीवंति फलमंदिरं।।**
**।।४५-१४।।**

उर्व्यां पारोऽन्तो यस्याः सा - **उर्वीपारा**, यावदुर्वी तावदस्या अवधिरित्यर्थः, एतदेव स्फुटयति - जलौघः - समुद्रः, तत्राऽन्तः पर्यवसानं यस्याः सा **जलौघान्ता, तेतणीए**त्ति **तावती**, मेदनीति गम्यते, **मता** - चक्रवर्त्यादिरभिमता - इष्टेति यावत्, **उत्थिता जीवानां** प्राभृतीकृता, **जीवितं वाऽपि** प्राभृतीकृतम्, एवमन्य-तरोपादानायाभिहितास्ते जीवा **जीवन्ति** - अन्तर्भावितेच्छाप्रत्य-यार्थत्वाद् जिजीविषन्तीत्यर्थः, जीवनमेवेच्छन्तीति यावत्, यतस्तदेव सर्वेषामपि नृपत्वादिलक्षणानां **फलानां मन्दिरम्** - निलयमा-श्रयमिति यावत् - **फलमन्दिरम्**। एतदेव व्यक्ततरं व्याचष्टे -

१. क.ख.ग.ठ.ढ.ण.थ.ध.न.प.फ - मतोट्ठिता। घ.च.छ.झ.त - मतोट्ठित्ता।

**[१]देज्जा हि जो मरंतस्स सागरंतं वसुंधरं।**
**जीवियं वा वि जो देज्जा जीवितं तु स इच्छती।।**
**।।४५-१५।।**

स्पष्टम्। यतः -

**पुत्तदारं धणं रज्जं विज्जा सिप्पं कला गुणा।**
**जीविते सति जीवाणं जीविताय रती अयं।।**
**।।४५-१६।।**

**पुत्रो दारा धनं राज्यं विद्या शिल्पं कला गुणाः**, तदेतत् सर्वमपि **जीवानां जीविते सत्ये**व भवति, नान्यथा यदुक्तम्, जीवन् हि नरो भद्राणि पश्यति - इति। तस्मात् **जीवितायेमा** - प्रत्यक्षमीक्ष्यमाणा **रतिः** - स्वरसः, आकाङ्क्षेति यावत्, तदाह - अमेध्यमध्ये कीटस्य सुरेन्द्रस्य सुरालये। समाना जीविताकाङ्क्षा, समं मृत्युभयं द्वयोः - इति। किञ्च -

**आहारादि तु जीवाणं लोए जीवाण दिज्जती।**
**पाणसंधारणट्ठाय दुक्खणिग्गहणा [२]तहा।।**
**।।४५-१७।।**

**लोके जीवानामाहारादि तु प्राणसन्धारणार्थं जीवेभ्यो दीयते,** तथाविधदयालुभिरिति शेषः। **तथैव दुःखम्** - हिंसाजनितपीडा, तस्य **निग्रहणम्** - प्रतिकारः, हिंसाप्रतिपक्षा-

१. क.ग.घ.च.छ.झ.ण.त - देज्जा हि जो। ख.ज.ट.ठ.थ.द.ध.न.प.फ - देज्जा हिज्जो। ड - दिज्जा हि जो। ढ - दज्जाहिंजो। २. क.ख.ग.ज.ट.ठ.ड.ढ.ण.थ - जहा। घ.च.छ.झ.त.द - तहा।



हिंसाचरणेनाभयदानमिति यावत्, एतदपि प्राणसन्धारणार्थमेवावश्यं दातव्यमिति। यतः-

**सत्थेण [१]वण्हिणा वा वि खते दड्ढे व वेदणा।**
**सए देहे जहा होति एवं सव्वेसि देहिणं।।४५-१८।।**

**यथा शस्त्रेण क्षते वा वह्निना दग्धे वाऽपि स्वके** - आत्मीये **देहे वेदना**-क्षतादिकृता पीडा **भवति, एवं सर्वेषाम**पि **देहिनाम्** - जीवानां क्षतादितो वेदना भवतीति प्रत्येयम्, ततश्च हननादेर्निवृत्तिः कर्तव्या, सर्वेषामप्यात्मोपमत्वात्, तदुक्तम् - यथा अहं तथा एते यथा एते तथा अहं। अत्तानं उपमं कत्वा न हनेय्य न घातये - इति **(सुत्तनिपाते ३-३७-२७)**।

इत्थं च यथाऽऽत्मनः सुखदुःखे प्रियाप्रिये तथा परत्रापि विभाव्य हिंसोपरमः विधेयः, तथा चार्षम् - जह ते न पियं दुक्खं जाणिय एमेव सव्वजीवाणं। सव्वायरमुवउत्तो अत्तोवम्मेण कुणसु दयं - इति **(भक्तपरिज्ञाप्रकीर्णके ९०)**, अन्वाह च - जह मे इट्ठाणिट्ठे सुहासुए तह सव्वजीवाणं - इति **(आचाराङ्गचूर्णौ १-१-६)**। एवं च -

**पाणी य पाणिघातं च पाणीणं च पिया दया।**
**सव्वमेतं विजाणित्ता पाणिघातं विवज्जए।।**
**।।४५-१९।।**

**प्राणी** - सव्वे पाणा पियाउया सुहसाया दुक्खपडिकूला अप्पियवहा पियजीविणो जीविउकामा सव्वेसिं जीवियं पियं -

१. क.ण - वण्हिना। ख.ज.ट.ठ.थ.द - वण्हिता। ग.घ.च.छ.झ.ढ.त - वण्हिणा।

**(आचाराङ्गे २-३-८१)** इत्यागमोदितस्वरूपो जीवः, **चः** समुच्चये, **प्राणिघातम्** - जीवव्यापादनम्, स चात्यन्तमनिष्टः सर्वेषाम्, प्राणभयस्य सर्वभयातिशायित्वात्, उक्तं च - प्राणभयं सर्वेषां हि महद्भयम् - इति **(त्रिषष्टिचरित्रे)**, अन्वाह च - सव्वे तसन्ति दण्डस्स सव्वे भायन्ति मच्चुणो इति **(धम्मपदे)**। **च**कारः समुच्चये।

**प्राणिनां च दया प्रिया**, सर्वेऽपि-स्वात्मनि सर्वे दयां कुर्वन्तु - इत्येतदेवाभिलषन्ति, सर्वेषामपि सुखस्पृहत्वात्, दुःखसन्त्रस्तत्वाच्च, तदाह- सर्वाणि भूतानि सुखे रमन्ते, सर्वाणि दुःखस्य भृशं त्रसन्ते - इति **(संन्यासगीतायाम् ९-८८)**। **सर्वमेतत्**-अनन्तरोक्तं **विज्ञाय प्राणिघातं विवर्जयेत्** - अहिंसां परिपालयेत्, तत्परिपालनायैवोत्साहयति -

**अहिंसा सव्वसत्ताणं सदा**[१]**ऽणिव्वेयकारिका।**
**अहिंसा सव्वसत्तेसु परं बंभमणिंदियं।।४५-२०।।**

**अहिंसा सर्वसत्त्वानां सदाऽनिर्वेदकारिका** - अखेदजनिका सुखहेतुरिति यावत्। तथा **सर्वसत्त्वेष्वहिंसाऽनिन्दितम्** - प्रशस्तम्, **परम्** - उत्कृष्टम्, **ब्रह्म**, परम्ब्रह्मात्मकशुद्धात्मस्वरूपाधिगमहेतुत्वात्। अत एव-

**देविंदा दाणविंदा य णरिंदा जे वि विस्सुता।**
**सव्वसत्तदयोवेतं मुणीसं पणमंति ते।।४५-२१।।**

१. क.ख.ज.ट.ठ.ढ.ण.त.थ - सदा णिव्वे०। ग - सदाऽणिव्वे०। घ.च.छ.झ - सदा णिव्वे०। क.ख.ग.ज.ट.ठ.ढ.ण.थ.द - मुणिस्सं। घ.च.झ.त - मुणीसं। ड - मुणिणं।



सुगमम्। उपसंहरति -

**तम्हा पाणदयट्ठाए तेल्लपत्तधरो जधा।**
**एगग्गयमणीभूतो दयत्थी विहरे मुणी।।४५-२२।।**

**तस्मात् प्राणाः** - जीवाः, तेषां **दयार्थम्** - कृपाहेतोः, **यथा तैलपात्रधरः** प्रवचनप्रसिद्धः, तथा **एकाग्रकम्** ईर्यासमित्यादौ तत्तद्योग एकायनीभावमुपयातम्, मनो यस्य सः - एकाग्रकमनाः, तथाभूतः - **एकाग्रकमनसीभूतो दय**या एवा**र्थी**-सप्रयोजनः - **दयार्थी**, एतेनास्यात्मनि सातप्रयोजनताऽपास्ता, **मुनिः**- दयैकप्रयोजनप्रवचनमननालङ्कृतः, तथा चोक्तम् - सव्वजगजीवरक्खणदयट्ठताए पावयणं भगवया सुकहियं - इति **(प्रश्नव्याकरणे २-६-२२)**। **विहरेत्** - वर्तेत, अपरथा प्रमादयोगेन सत्त्वव्यापत्तिप्रसक्तेः संसृतिप्रसङ्गात्, उक्तं च- तैलपात्रधरो यद्वद्, राधावेधोद्यतो यथा। क्रियास्वनन्यचित्तस्स्याद् भवभीतस्तथा मुनिः - इति **(ज्ञानसारे २२-६)**।

सर्वमप्येतज्जिनाज्ञयैव ज्ञायत इति तामेव संस्तुवन्नाह -

**आणं जिणिंदभणितं सव्वसत्ताणुगामिणिं।**
[१]**सम्मं दित्ताऽभिणंदित्ता मुच्चंती सव्वबंधणा।।**
**।।४५-२३।।**

सर्वसत्त्वेष्वनुकूलतया गच्छतीति **सर्वसत्त्वानुगामिनी**, सर्वजीवसुखावहत्वात्, ताम्, यद्वा सर्वसत्त्वेष्वनुरूपभाषायां गच्छति -

१. क.ढ.ण - संम दित्ता भि०। ख.ज.ट.ठ.थ - संमं दित्ताभि। ग.घ.च.झ.त - समचित्ताऽभि०।

परिणमतीति **सर्वसत्त्वानुगामिनी**, ताम्, उक्तं च– देवा दैवीं नरा नारीं, शबरा अपि शाबरीम्। तिरश्चो ह्यपि तैरश्चीं, मेनिरे भगवद्गिरम् – इति। **जिनेन्द्रभणितामाज्ञाम्** – प्रवचनम्, **सम्यक्** – सत्प्रतिपत्त्या, दृप्ता इव **दृप्ताः**, अतिशयरसप्रसरसरसशास्त्र-सुधापरिपानसञ्जातहर्षोल्लासा इत्याशयः, यथोक्तम् – शास्त्रसङ्घातमत्ताः – इति **(नियमसारवृत्तौ ११५)**, **अभिनन्द्य**– कुशलचित्तेन परिभाव्य, **सर्वबन्धनात्** – कृत्स्नकर्मपाशात्, **मुच्यन्ते** – मोक्षमुपयान्ति, जिनवचस एकस्यापि मुक्तिदायकत्वात्, तदाह – एकमपि तु जिनवचनाद्यस्मान्निर्वाहकं पदं भवति। श्रूयन्ते चानन्ताः सामायिकमात्रपदसिद्धाः– इति **(तत्त्वार्थकारिकायाम् २८)**। अतः परिभावनीयं जिनवचः, अन्यथोक्तलाभवञ्चनात्, प्रत्यपा-याच्चेत्याह–

**वीतमोहस्स दंतस्स धीमंतस्स भासितं जए।**
**जे णरा णाभिणंदंति ते धुवं दुक्खभायिणो।।**

**।।४५–२४।।**

**वीतमोहस्य** – उन्मूलितभवद्रुममूलभूतमोहस्य, एतेनास्या-ज्ञानाभाव आवेदितः, **दान्तस्य** – समचित्तवृत्तेः, एतेनास्य रागद्वेषविरह उदितः, **धीमतः** – केवलज्ञानदर्शनप्रेक्षापरिकरितस्य, एतेनास्य सर्वज्ञत्वं व्याख्यातम्, तस्य **भाषितं जगति ये नरा नाभिनन्दन्ति** – न कुशलचित्तेन परिभावयन्ति, **ते** नरा **ध्रुवम्** – अवश्यं, **दुःखभागिनः** – पीडैकप्रतिपत्तारः, भवन्ति, तदपरि-भावनस्य तदुल्लङ्घनहेतुतया नैकदुःखलक्षजनकत्वात्, उक्तं च –



जिणाणं लंघए मूढो किलाहं सुहिओ भवे। जाव लक्खाइं दुक्खाणं आणाभंगे कओ सुहं ? इति **(मूलशुद्धौ ५८)**।

अयमाशयः – वीतमोहत्वादिगुणविशिष्टस्य वचनमेकान्तेना-वितथमेव भवति, उक्तं च – आणा एसा जिणाणं सव्वण्णूणं अवितहा एगंतओ, न वितहत्ते निमित्तं, न चानिमित्तं कज्जं – इति **(पञ्चसूत्रे ५)**। इत्थं चास्मिन्नज्ञानादिवितथवचननिमित्तविरहादवित-थवचनता, ततश्च तन्निरूपितभवमोक्षहेत्वादिपरिभावनत एव मुक्त्युपायसम्प्रवृत्तस्य भवदुःखक्षय उपपद्यते, नान्यथा। तस्मादि-तरस्य तु जिनाज्ञोल्लङ्घनाच्चातुरन्तसंसारकान्तारानुपरिवर्त्त एव, यदार्षम् – इच्चेइअं दुवालसंगं गणिपिडगं तीए काले अणंता जीवा आणाए विराहित्ता चाउरंतं संसारकंतारं अणुपरिअट्टिंसु, इच्चेइअं दुवालसंगं गणिपिडगं पडुपन्नकाले परित्ता जीवा आणाए विराहित्ता चाउरंतसंसारकंतारं अणुपरिअट्टंति, इच्चेइअं दुवालसंगं गणिपिडगं अणागए काले अणंता जीवा आणाए विराहित्ता चाउरंतं संसारकंतारं अणुपरिअट्टिस्संति – इति **(नन्दीसूत्रे १५७)**। एतदेव व्यतिरेकत आह –

**जेऽभिणंदंति भावेण जिणाणं तेसि सव्वधा।**
**कल्लाणाइं सुहाइं च रिद्धीओ य ण दुल्लहा।।**

**।।४५–२५।।**

**ये भावेन** – अन्तःकरणेन **जिनाज्ञामभिनन्दन्ति तेषां सर्वथा कल्याणानि**–द्रव्यभावारोग्याणि, **सुखानि** – लोकलोकोत्तर–शर्माणि, **ऋद्धयः** – चक्रिदेवेन्द्रसत्कविभवाः,

आमर्शौषध्यादयश्च लब्धयः, **च**कारौ समुच्चये, **न दुर्लभाः**, अपि तु सुलभा एव, शिवशर्मदस्य तावद्दानेऽसीदनात्, उक्तं च – यत्र भावः शिवं दत्ते द्यौः कियद्दूरवर्तिनी। यो नयत्याशु गव्यूतिं क्रोशार्धे किं स सीदति – इति **(इष्टोपदेशे ४)**। अभिनन्दनीयं च जैनं मतमित्युपमयाऽभिधत्ते –

**मणं जधा[1] रम्ममाणं णाणाभावगुणोदयं।**
**फुल्लं च पउमिणीसंडं सुतित्थं गाहवज्जितं।।**

**।।४५–२६।।**

**यथा नानाभावाः** – पुष्करपत्रहंसिनीविमलसलिलादयः, तेषां **गुणाः** – मुक्ततोयत्वप्रभृतयः, तेषा**मुदयः** – प्रादुर्भावो यत्र तत् – **नानाभावगुणोदयम्**, **फुल्लम्** – विकचितम्, **पद्मिनीषण्डम्** – कमलिनीवनम्, **ग्राहवर्जितं च** हिंस्रजलजन्तुरहितम्, **सुतीर्थं** – शोभनो जलावतारः, एते यथा मनो रमयतः, अतो **मनो रम्यमान**मास्ते, एवं दृष्टान्तमभिधाय दार्ष्टान्तिकमाह–

**रम्मं मंतं जिणिंदाणं णाणाभावगुणोदयं।**
**कस्सेयं ण प्पियं होज्जा इच्छियं व रसायणं ?।।**

**।।४५–२७।।**

तथा **नानाभावाः** – अकृत्रिमस्वादुपदतादयोऽनेकप्रकाराः सद्भूतपदार्थाः, तेषां **गुणाः** – निसर्गाभिरामत्वादयः, तेषा**मुदयः** – प्रादुर्भावो यत्र तत् – **नानाभावगुणोदयम्**, तदेव विशेषयति –

१. क.ख.घ.च.ज.ट.ठ.ढ.ण.थ.ध.न.फ - जधा। ग.द - जथा। झ.त - तधा। प - जंधा।



**रम्यम्** – मनोरमम्, किमित्याह – **जिनेन्द्राणाम्** – तीर्थकराणाम्, **मन**नात् **त्रा**यत इति **मन्त्रम्** – शासनमित्यर्थः। उक्तं च – विलक्षणानामविलक्षणा सती, त्वदीयमाहात्म्यविशेषसम्भली। मनांसि वाचामपि मोहपिच्छलान्युपेत्य तेऽत्यद्भुत ! भाति भारती – इति **(सिद्धसेनीद्वात्रिंशिकायाम् १–१९)**।

तस्मात् **कस्य** – सचेतसः, **इष्टं रसायणमिवैतत् प्रियं न भवेत्** ? सर्वस्यापि प्रियं भवेदित्यर्थः, पथ्यत्वादिगुणोपेतेऽमूढस्य विपर्यासायोगात्, तदाहुः – शरण्य ! पुण्ये तव शासनेऽपि संदेग्धि यो विप्रतिपद्यते वा। स्वादौ स तथ्ये स्वहिते च पथ्ये संदेग्धि वा विप्रतिपद्यते वा – इति **(अयोगव्यवच्छेदद्वात्रिंशिकायाम् – ९)**। उपमान्तरैर्जिनशासनभक्तिमाविष्कुरुते–

**तण्हातो व सरं रम्मं वाहितो वा [1]रुणाघ(याह)रं।**
**छुहितो वा जहाऽऽहारं रणे मूढो व बंदियं।।**

**।।४५–२८।।**

**तृष्णायाः** पीडितो **यथा रम्यं सरः** शरणीकरोति, **व्याधितो यथा रुजाहरम्** – रोगहारिणं वैद्यमिति यावत्, सर्वत्र शरणं प्रपद्यत इति शेषोऽवगन्तव्यः, यद्वा **क्षुधितः** – बुभुक्षुः, **यथाऽऽहारम्**, **रणे** – सङ्ग्रामे, **मूढः** – क्लीबसत्त्वः, **बन्दिनम्** – सत्त्वोल्लास–प्रयोजकं स्तुतिपाठकम्,

१. क.ज.ट.ठ.ढ.ण.थ.ध.न.प.फ - रुणाघरं। ग - प्रतौ पश्चादर्धम् - वाहितो वारुणाघरं। घ.च.त - रुयाहरं। झ - रुयाधरं।

**वण्हिं सीताहतो वा वि णिवायं वाऽणिलाहतो।**
**तातारं वा भउव्विग्गो अणत्तो वा धणागमं।।**
**।।४५-२९।।**

**शीताहतो वाऽपि** - शिशिरबाधितः, **वह्निम्** - अग्निम्, **अनिलाहतः** - पवनपीडितः, **यथा निर्वातम्** - समीरणशून्यं स्थानम्, **भयोद्विग्नः** - चौरादिभीतिनिर्विण्णः, **यथा त्रातारम्** - गोप्तारम्, **यथा ऋणार्त्तः** - सततं वृद्धिमापद्यमानादृणाद्दुःखितः, **धनागमम्**- वाणिज्यादौ विशिष्टद्रविणलाभम्,

**गंभीरं सव्वतोभद्दं हेतु-भंग-णयुज्जलं।**
**सरणं पयतो मण्णे जिणिंदवयणं तहा।।४५-३०।।**

**तथाऽ**हमपि **गम्भीरम्**, गभीरभावावभासित्वात्, **सर्वतोभद्रम्** - सकलथाऽपि विचार्यमाणं कल्याणनिबन्धनम्, **हेतवः**- सत्तर्कयुक्तिप्रभृतयः, **भङ्गाः** - द्रव्यानुयोगादिभेदाः सप्तभङ्गी वा, **नयाः** - नैगमादयः, तै**रुज्ज्वलम्** - प्रकाशमानम्, **जिनेन्द्रवचनं प्रयतः** - भावसामग्र्यसम्पन्नः, **शरणं मन्ये** - अनन्यशरणतया श्रद्दधे, भवभयोद्विग्नानां स्ववचनद्वारेण जिनेन्द्राणां साक्षात् संरक्षकत्वात्, तदुक्तम् - नयप्रसङ्गा - परिमेय-विस्तरैरनेकभङ्गाभिगमार्थपेशलैः। अकृत्रिमस्वादुपदैर्जनं जनं जिनेन्द्र ! साक्षादिव पासि भाषितैः - इति (**सिद्धसेनी-द्वात्रिंशिकायाम् १-१८**)। सर्वथाऽपि स्वभावसुन्दरं जिनशासन-मित्युपमाभिरभिदधन्नाह-



**सारदं व जलं सुद्धं पुण्णं वा ससिमंडलं।**
**जच्चमणि घट्टं वा थिरं वा मेतिणीतलं।।४५-३१।।**

**यथा शुद्धं शारदं जलम्**, शरदृतौ पानीयं निसर्गत एवापगतमलं सञ्जायत इति, **यथा पूर्णं शशिमण्डलम्** - चन्द्रवर्तुलम्, तदपि राकायां स्वभावेनैव सम्पूर्णं भवति, **यथा** च **घृष्टः**- घर्षणप्रक्रिययोज्ज्वलतां प्रापितः, **जात्यमणिः** - उच्चजातीयरत्नम्, **यथा** वा **स्थिरम्** - प्रकृत्या स्थैर्यगुणोपेतम्, **मेदिनीतलम्** - पृथिवीतलम्,

**साभावियगुणोवेतं भांव(स?)ते जिणसासणं।**[1]
**ससितारापडिच्छण्णं सारदं वा णभंगणं।।४५-३२।।**

**यथा** च **शशिताराप्रतिच्छन्नम्** - चन्द्राद्युपशोभितम्, **शारदम्** - शरदृतुसत्कं **नभोऽङ्गणम्** - व्योम, तथा **जिन-शासन**मपि **स्वाभाविकगुणोपेतम्** - नैसर्गिकैः समुद्रादिभि-रुपमितैः स्याद्वादमुद्रादिभिर्गुणैरलङ्कृतम्, **भासते** - प्रकाशते, यथोक्तम् - उत्सर्पद्व्यवहारनिश्चयकथाकल्लोलकोलाहल - त्रस्यद्दुर्नयवादिकच्छपकुलभ्रश्यत्कुपक्षाचलम्। उद्यद्युक्तिनदी-प्रवेशसुभगं स्याद्वादमर्यादया, युक्तं श्रीजिनशासनं जलनिधिं मुक्त्वा परं नाश्रये।। पूर्णः पुण्यनयप्रमाणरचनापुष्पैः सदास्थारसै-स्तत्त्वज्ञानफलः सदा विजयते स्याद्वादकल्पद्रुमः। एतस्मात् पतितैः प्रवादकुसुमैः षड्दर्शनारामभू-र्भूयः सौरभमुद्वमत्यभिमतैरध्यात्म-वार्तालवैः।। चित्रोत्सर्गशुभापवादरचनासानुश्रियाऽलङ्कृतः, श्रद्धा-

१. क.ख.ग.ज.ट.ठ.ढ.ण.थ.ध.न.प.फ - भावते। घ.च.झ.त - भासते।

नन्दनचन्दनद्रुमनिभप्रज्ञोल्लसत्सौरभः। भ्राम्यद्भिः परदर्शनग्रहगणै-रासेव्यमानः सदा, तर्कस्वर्णशिलोच्छ्रितो विजयते जैनागमो मन्दरः।। स्याद्दोषापगमस्तमांसि जगति क्षीयन्त एव क्षणा - दध्वानो विशदीभवन्ति निबिडा निद्रा दृशोर्गच्छति। यस्मिन्नभ्युदिते प्रमाण-दिवसप्रारम्भकल्याणिनी, प्रौढत्वं नयगीर्दधाति स रविर्जैनागमो नन्दतात्।। अध्यात्मामृतवर्षिभिः कुवलयोल्लासं विलासैर्गवां, तापव्यापविनाशिभिर्वितनुते लब्धोदयो यः सदा। तर्कस्थाणुशिरः-स्थितः परिवृतः स्फारैर्नयैस्तारकैः, सोऽयं श्रीजिनशासनामृतरुचिः कस्यैति नो रुच्यताम् - इत्यादि **(अध्यात्मसारे १९/१-५)**।

किञ्च-

**सव्वणुसासणं पप्पा[१] विण्णाणं पवियंभते।**
**हिमवंतं गिरिं पप्पा तरूणं [२]चारु वागमं।।४५-३३।।**

**यथा हिमवन्तं गिरिं प्राप्य** योग्याश्रयानुभावेन **तरूणां चारु** - सुन्दरः, **आगमः** - पत्रपुष्पफलाद्युद्गमः शाड्वलता वा भवति, तथा **सर्वज्ञशासनं प्राप्य विज्ञानम्** - शब्दार्थाद्यवगमः **प्रविजृम्भते** - **प्र**कर्षेण तात्पर्यादिसर्वोपाधिशुद्ध्याऽऽविर्भवति, तदाह- शब्दो वा मतिरर्थ एव किमु वा, जातिः क्रिया वा गुणः, शब्दार्थः किमिति स्थिता प्रतिमतं सन्देहशङ्कुव्यथा। जैनेन्द्रे तु मते न सा प्रतिपदं जात्यन्तरार्थस्थितेः, सामान्यं च विशेषमेव च यथा

१. क.ख.ज.ट.ठ.ढ.ण.द.थ.ध.न.प.फ - पप्पा। ग.घ.च.झ.त - पप्प। २. क.ढ - चारु वागमं। ख.थ - वारुवामगं। ग - चारुचामगं। घ.च.झ.त - चारु वागमो। ज.ठ - चारुवामगं। ध.न.प.फ - वारुवामगं।



तात्पर्यमन्विच्छति।। यत्रानर्पितमादधाति गुणतां मुख्यं तु वस्त्वर्पितं, तात्पर्यानवलम्बनेन तु भवेद् बोधः स्फुटं लौकिकः। सम्पूर्णं त्ववभासते कृतधियां कृत्स्नाद्विवक्षाक्रमात्। तां लोकोत्तरभङ्ग-पद्धतिमयीं स्याद्वादमुद्रां स्तुमः।। आत्मीयानुभवाश्रयार्थविषयोऽ-प्युच्चैर्यदीयक्रमो, म्लेच्छानामिव संस्कृतं तनुधियामाश्चर्यमोहावहः। व्युत्पत्तिप्रतिपत्तिहेतुविततस्याद्वादवाग्गुम्फितं, तं जैनागममाकलय्य न वयं व्याक्षेपभाजः क्वचित् - इति **(अध्यात्मसारे १९/१०-१२)**। इत्थं च जैनागमपरिभावनात् -

**सत्तं बुद्धी मती मेधा गंभीरत्तं च वड्ढती।**
**ओसधं वा [१]सुइं कंतं जुज्जए बलवीरियं।।४५-३४।।**

**सत्त्वा**दि - प्राग्व्याख्यातम्, **वर्धते** - स्फातिं प्रपद्यते, **यथा शुचि**, शुद्धद्रव्ययोगेन निर्मितत्वात्, **कान्तम्**, स्वादुतादिगुणो-पेतत्वात्परिणामरम्यत्वाच्च, **औषधं** भवति, तथा जिनवचनमपि, यस्य सम्यगुपयोगेन **बलम्** - कर्मारातिपराहतिप्रयोजकस्थामम्, **वीर्यम्** - तपःसंयमयोः पराक्रमः, बलोपेतं वीर्यम् - **बलवीर्यम्**, **तद्युज्यते** - जिनशासनप्रतिबद्धात्मनि समनुस्यूतीभवति। एवं सुखहेतुरपि जिनशासनं विपरीतानां विपरीतं भवतीति निदर्शयति -

१. क.ग.ज.ट.ठ.ण.थ.ध.न.प. - सुइं कंतं। ख - सुइं कंत। घ.त - सुयक्कन्तं। च - सुइं कन्तं। झ - सुयक्कंतं। ढ - सुइकंतं। फ - सुइकंते।

**पयंडस्स णरिंदस्स कंतारे देसियस्स य।**
**आरोग्गकारणो चेव [1]आणाकोवो दुहावहो।।**
**।।४५-३५।।**

**प्रचण्डस्य** - उग्रप्रतापस्य, **नरेन्द्रस्य** नृपस्य, **कान्तारे च देशिकस्य** - मार्गोपदेशकस्य, **आरोग्यकारणः**, षष्ठ्यर्थे प्रथमा, ततश्चारोग्यकारणस्य - वैद्यस्य, **चैव**- समुच्चये, त्रयाणा-मप्येषा**माज्ञाकोपः** - नियोगातिक्रमः, **दुःखावहः** - वधादिव्य-थाकारको भवति। अनतिक्रमे तु त एव सौख्यसृज इत्याह -

**सासणं जं णरिंदाओ कंतारे जे य [2]देसिया।**
**[3]रोगुग्घातो य वेज्जातो सव्वमेतं हिए हियं।।**
**।।४५-३६।।**

**यन्नरेन्द्रात्** प्राप्तं **शासनम्, कान्तारे च ये देशिकाः, वैद्याच्च रोगोद्घातः, एतत्सर्वं हिते** - स्वकल्याणविधौ, **हितम्** - उपष्टम्भकम्। एवं गाथायुगलेन दृष्टान्तमभिधाय दार्ष्टान्तिक-माह-

**आणाकोवो जिणिंदस्स सरण्णस्स जुतीमतो।**
**संसारे दुक्खसंवाहे दुत्तारो सव्वदेहिणं।।४५-३७।।**

**शरण्यस्य द्युतिमतो जिनेन्द्रस्याऽऽज्ञाकोपः** -

१. क.ख.ज.ट.ठ.ढ.ण.थ.ध.न.प - आणाकोवो। ग.घ.च.झ.त - आणाकोहो। फ - आणोकोवो। २. क.ख.ज.ट.ठ.ढ.ण.थ.ध.न.प.फ - देसिया। ग.घ.च.झ.त - देसगा। द - देसेया। ३. क.ण - रागुघातीय। ख - रोगुघाताय। ग - रोगो घातो य। घ.च.झ.त - गोरुग्घातो य। द - रोगुधातो। ज.ट.ठ.ढ.थ.ध.न.प.फ - रोगुघातीय।



शासनातिक्रमः, **सर्वदेहिनाम्** - अशेषजीवानाम्, **दुःखसंवाहे** - अपरापरदुःख - संवहनैकस्वरूपे, **संसारे** - चतुर्गतिकसंसरणे, **दुस्तारः** - दुःखनिस्तरणप्रयोजकः, भवति, जिनाज्ञोल्लङ्घनकारी भवसागरं न सुखेन तरितुं शक्नोति, ततश्च दुर्गतिपथपथिकानामेषां कोटिशो विनिपात एव, उक्तं च - जह नरवइणो आणं, अइक्कमंता पमायदोसेणं। पावंति बंधवहरोहछिज्जमरणावसाणाइं।। तह जिणवराण आणं, अइक्कमंता पमायदोसेणं। पावंति दुग्गइपहे विणिवायसहस्सकोडीओ - इति **(पुष्पमालायाम् १८६-१८७)**। यत एवं तस्मात् -

**तेलोक्कसारगुरुअं[1] धीमतो भासितं इमं।**
**सम्मं काएण फासेत्ता पुणो ण विरमे ततो।।**
**।।४५-३८।।**

**धीमतः** - केवलज्ञानदर्शनरूपपरमप्रेक्षाशालिनः, **इदम्**- प्रत्यक्षत उपलभ्यमानम्, **त्रैलोक्यसारगुरुकम्**, तन्माहात्म्यस्या-ग्रतस्त्रैलोक्यस्यापि तृणायमानत्वात्, **भाषितम्** - प्रवचनम्, सकृत् **सम्यक्** - भावसारम्, **कायेन स्पृष्ट्वा** - अनुष्ठानगोचरीविधाय, **पुनस्ततः** प्रमादादिना **न** - नैव, **विरमेत्** - अनुष्ठानोपरतिं कुर्यात्, को नु सकर्णोऽमृतस्य तृप्यतीति !, किञ्चैतद् भवलक्षदुर्लभमनन्तदुःखसमुद्रोत्तारकं चेत्यत्र क्षणमपि न युज्यते प्रमाद इति भावनीयम्, तथा चार्षम् - भवसयसहस्सदुल्लहे,

१. क.ग.च.ज.ट.ठ.ढ.ण.थ.द.ध.न.प.फ - गुरुअं। ख - गुरुआं। घ.त. गरुयं। झ - गरुअं।

जाइजरामरणसागरुत्तारे। जिणवयणंमि गुणायर ! खणमवि मा काहिसि पमायं - इति (उपदेशमालायाम् १२३)।

किञ्च प्रतिपन्नानुष्ठानपरिहारतः प्रकटमेव लाघवमित्युदाहरति -

**बद्धचिंधो जधा जोधो वम्मारूढो थिरायुधो।**
**सीहणायं विमुंचित्ता पलायंतो ण सोभती।।**

**।।४५-३९।।**

**यथा बद्धचिह्नः** - सुभटलक्ष्मालङ्कृतः, **वर्मारूढः**- वर्मितः कवचित इति यावत्, **स्थिरायुधः** - धीरतादिशूरगुणप्रतिपादकस्थैर्यविशेषेण गृहीतमायुधं चापादि येन सः, **योधः**- योद्धा, **सिंहनादम्** - सिंहवत् क्रियमाणां वीरगर्जनाम्, **विमुच्य** - परेषु साध्वससम्पादकतया प्रयुज्य, **पलायन्** - प्रहारादिवेदना-भीरुतया रणभूमेरपसरणं विदधन्, **न शोभते** - नैव शोभास्पदतामृच्छति, लाघवपात्रं जायत इति यावत्। निदर्शनान्तरमाह-

**अगंधणे कुले जातो जधा णागो महाविसो।**
**मुंचिता सविसं भूतो पियंतो जाति लाघवं।।**

**।।४५-४०।।**

**यथाऽगन्धने कुले जातो महाविषो नागः स्वविषम्** - स्वकीयं क्ष्वेडः, **मुक्त्वा** - मुखाद् बहिर्निसार्य, कञ्चिद्दष्ट्वेति यावत्, **भूयः** - पुनरपि तदेव विषं **पिबन्** -निगिलन्, **लाघवं याति** निन्दापात्रीभवति, वान्ताशनस्य स्वरूपत एव दुष्टत्वात्, कुलीनानां च दुष्टाचरणस्य दुष्टतरत्वात्, एतदेवाह-



**जधा रुप्पिकुलुब्भूतो रमणिज्जं पि भोयणं।**
**वंतं पुणो स भुंजंतो धिद्धिकारस्य भायणं।।**

**।।४५-४१।।**

**यथा रुक्म**- सुवर्णम्, तदस्त्यस्येति **रुक्मी** - महाश्रेष्ठी, तत्कुलम् - **रुक्मिकुलम्** - तस्मिन्नुद्भूतः - प्रसूतः कश्चिद् बालो **रमणीयमपि भोजनं** सकृद्वान्त्वा **पुनर्वान्तं** तद् **भुञ्जन् स धिक्धिक्कारस्य** - अतिन्यक्कारस्य, **भाजनम्** - पात्रम्, जायते। एवं प्रतिज्ञातप्रतिपालनादपसरन् सकृत्त्यक्तं चोपाददानस्तिरस्कारं लभते, अतोऽतिदुर्लभमिदं कथञ्चिदुपलब्धं जिनशासनं परित्यक्तप्रमादैः प्रतिपालनीयमेवेत्युपनयो योजित एव। इत्थमेव सुखसन्दोहसिद्धिरपीत्याह-

**एवं जिणिंदआणाए सल्लुद्धरणमेव य।**
**णिग्गमो य पलित्ताओ सुहिओ सुहमेव तं।।**

**।।४५-४२।।**

**एवम्** - अनन्तरोक्तजिनशासनमाहात्म्यविभावनेन, **जिनेन्द्राज्ञया शल्योद्धरणमेव** कुर्यात् - पूर्वकृतप्रमादाचरणालोचनादिना पापशल्यानामात्मनः सकाशान्निष्कासनं कुर्यात्, **च**कारात् पूर्वोक्तमप्रमादाचरणं चानुसन्दध्यात्।

यद्वा मायानिदानमिथ्यात्वलक्षणशल्यत्रितयोद्धारं कुर्यात्, चकाराद् वक्ष्यमाणगौरवत्रिकपरित्यागं विदध्यादित्यर्थः।

यथा **च प्रदीप्ताद्** गृहादेर्**निर्गमः** क्रियमाणः **सुहितः**- दाहाद्यपायपरिहारनिबन्धनत्वेनात्यन्तं हितकारको भवति, तथा **तत्**

– अनन्तरोक्तं शल्योद्धरणमपि **सुखमेव** – फले हेतूपचारात् सुखहेतुरेव। गौरवपरिहारायोत्साहयंस्तत्राद्यस्य विपाकमुपदर्शयति –

**इंदासणी ण तं कुज्जा दित्तो वण्ही अणं अरी।**
**आसादिज्जंतसंबद्धो[1] जं कुज्जा रिद्धिगारवो।।**
**।।४५–४३।।**

**इन्द्राशनिः** – शक्रायुधं वज्रम्, **तत्** – प्रत्यपायविशेषं **न कुर्यात्, दीप्तः** – जाज्वल्यमानः, **वह्निः** – अनलः, **ऋणम्**– उद्धारः, **अरिः** – शत्रुः, एतेऽपि तद्दुःखमुत्पादयितुमसमर्थाः, **यद्दुःखमासाद्यमानः** – विभवाद्यनुभावनेनाभ्यस्यमानः, अत एव **सम्बद्धः** – आत्मनि परिणतः, **ऋद्धिगौरवः** प्रवरवस्त्रादिभिरात्मोत्कर्षसम्भावनम्, **कुर्यात्,** तस्य क्लिष्टकर्मबन्धहेतुत्वेनानेकभवसहस्रेषु क्षुद्रतादिप्रयुक्तदुःखसन्दोहनिबन्धनत्वात्, इन्द्राशनिप्रभृतेस्तु सकृदेव दुःखदायकत्वात्। गौरवान्तरदुर्विपाकं निदर्शयति –

**सगाहं वा सरं बुद्धं विसं वा [2]महुजोजितं।**
**सामिसं वा णदीसोयं साताकम्मं दुहंकरं।।४५–४४।।**

**यथा बुद्धम्** – कमलवनावच्छेदेन विकसितम्, किन्तु **सग्राहम्** – हिंस्रजलजन्तुसहितम्, **सरः** – कासारः, **यथा** वा **मधुयोजितं विषम्, यथा** वा **सामिषम्** – मत्स्यादिप्रलोभनाय

---

१. क.ख.ग.ज.ट.ठ.ढ.ण.थ.ध.प - संबद्धो। घ.त - सम्बन्धो। च.झ - संबंधो। न.फ - संवद्धो। २. क.घ.ढ.ण.ध.न.प.फ.त. - मणुजोजितं। ख.ज.ठ.थ - महुजोजितं। ट - महजोजितं। झ - हुमणुजोजितं। च - वामाणुजोजितं।



न्यस्तैर्मनोज्ञैर्भोज्यैः सहितम्, **नदीस्रोतः** – तरङ्गिणीप्रवाहः, यथा त्रितयमप्येतदापातमनोरममपि विपाकदारुणं भवति, तथा **शातकर्म** – शातगौरवाधीनतयाऽनुष्ठितं शरीरशुश्रूषादिकृत्यम्, **दुःखङ्करम्** – नारकयातनादिविधातृ भवति।

अत्रानुक्तोऽपि रसगौरवविपाकोऽवगन्तव्यः, प्रागनेकशो मत्स्यदृष्टान्तेनोक्तत्वात्, गौरवत्रितयस्य चेदमार्षोदितं स्वरूपम् – पवराइं वत्थपायासणोवगरणाइं एस विहवो मे। अवि य महाजणनेया अहं ति अह इड्ढिगारविओ।। अरसं विरसं लूहं जहोववन्नं च निच्छए भुत्तुं। निद्धाणि पेसलाणि य, मग्गइ रसगारवे गिद्धो।। सुस्सुसइ सरीरं, सयणासणवाहणापसंगपरो। सायागार–वगुरुओ दुक्खस्स न देइ अप्पाणं – इति **(उपदेशमालायाम् ३२४–३२६)**। तदेतद्गौरवादिवशवर्तिनमधिकृत्याह–

**कोसीकित व्वऽसी तिक्खो भासच्छण्णो व पावओ।**
**लिंगवेसपलिच्छण्णो अजियप्पा तहा पुमं।।**
**।।४५–४५।।**

**कोशीकृतः** – कोशे न्यस्त **इव तीक्ष्णः** – निशातः, **असिः** तरवारः, **यथा** वा **भस्मच्छन्नः पावकः** – अग्निः, **तथा लिङ्गम्** – रजोहरणादि, **वेषः** – श्वेतवस्त्रादिः, ताभ्यां **प्रतिच्छन्नः** – अपह्नुतगौरवादिदोषः, **अजितात्मा** – इन्द्रियकषायवशगः, **पुमान्** – पुरुषः। यथोक्तासिप्रभृतिः कोशाद्यावरणावृततीक्ष्णत्वादिदोषो भवति तथाऽसावपीत्याशयः, एतेनास्य प्रच्छन्नपापतया पापतराऽऽवेदिता। किञ्च–

**कामा मुसामुही तिक्खा साता कम्माणुसारिणी।**
**[1]तण्हं सातं च सिग्घं च तण्हा छिंदति देहिणं।।**
**।।४५-४६।।**

**कामा**, कामप्रधानत्वेन कथञ्चित्तद्रूपत्वात्, मृषा एव मुखे प्रारम्भे यस्याः सा- **मृषामुखी**, मिथ्याचारैः पापकर्मभिः पोष्यमाणत्वात्, **तीक्ष्णा**, तीव्रदुर्विपाकयोनित्वात्, केयमित्याह- **साता** पदैकदेशे पदसमुदायोपचारात् सातस्पृहेत्यर्थः, सा च **कर्मानुसारिणा** - वेदमोहनीयोदयानुगामिनी भवति।

कथमस्या निकार सम्भवीत्याह- **देहिनाम्** - आसन्नभव्यानां जीवानाम्, **तृष्णा** - मुक्त्यभिलाषः, **शीघ्रं च** - त्वरितमेव, **तृष्णाम्** - भोगपिपासाम्, **सातं च** - सुखस्पृहाम्, **छिनत्ति** - निकृन्तति - अपाकुरुत इति यावत्, तामनपाकुर्वतो मुक्त्यभि- लाषत्वस्यैवानुपपत्तेः, तदपाकरणस्य तत्कार्यत्वात्, निश्चयतश्च स्वजन्यमजनयतः स्वरूपलाभस्यैवायोगात्, सन्मात्रस्य कुर्वद्रूप- त्वादिति निपुणं निभालनीयम्।

यद्वा **तृष्णे**ति तीव्रभोगपिपासा, सा **तृष्णाम्** - मन्दतर- धर्मेच्छाम्, **सातम्** - सुखं च छिनत्तीत्यर्थः, उत्कटविषयेच्छाया स्वबाध्यधर्मस्पृहाबाधकत्वात्, ततश्च धर्मकृत्यबाधः, ततश्च धर्मैकजन्यसौख्यबाध इति न किञ्चिदनुपपन्नम्। इत्थं च-

**सदेवोरगगंधव्वं सतिरिक्खं समाणुसं।**

१. क.ख.ग.ज.ट.ठ.ढ.थ.द.ध.न.प.फ - तण्हं सातं। घ.झ.त - तण्हासातं। च - तण्हा सातं। ण- तेण्हं सातं।



**वत्तंते हिं जगं किच्छं [1]तण्हापोसणिबंधणं।।**
**।।४५-४७।।**

**देवाः** - ज्योतिष्कवैमानिकाः सुराः, **उरगाः** - नागकुमारा नाकिनः, एतेन शेषभवनपतिग्रहः, **गन्धर्वाः** - व्यन्तरविशेषाः, एतेनावशिष्टव्यन्तरग्रहः, तैः सहितम्, **सदेवोरगगन्धर्वम्**, तिर्यग्भिः सहितम् - **सतिर्यक्**, मानुषैः सहितम् **समानुषम्, जगत् कृच्छ्रं हि** कष्टपूर्वकमेव **वर्तते**, तदत्र तृष्णापोष एव निबन्धनम्, यद्वा **तैः** - कामादिभिः, तृष्णापोषो निबन्धनं यस्य तत् - **तृष्णापोषनि- बन्धनम्, कृच्छ्रम्**- कष्टम्, **जगद् वृत्तम्** - प्राप्तमित्यर्थः। तत्पोषस्यैव शोषप्रयोजकत्वात्, दुष्पोषत्वाच्च, उक्तं च - आशा- गर्त्तः प्रतिप्राणि यस्मिन् विश्वमणूपमम्। कस्य किं कियदायाति ? वृथा वो विषयैषिता - इति **(आत्मानुशासने ३६)**, अन्यत्रापि - तृष्णाखानिरगाधेयं दुष्पूरा वर्तते भवे। या महद्भिरपि क्षिप्तैः पूरणैरेव खन्यते इति। एवं चातृप्तिदुःखमेव, जीवानां कामभोगैस्तृप्तत्वा- सम्भवात्, अन्वाह च- उदधिरुदकपूरैरिन्धनैश्चित्रभानुर्यदि कथमपि दैवात् तृप्तिमासादयेताम्। न पुनरिह शरीरी कामभोगैर्विसङ्ख्यै- श्चिरतममपि भुक्तैस्तृप्तिमायाति कैश्चित्-इति**(ज्ञानार्णवे २०-२८)**।

कथं तर्हि तृष्णोच्छेद इति चेत् ? यात्रामात्रभोज्यादि- निराशंसभोगेन शेषत्यागादिति गृहाण, एतदेवोपमयाभिधत्ते-

**अक्खोवंगो, वणे लेवो, तावणं जं जउस्स य।**
**णामणं उसुणो जं च जुत्तितो कज्जकारणं।।**
**।।४५-४८।।**

१. क.ढ.ण.ध.न.प.फ- तण्हापासणिबंधणं। ख.ज.ट.ठ.थ - तण्हापोसनिबंधणं।

**अक्षोपाङ्गः, व्रणे लेपः, यच्च जतुनस्तापनम्, यच्चेषोर्नामनम्**, तदालम्बनतो **युक्तितः**- यात्रामात्रार्थभोज्यादि-योगात्, **कार्यम्** - ज्ञानाद्याराधनात्मकं सिषाधयिषितं साध्यम्, तस्य **कारणम्**- निष्पादनम्, एतच्च प्राक् प्रपञ्चितमेवेति न पुनः प्रतन्यते **(ऋषिभाषिते २५-६)**, युक्तं चैतत्, अन्यथा विषयो-दीरणाद्यनर्थसम्भवात्, तथा चार्षम् - अच्चाहारो न सहे, अइणिद्धेण विसया उइज्जंति। जायामायाहारो, तंपि पकामं न इच्छामि।। उस्सन्नकयाहारो अहवा विगईविवज्जियाहारो। जं किंचि कयाहारो अवउज्झियथोवमाहारो।। एवं स्तोकपरिभोगेन शेषमहानाद्देववन्दनीयताऽऽगमेऽभिहिता, सा च विबुधैर्गुणोत्कर्ष-दर्शनादिति यतितव्यमत्र गुणोत्कर्षसस्पृहैः, तदाह- थोवाहारो थोवभणिओ य जो होइ थोवनिद्दो य थोवोवहिउवगरणो तस्स हु देवावि पणमंति - इति **(आवश्यकनिर्युक्तौ १२८० - १२८२)**

ननु यस्स्तोकेनाहारेण न संस्तरति तस्य किमिति चेत् ? अत्राह-

**आहारादीपडीकारो सव्वण्णुवयणाहितो।**
**अप्पा हु तिव्ववण्हिस्स संजमट्ठाए संजमो।।**

**।।४५-४९।।**

**तीव्रवह्नेः** - प्रचण्डजठराग्निवतः, **आत्मनः** - जीवस्य, षष्ठ्यर्थे प्रथमा, **आहारादिना** - क्षुधानिवृत्तिप्रयोजकेन पर्याप्त-केनान्नपानप्रभृतिना, **प्रतिकारः** - क्षुद्बाधाप्रतिकृतिः, **सर्वज्ञ**-



**वचनाख्यातः**, परमात्मप्रवचनेऽनुज्ञातः, तदुक्तम् - अयावयट्ठा भोच्चा णं जइ तेण न संथरे।। तओ कारणमुप्पन्ने भत्तपाणं गवेसए। इति **(दशवैकालिके ५/२/२-३)**, नन्वस्यास्तोककृत्वरभ्यवहरण-मस्तोकमात्राभ्यवहरणं वा किं प्रवचनविराधना, न वेति चेत् ? नेत्युच्यते, तदनुज्ञातप्रवृत्तेस्तद्विराधनाऽसम्भवात्, अत एवापवाद-स्योत्सर्गभेदत्वमुपपादितमाचार्यैः, यथा - अपवादोऽपि सूत्राबाधया गुरुलाघवालोचनापरोऽधिकदोषनिवृत्ताय शुभः, शुभानुबन्धी, महासत्त्वासेवित उत्सर्गभेद एव- इति **(ललितविस्तरायाम्)**, युक्तं चैतत्, तस्यापि **संयमार्थत्वात्** - चारित्राराधनप्रयोजनेन क्रियमाणत्वात्, कथञ्चित्सोऽपि **संयम** एव, कथञ्चित्फलात्म-कत्वाद्धेतोः, यथोक्तम् - भावमोक्षस्तु तद्धेतुरात्मा रत्नत्रयान्वयी - इति **(अध्यात्मसारे १८-१७९)**।

न चैवं यथेच्छविहारेऽपि संयमव्यपदेशप्रसङ्ग इति वाच्यम्, मूलोक्त- **हु** - पदेनापास्तत्वात्। अयमाशयः- उक्तप्रतिकारस्तीव्र-वह्ने**रेवा**नुज्ञातः, नान्यस्य, अतृष्णामूलनिषिद्धप्रवृत्तेरुत्सर्गासहिष्णु-तानियतत्वेन सहिष्णोः सतृष्णताभावेनापवादपदविषयताऽयोगात्, उन्मार्गस्थितत्वात्, ततश्च नास्मिन् संयमगन्धोऽपीति कुतस्तद्वत्त्वेन व्यपदेशाशङ्काऽपीति।

एतेनासहिष्णोरपि सतृष्णस्योत्सर्गनिषिद्धप्रवृत्तौ संयमव्यपदेशः प्रत्युक्तः, उपपादितोत्सर्गभेदात्मकापवादलक्षणस्य तस्मिन् समन्व-यासम्भवादिति दिक्।

तस्मादशठभावेन सूत्रसापेक्षवृत्त्या तृष्णालतोन्मूलनं विधेयम्,

मनोज्ञभोगानामपि तत्त्वतो विडम्बनारूपत्वादित्याशयेनाह–

**हेमं वा आयसं वा वि बंधणं दुक्खकारणा[1](णं?)।**
**महग्घस्सावि दंडस्स णिवाए दुक्खसंपदा।।४५–५०।।**

**हैमम्** – सुवर्णघटितम्, **आयसम्** – लोहनिर्मितम्, **बन्धनम्** – निगडादि, **दुःखकारणम्** – निरोधव्यथाप्रयोजकम्, **वाशब्दौ** उभयत्र समानैव दुःखहेतुतेत्यर्थस्य ज्ञापकौ। **अपिः** – समुच्चये, **महार्घ्यस्यापि** – महामूल्यस्यापि **दण्डस्य** – राजतादियष्ट्याः, **निपाते** – कथञ्चित् शिरःप्रभृत्यङ्गेषु पतने सति **दुःखसम्पत्** – वेदनावाप्तिरेव भवति, एवं व्यवहारतः सुखहेतुत्वेनाभिमता अपि विषयास्तत्त्वतो दुःखहेतव एवेति तत्तृष्णात्यागो विधेयः।

एवमेव परीषहादावपि सुखकारणताविभावनेनापातरुद्रेष्वप्येषु, नारुचिः कर्तव्या, नापि तत्कर्तरि प्रद्वेषः कार्यः, सहाय–भूतत्वात्तस्येत्याह–

**आसज्जमाणे दिव्वम्मि धीमता कज्जकारणं।**
**कत्तारे [2]अभिचारित्ता विणीयं देहधारणं।।४५–५१।।**

**दिव्ये** – देवकृत उपसर्गे, उपलक्षणान्मनुजादिकृतोपसर्गग्रहः, तस्मिन् **आसाद्यमाने** – आत्मना प्राप्यमाणे, स्वस्मिन्नुपसर्गेण पीडायामुत्पाद्यमानायां सत्यामिति भावः, **धीमता** – नत्थि जीवस्स नासो त्ति एवं पेहेज्ज संजए – **(उत्तराध्ययने २–२९)** इति पारमर्षप्रोक्तप्रेक्षाशालिना, **कर्तरि** – उपसर्गकारिदेवादौ, **कार्यम्** –

१. क.ख.ग.ज.ट.ठ.ढ.ण.थ.द.ध.न.प.फ. - कारणा। घ - कारणां। च.झ.त - कारणं। २. क.ज.ठ.ण.थ.ध.न.प.फ - पूभिवारित्ता। ग.घ.त- अभिचारित्ता। च.झ - अभिवारित्ता। ट - रिभूवारित्ता।



कृत्स्नकर्मक्षयलक्षणं स्वाभिप्रेतं साध्यम्, तस्य **कारणम्** – निष्पादनम् – सिद्ध्यभियोग इति यावत्, **अभिचार्य** – अभिविधिना सम्बध्य, अयमुपसर्गकर्ता मत्कार्यसाधकत्वेन मत्सहाय एवेति भावसारं प्रतिपद्येति भावः, **देहधारणम्,** पदैकदेशे तत्समुदायोपचाराद् देहधारणौत्सुक्यम्, मा भून्मे देहस्य विनाश इत्याकारका चित्तवृत्तिरित्यर्थः, तद्यथा **विनीतं** – अपनीतं भवति, तथा यतितव्यमिति शेषः, अन्यथा प्रतिपातसम्भवात्, एतदेव निदर्शनैः स्फुटयति –

**[1]सागारेण विणिज्जोको आतुरो वा तुरंगमे।**
**भोयणं [2]भिज्जदिहि वा जाणेज्जा देहरक्खणं।।**
**।।४५–५२।।**

**अगारेण** गृहेन **सह** वर्तत इति **सागारः**, तेन सह **विनियोगः** – स्तोकोऽपि प्रसङ्गो, एष च यतीनां कलङ्कावहत्वात् पतनहेतुः, यदार्षम् – थोवो वि गिहिपसंगो जइणो सुद्धस्स पंकमावहई – इति **(उपदेशमालायाम् ११३)**।

**यथा** वाऽऽतुरः – रुग्णः, **तुरङ्गमे** – अश्व आरोहणं कुर्यात्, एतदपि पतनपीडावहमेव, **यथा** वा **भेद्या** – भेदितुं शक्या, **दिहि** त्ति **धृतिः**–धैर्यम्, यतस्तत् **भेद्यधृति भोजनम्** – तथाविधो मन्त्रचूर्णादियोगनिष्पन्न आहारः, एतदप्याहारयतो ग्रथिलताद्यपाय–

१. क.ख.ज.ठ.ढ.ण.थ.ध.न.प.फ - सागारेण विणिज्जोको। घ.झ - सागरेणावणिजोको। च.ट.त.द - सागरेणावणिज्जोको। २. क.ख.ज.ट.ठ.ढ.ण.थ.द.ध.न.प.फ - भिज्जदिहि। ग.घ.च.झ.त - भिज्जएहिं।

निबन्धनम्।

तथैव **देहरक्षणम्** – अनन्तरवृत्तोदितं शरीरसंरक्षणौत्सुक्यम्, **जानीयात्** – आर्त्तध्यानरूपतया दुर्गतिपतनहेतुत्वेनावगच्छेत्। ततश्च तत् परित्यजेत्, एतेनान्यदासक्तेस्तु सुतरां परित्यागोऽभिहितः। उपदेशसर्वस्वमभिधायोपसंहरति –

**जातं जातं तु वीरियं सम्मं जुज्जेज्ज संजमे।**
**[1]पुप्फादादि पुप्फाणं रक्खंतो आदिकारणं।।**
**।।४५–५३।।**

**जातं जातम्** – प्रत्येकमुत्पन्नम्, **वीर्यम्** – शारीरादिबलम्, **सम्यक्** – सद्गुर्वाज्ञापुरस्सरम्, **संयमे** – मुक्तिसाधकानुष्ठाने, **योजयेत् तु** – साधनतया व्यापारयेदेव, तत्रानुपयुक्तस्य परमार्थतो वीर्यत्वस्यैवानुपपत्तेः। कथं योजयेदित्याह– **पुष्पात्** – विकासात्, पुष् विकासे, प्रकृतानुष्ठानसानुबन्धसिद्धेरिति यावत् **पुष्पाणाम्** – भाव्यनुष्ठानसिद्धीनाम्, **आदि** – मूलम्, यथा कश्चिद्विचक्षणो रक्षति, तथाऽऽ**दिकारणम्** – संयमोपयोगिवीर्योद्गमानुबन्धनिबन्धनम्, **रक्षन्** – तदनुच्छेदानुगुणसन्त्राणविधौ यत्नं कुर्वन्, योजयेदित्यत्र योगः, इत्थमेव सानुबन्धसिद्धिभावादिति भावः, अन्यथा तु गुरुलाघवादिविज्ञानवञ्चितानां निरनुबन्धं क्रियामात्रं स्यादित्यनुबन्धशुद्धौ यतितव्यम्, साऽपि शुद्धादाज्ञाबहुमानादिति तदनुस्यूतान्तःकरणेन संयमोद्यमः कर्तव्य इत्यत्रो–

१. क.ण.न.फ - पुप्पादादि पुप्पाणं। ख - पुष्पादादि पुष्पाण्णं। ज.ठ.थ - पुष्पादादि पुष्पाणं। ट - पुष्पादोहि पुष्पाणं। ढ - पुप्पादादि पुफाणं। ध - पुप्फादोदि पुष्फाणं। प - पुष्फादोदि पुष्फाणं। ग.घ.च.झ.त - पुप्फादीहि पुप्फाणं।



पदेशचूलिका, तथाहुराचार्याः – आणाबहुमाणाओ सुद्धाओ इह फलं विसिट्ठं ति। ण तु किरियामेत्ताओ पुव्वायरिया तहा चाहु।। भावाणाबहुमाणाओ सत्तिओ सुकिरियापवित्ती वि। नियमेणं चिय इहरा ण तको सुद्धो त्ति इट्ठा सा।। एईए उ विसिट्ठं सुवन्नघडतुल्लमिह फलं नवरं। अणुबंधजुयं संपुन्नहेउओ सम्ममवसेयं।। किरियामेत्तं तु इहं जायति लद्धादवेक्खयाए वि। गुरुलाघवादिसन्नाणवज्जियं पायमियरेसिं।। एत्तो उ निरणुबंधं मिम्मयघडसरिसमो फलं णेयं। कुलडादि दाणाइसु जहा तहा हंत एयं पि।। तम्हा भावो सुद्धो सव्व पयत्तेण हंदि परलोए। कायव्वो बुद्धिमया आणोवगजोगतो णिच्चं – इति **(उपदेशपदे २३८–२४३)**। एवमाज्ञायोगपुरस्सरं संयम उद्यच्छतो यत् पर्यवस्यति तदाह–

**एवं से सिद्धे बुद्धे विरते विपावे दंते दविए अलंताती णो पुणरवि इच्चत्थं हव्वमागच्छति – त्ति बेमि।।**

**एव**मित्यादि प्राग्वत्। इति पञ्चचत्वारिंशत्तमे वैश्रमणीयाध्ययन आर्षोपनिषद्।

## अथ प्रशस्तिः

(शार्दूलविक्रीडितम्)

पादाङ्गुष्ठसुचालितामरगिरि-र्हस्तास्तदेवस्मयः,
जिह्वाखण्डितशक्रसंशयचयो, वाङ्नष्टहालाहलः ।
सर्वाङ्गीणमहोपसर्गदकृपा-नेत्राम्बुदत्ताञ्जलिः,
दाढादारितदिव्ययुत्समवतात् श्रीवर्धमानो जिनः ।।१ ।।

(उपजाति)

श्रीगौतमस्वामि-सुधर्मदेव-जम्बूप्रभु-श्रीप्रभवप्रमुख्याः।
सुरीशपूजापदसूरिदेवा, भवन्तु ते श्रीगुरवः प्रसन्नाः ।।२ ।।

(वसन्ततिलका)

एतन्महर्षिशुचिपट्टपरम्पराजान्-
आनन्दसूरिकमलाभिधसूरिपादान् ।
संविग्नसन्ततिसदीशपदान् प्रणम्य,
श्रीवीरदानचरणाँश्च गुरून् स्तविष्ये।।३ ।।
श्रीदानसूरिवरशिष्यमतल्लिका स,
श्रीप्रेमसूरिभगवान् क्षमया क्षमाभः ।
सिद्धान्तवारिवरवारिनिधिः पुनातु,
चारित्रचन्दनसुगन्धिशरीरशाली ।।४ ।।

(शार्दूलविक्रीडितम्)

प्रत्यग्रत्रिशतर्षिसन्ततिसरित्-स्रष्टा क्षमाभृन्महान्,
गीतार्थप्रवरो वरश्रुतयुतः सर्वागमानां गृहम् ।
तर्के तर्कविशुद्धबुद्धिविभवः सोऽभूत् स्वकीयेऽप्यहो,
गच्छे संयमशुद्धितत्परमतिः प्रज्ञावतामग्रणीः ।।५ ।।
तत्कालीनकरग्रहग्रहविधा-वब्दे ह्यभूद् वैक्रमे,
तिथ्याराधनकारणेन करुणो भेदस्तपागच्छजः ।
कारुण्यैकरसेन तेन गुरुणा सत्पट्टकादात्मनो,
बह्वंशेन निवारितः खकरखौ-ष्ठे पिण्डवाडापुरे ।।६ ।।



(वसन्ततिलका)

तत्पट्टभृद् भुवनभान्वभिधश्च सूरिः,
श्रीवर्धमानतपसां निधिरुग्रशीलः ।
न्याये विशारद इतीह जगत्प्रसिद्धो,
जातोऽतिवाक्पतिमति-र्मतिमच्छरण्यः ।।७ ।।
तस्याद्यशिष्यलघुबन्धुरथाब्जबन्धु-
स्तेजास्तपःश्रुतसमर्पणतेजसा सः ।
पंन्यासपद्मविजयो गणिराट् श्रियेऽस्तु,
क्षान्त्येकसायकविदीर्णमहोपसर्गः ।।८ ।।
सर्वाधिकश्रमणसार्थपतिर्मतीशः,
पाता चतुःशतमितर्षिगणस्य शस्यः ।
गच्छाधिनाथपदभृज्जयघोषसूरिः,
'सिद्धान्तसूर्य' यशसा जयतीह चोच्चैः ।।९ ।।
सद्बुद्धिनीरधिविबोधनबद्धकक्षः,
वैराग्यदेशनविधौ परिपूर्णदक्षः ।
सीमन्धरप्रभुकृपापरपात्रमस्तु,
श्रीहेमचन्द्रभगवान् सततं प्रसन्नः ।।१० ।।
इष्वरिखयुगे (२०६५) वर्षे, श्रीराजनगरे मया।
देवगुरुप्रभावेन, व्याख्येयं परिनिर्मिता ।।११ ।।
यदत्र सौष्ठवं किञ्चित्, तद् गुरोरेव मे न हि।
यदत्रासौष्ठवं किञ्चित्, तन्ममैव गुरोर्न हि ।।१२ ।।

शुध्यतां मे क्षतिश्चात्र, कृतकृपैः सुकोविदैः।
सावृतेः सूक्ष्मबुद्धेः सा, मादृशस्तु कथैव का ?।।१३।।
प्रत्येकबुद्धसाधूना – माशयादन्यथोदितम् ।
यदि चोत्सूत्रितं किञ्चिन्, मिथ्या मे दुष्कृतं भवेत् ।।१४।।

इति चरमतीर्थपतिश्रमणभगवच्छ्रीमहावीरस्वामिशासने
कारुण्यपुण्यार्णवश्रीसम्भवनाथस्वामिसान्निध्ये
श्रीमत्सद्गुरुपरमप्रसादात्
परमेष्ठिरसाम्बरनयने (२०६५) वैक्रमेऽब्दे
तपागच्छीयाचार्यदेवश्रीमद्विजयप्रेम-भुवनभानु-पद्म-
हेमचन्द्रसूरीश्वरशिष्य-आचार्यविजयकल्याणबोधिसूरिसंस्तुता
श्रीप्रत्येकबुद्धमहर्षिभाषितश्रीऋषिभाषितसूत्रवृत्तिरूपा आर्षोपनिषद्।



